श्रीवेदव्यासायनमः॥ ॥हरिः ॐ॥ अथ नारायणाभिधं ज्योतिः प्रत्यूहध्वांतशांतिकृत्॥ कमलाकमलानंदमंतःस्वांतमुपास्महे॥ ॥१॥
१ ऋचांपदान्युपादायतेषांभाष्यपदैःसह।कुर्मःसंवादितामात्रंयथाधीतंयथामति॥२॥ इह खलु संसाराकूपारपारंजिगमिषतांप्रार्थ-
नीयस्यभगवत्प्रसादस्यतज्ज्ञानमंतरेणासंभवात्तदर्थंप्रवृत्ता अपिवेदा अप्रतिपत्तिविप्रतिपत्तिभ्यांनतत्कारणतामश्नुवते॥ अतः तेषांभ-
गवत्परत्वप्रकारप्रदर्शनार्थंकांश्चिदृचांभाष्यंकरिष्यन्नाचार्यः आरिप्सितस्याविघ्नेनपरिसमाप्तयेप्रचयायचनारायणप्रणामस्त-

श्रीमत्प्राज्ञमौलिप्रियतमहनुमंदिरावासायनमः॥हरिः ॐ॥ नारायणंनिखिलपूर्णगुणार्णमुच्चसूर्यामितद्युतिमशेष
निरस्तदोषं॥ सर्वेश्वरंगुरुमजेशनतंप्रणम्यवक्ष्याम्यृगर्थमतितुष्टिकरंतदस्य॥ १॥ श्रीवेंकटेशायमंगलं॥छ

वनेकुर्वन्प्रयोजनंचदर्शयति॥ ॥नारायणमिति॥ ॥अनवधारितस्वरूपस्यप्रणामस्तवनायोगात्स्वरूपावधारणस्यचलक्षणेन
विनाऽसंभवान्नारायणस्यलक्षणमाह॥ निखिलेति॥ निखिलाः निःशेषाः पूर्णाः प्रत्येकं तेचतेगुणाश्च।अर्णइत्युदकनामततो
मत्वर्थेतिविहितादितिङ्प्रत्ययः निखिलपूर्णगुणैः अर्णः समुद्रइव निखिलपूर्णगुणार्णःतं॥ तेकेगुणाइत्यतोलेशतोदर्शयति॥
उच्चेति॥अमिताश्चतेसूर्याश्चसूर्यामिताः॥कडाराःकर्मधारयइतिविशेषणस्यपरनिपातः।उच्चाःसामस्त्येनाविर्भूतप्रकाशा

व्यास
१

135/5

श्रीमदानन्दतीर्थप्रणीतम्

ऋग्भाष्यम्

सटीकम्

माध्वसाम्प्रदायी ग्रंथः

नन्वग्न्यादिप्रतिपादनपराणामृचांव्याख्यानादिकंकथंनारायणस्यातितुष्टिकरं।सकलवेदानांमुख्यतोभगवत्प्रतिपत्तिहेतुत्वात्॥कुतएतदि
२ त्यतआह॥ ॥ॐमिति॥ ॥असौपरमेश्वरःॐकारार्थःतावत्केननिमित्तेन॥अशेषगुणाधारइति।इतिशब्दोहेतौ।यथोक्तं।ॐतत्ववाची
ह्योंकारइति॥कुतइत्यतश्चोक्तमशेषेति॥ॐकारोह्यशेषगुणाधारत्वंवक्ति॥तथाभूतश्चपरमेश्वरएवेतिसएवोंकारार्थः॥किंचनाराय
णशब्दोहिभगवतिप्रसिद्धः॥सचतस्यगुणपूर्त्तिवाची॥तत्समाख्यानादोंकारोपितस्यरइतिनिश्चीयतइत्याह॥ ॥नारायणोप्यसावि

णो ॐमशेषगुणाधारइतिनारायणोप्यसौ॥भूर्भूतिवरोनंतस्कन्धोयद्व्याहृतीरितः॥२॥ ७॥

ति॥ किमतोयद्येवमित्यतआह॥ ॥भूर्णइति॥ ॥यद्यस्मादेवमोंकारार्थस्तस्माद्व्याहृतीरितःसएव।प्रयावार्थोव्याहृतयइतिवचनात्॥
किंनिमित्तं।मद्यस्माद्भूर्णोभूतिवरोनंतस्कन्धश्च।तस्माद्व्याहृतीरितः।भूबहो।बहुः।पूर्णतयामित्युक्तत्वात्॥भवतेःक्विपिपूर्णत्वाद्भू
भूत्याऐश्वर्येणवरः।महैश्वर्यवानितिभुवः।भवतेरौणादिकोडुप्रत्ययः।वरशब्दस्यातलोपश्च।निरुक्तत्वात्।यथोक्तं।वर्णागमोवर्णविप
र्ययश्चतथापरौवर्णविकारनाशौ॥धातोस्तदर्थातिशयेनयोगस्तदुच्यतेपंचविधंनिरुक्तमिति॥स्कशोभनंवःस्कःखंयस्यशोभनताच
स्कन्धस्यानंततयेति॥अनंतस्कन्धत्वात्स्वः।स्वरितिपाठेनिरुक्तत्वादुकारलोपः।शब्दस्वभावादव्ययत्वं॥ ॥२॥ ॥ व्यास
धातोर्थस्तदर्थः सचासावर्थश्चेतितदर्थः।प्रसिद्धोर्थस्तंअतिशयेनातिशयितात्अतिक्रम्येतियावत्॥योगः।अन्यार्थेनयोगः।अन्यार्थवर्णनंप्रसिद्धार्थातिरिक्तार्थोतरवाचित्वमित्यर्थः।यथाभिद्यतो
विदारणादर्थत्वेतिसंयुक्तयोरोश्चविसर्गः।धातुनामनेकार्थत्वादन्यत्वमेवार्थतयास्वीक्रियते॥संग्रहोपि।भवेद्वर्णागमाद्धंससिंहोवर्णविपर्ययात्॥गूढोत्मावर्णविकृतेर्वर्णनाशात्पृषोदरमिति॥ २

किंतथापीत्यतआह॥गुणैरिति॥यस्माद्व्याहृतीरितस्तस्मात्सएवगायत्र्यर्थईरितः॥व्याहृत्यर्थत्वाद्गायत्र्याः।केननिमित्तेन॥गुणैस्ततइतित
द्।तत्सिजियजितनिभ्योडदितितनोर्जप्रत्ययः॥योग्यतयागुणानांसंबंधः।प्रसविताजगतोजनकइतिसविता।षूङ्प्राणिप्रसवइत्यस्मा
त्तृच्॥वरणीयोभजनीयइतिवरेण्यः।वृञ्एण्यइतिवृणोतेःकर्मण्येण्यः।गुणोन्नतैर्हेतोर्वरणीयइतिवरेण्यशब्दोर्थयोर्हेतुहेतुमद्भावो

गुणैस्ततःप्रसवितावरणीयोगुणोन्नतैः॥भारतिज्ञानरूपत्वाद्भर्गोध्येयोखिलेजनैः॥३॥

दर्शितः॥भादीप्तिः॥रतिःक्रीडा॥गसर्थानांज्ञानार्थत्वाद्गमेर्ज्ञानार्थता॥भादीप्तौ।रमुक्रीडायां॥गम्लृगतौ।धातुसमुदायादस्कन्॥उणादयोब
हुलमित्युक्तत्वात्॥अदिभ्यांडुतजितियथा॥अस्कन्प्रत्ययसंनियोगेनभातेर्ह्रस्वता॥रमेर्गमेश्चटिलोपः॥देवशब्दस्तूत्तरत्रव्याख्यास्यते॥
धीमहीतात्समर्थं ध्येमइति॥ध्यायतेःसंप्रसारणंविकरणलोपआत्मनेपदंचछांदसं॥व्यत्ययोबहुलमितिवचनात्।अखिलैर्जनैरितिबहुवचनार्थः॥३॥

योजनीयं

तृतीयपादत्तात्स्वयंप्रेरक इति ॥ नइतिबहुवचनप्रयोगादशेषेत्युक्तं ॥ चुद प्रेरणे इत्यस्माल्लिट् ॥ एवं योजनं यो नोस्माकं अशेषजीवानां धियो बुधीः प्रचो
२ दयात् प्रेरयेत् । तस्य सवितुर्देवस्य नारायणस्य । तत् गुणैस्ततं । तस्मादेव वरेण्यं । भारती ज्ञानरूपत्वाद्भर्गो रूपं धीमहि चिंतयाम इति ॥ गायत्र्यर्थत्वे
पि भगवतः किमायातं प्रकृत इत्यत आह ॥ स इति । यतो गायत्र्यर्थस्तस्मात्स हरिरेव पौरुषे सूक्ते । ईरितः प्रतिपादितः ॥ गायत्र्यर्थत्वात्तस्य । न

प्रेरकोशेषबुधीनां स गायत्र्यर्थ ईरितः ॥ स पूर्णत्वात्पुमान्नाम पौरुषे सूक्त ईरितः ॥४॥
स एवाखिलवेदार्थः सर्वशास्त्रार्थ एव च ॥ स एव सर्वशब्दार्थः ॥ ॥श्रीरामप्रसीद॥

च पुरुषसूक्ते पुरुषः प्रतिपाद्यो न विष्णुरितिवाच्यं ॥ यतः पूर्णत्वात्पुमान् पुरुषो नाम । स एव पॄ पालनपूरणयोः । अस्मात्पुरः । कुषन्नितिकुषन्प्र
त्ययः । उदोष्ठ्यपूर्वस्येत्यनेन ऋकारस्योकारः ॥ तथापि किमित्यत आह ॥ स एवेति ॥ यतः पुरुषसूक्तोर्थो भगवांस्तस्मात्स एवाखिलवेदार्थः ॥
पुरुषसूक्तार्थत्वात्तेषां वेदार्थत्वात्स एव सर्वशास्त्रार्थश्च ॥ स्मृतीनां श्रुतिमूलकत्वात् । ततश्च स एव सर्वशब्दार्थः ॥ तेषां वैदिकत्वादित्येतदुपसंगा

व्यास
३

श्वेते स्थर्यमिताश्वेतेषां द्युतिरिव द्युतिर्यस्यासौ तथोक्तः ॥ यद्वा उच्चाश्वेते स्थर्याश्वेतेरमिताः अपरिछिन्ना द्युतिर्यस्येति व्याख्येयं ॥ लक्षणांत
रमाह ॥ अशेषेति ॥ अशेषेण निरस्ताः दोषा यस्मात्सोशेषनिरस्तदोषस्तं । लक्षणद्वयं केवलव्यतिरेकिणा साधनीयमिति भावेनाह ॥
सर्वेश्वरमिति ॥ अस्य तं नस्य प्रपंचस्येश्वरेण भाव्यमिति प्रसिद्धमेव । ऋक्प्रतिपाद्यतया नतं गुरुत्वेनापि नमति ॥ गुरुमिति ॥ तदुपपादयति ॥
अजेति ॥ ऋगर्थं वक्ष्यामीत्यनेन संनिधापितमृगर्थस्य वचनं श्रवणं ज्ञानं च तदितिपरामृशति ॥ यस्मात्तदृगर्थवचनादिकमस्य नारायण
स्यातितुष्टिकरं तस्मात् ॥ तदस्येत्येकं वापदं । तस्योक्तलक्षणस्य ॥ अस्य प्रतिपिपादयिषिततया बुद्धिसन्निहितस्येति ॥ नन्वेवं चेत्कृ
थं कृतनारायणनुतिप्रणामस्यापि भाष्यकारस्य वक्ष्याम्यृगर्थमिति प्रतिज्ञान पारंगतेति ॥ मैवं भोः ॥ उक्तमेतत् ॥ कासांचिदृचामेव व्या
ख्या प्रतिज्ञातेति ॥ अत एव बह्वृचपक्षत्रयमिति परमेश्वरस्य भयादिदोषसमाधिकराहि संतत्प्रसादाद्दुःखाभावलक्षणं मोक्षं च प्रतिपादयं
तीं सर्वशास्त्रोपसंहाररूपामृचं व्याख्याय समापितोयं ग्रंथः ॥ प्रसिद्धं धनमेव हीत्यंते मांगलिकं पदं चोपनिबद्धं ॥ असमस्तव्याख्याप्र
तिज्ञास्त्वनायमध्य एवैकोवर्गो न व्याख्यातः ॥ न किमीकिरित्यादि व्याख्यानप्रकारशिक्षणं चैतमेवार्थं प्रकाशयतीति ॥ ३ ॥

वेदांतराद्विशेषतः कथमयं चामेव परमेश्वरपरत्वमिति तं प्रकारमाह ॥ यद्इति ॥ योवेदानांनामधा एक एवेति श्रुत्याऽग्न्यादिदेवनाम्नां तदृत
त्वेन भगवद्वाचित्वेन कारणेन ऋचां तद्रूतत्वेन विशेषतः स्पष्टत्वाद्विशेषेणाप्यृगर्थता हरेरिति ॥ इदमुक्तं भवति ॥ वेदतस्य खल्वापा
ततः कर्मादिप्रतिपत्तिपरस्य भगवत्परताज्ञानं मंदानां दुःशकं भवति ॥ ऋचां त्वग्न्यादिगुणवर्णनपराणामग्न्यादिनाममात्रस्य भगव
द्वाचित्वज्ञानमात्रेण भगवत्परत्वा वधारणं सुकरं इति तासां विशेषतः परमेश्वरपरत्वमुच्यत इति ॥ तदुक्तं ॥ ऋचस्तु विशेषतः

योदेवानामिति श्रुत्यादेवनाम्नां विशेषतः ॥ स्पष्टत्वात्तद्रूतत्वेन तत्राहाग्रेऽग्निनामकं ॥ अग्रणीत्वंयदग्नित्वमिसंग्रेनामत

इंद्रादिनामवतो विष्णोर्गुणानज्ञानामपि प्रकाशयंतीति प्रायेण नारायण एवेति विद्यादिति ॥ एवमृगर्थव्याख्यानमुपपाद्याद्यसूक्त
म स्य तात्पर्यं तावदाह ॥ तत्रेति ॥ तत्र ऋक्षु ॥ अग्रे प्रथमं सूक्ते । अग्निनामकं भगवंतं । आह प्रतिपादयति वेदः । अग्निनामवतः प्रथमप्र
तिपादने को हेतुः इत्यत आह ॥ अग्रणीत्वमिति ॥ यद्यस्मादग्रणीत्वं अग्नित्वमग्निशब्दाभिधेयं इति तस्मात्तन्नाम अग्निनाम ।
अग्रे प्रथमसूक्ते युक्तं भवेत् । सह्यग्रणीर्नाम । यस्सर्वस्यादावग्रे वर्तते । तथात्वं चेश्वरस्याग्निशब्दोक्तिः । अतस्तन्नाम्नैवाग्रेसूक्तिरुपप व्यास

अत्र वृद्धसंमतिमाह ॥ एवमेवेति ॥ अनेनैवाभिप्रायेणाग्निशब्दमादिं कृत्वा भगवान्बादरायणः सर्वशब्दानामीश्वरपरतया निरुक्तिमाह ॥ त
देव कुत इत्यत आह ॥ यथैवेति ॥ यथा येन प्रकारेण निरुक्तौ कृतायां ॥ इति भगवतः प्रतिज्ञावाक्ये नाग्निशब्दमादिं कृत्वा निरुक्तमाहेति ज्ञा
यत इत्यर्थः ॥ नहि भगवतो यादृच्छिकी प्रवृत्तिः ॥ नाप्येतद्विहाय निमित्तांतरकल्पने प्रमाणमस्ति ॥ यत एवमग्निशब्दस्य प्रथमत्वमुपप

एवमेवाह भगवान्निरुक्तिं बादरायणः ॥ यथैवाग्न्यादयः शब्दाः प्रवर्तन्ते ज
नार्दने ॥ यथानिरुक्तिं वक्ष्यामो ज्ञानिनां ज्ञानसिद्धये ॥ इति तेन ॥

न्नं तेन कारणेन ॥ तत्राहाग्रेऽग्निनामकमिति संबंधः । एवमुत्तरत्रापि सूक्तादिक्रमनियमे कारणानि विशेषशास्त्रबलेन ज्ञातव्या
नीति प्रदर्शनार्थमिदमुक्तं ॥ चिरंतननिरुक्ताद्यनुसारेण प्रवृत्ते ऽस्मद्व्याख्याने ऽर्वाचीननिरुक्तादिविसंवादो नादरणीय इत्यनेन
सूचितं भवति ॥ छ ॥

ऋगर्थश्चत्रिविधोभवति॥त्रिविधःखल्वेदार्थः॥एकस्तावत्प्रसिद्धाग्न्यादिरूपः।अपरस्तदंतर्गतेश्वरलक्षणः।अन्योध्यात्मरूपस्तत्रितय
५ परंचेदंभाष्यं।तत्राग्निमीळइत्याद्यामृचंव्याचक्षाणोग्निशब्दंतावन्निर्वक्ति॥अग्निशब्दोयमिति॥अयमादितःप्रयुक्तोग्निशब्दोग्नेस्तदंत
गतिहरेश्च।बाह्ययज्ञेध्यात्मंचहरेर्ज्ञानयज्ञेमुख्यामुख्यत्वाभ्यां॥अग्रएवअशेषपूज्येभ्यःपूर्वमेव।अभिपूज्यतांअभिपूज्यत्वंआह
तिसंबंधः।अग्रशब्दात्सप्तमीसमर्थादभिपूज्यइत्यर्थेतद्धितोनिप्रत्ययःरशब्दलोपश्च॥तथाग्र्यत्वं।अग्रेभवत्वं।उत्तमत्वं।एवंवृद्धि

अग्निशब्दोयमग्रएवाभिपूज्यतां॥अग्र्यत्वमग्रनेतृत्वमक्तिमंगागनेतृतां॥आह॥७॥

वार्थेनिप्रत्यययोरशब्दलोपश्च।तथाअग्रनेतृत्वंप्रथमप्रवर्तकत्वं।अग्रशब्दोपपदान्नयतेःकर्तरिडिप्रत्ययः॥उपपदरशब्दलोपश्च।त
थाअक्तिमत्वं।धातुनिर्देशोयं।तेनतदर्थस्यकर्तृत्वंलक्ष्यते॥बहिःसंहर्तृत्वंहविषोतृत्वंच॥अध्यात्मंविषयाणां।अक्तेःकर्तरिनि
प्रत्ययोदस्यचगः॥तथांगनेतृतां।अध्यात्मंविश्वोरग्नेश्चसर्वशरीराणांप्रवर्तकत्वं।अंगशब्दोपपदान्नयतेःडिप्रत्ययउपपादा
नुस्वाराकारलोपश्च।तथांगनेतृतां।स्वतोनगच्छतिनप्रवर्तकत्वं।पूर्ववन्निरुक्तिः।नेतृशब्दस्तृन्नंतः।तेनद्वितीयासमासः॥ ॥ व्यास

एवमनुमानेनपरमेश्वरस्यसर्ववेदार्थत्वंप्रसाध्यश्रुत्यापिसाधयति॥इत्याहेति॥इति।एतमुक्तमर्थं॥परमेश्वरस्यसर्ववेदार्थत्वं।ता
वाएताःसर्वाऋचःसर्वेवेदाःसर्वेघोषाएकैवव्याहृतिःप्राणएवेति॥पराउत्कृष्टा।विस्पष्टवादिनीतियावत्॥उपनिषदप्याह॥अ
नेनैवमंत्राणांकर्मणिविनियुक्तानामविवक्षितार्थत्वेनाव्याख्येयत्वमित्यपिनिरस्तं॥नन्वेवंसर्ववेदानांभगवत्परत्वाद्यस्यकस्यापिवे

इत्याहोपनिषत्परा॥तावाएताऋचइतिविशेषेणाप्यृगर्थतां॥७॥

दस्यव्याख्यानादिकंतस्यतुष्टिकरमितिकिमृचामेवव्याख्यानेनेत्यतआह॥विशेषेणेति॥सर्ववेदाइत्युक्त्वापृचइतिपुनरभिध
नेतेनजानीमोविशेषेणाप्यृगर्थतामीश्वरस्याहोपनिषदिति॥अन्यथातद्वैयर्थ्यात्।अतस्तद्व्याख्यानादिकंतस्यातितुष्टिक
रमितितदेवक्रियतइति॥तावाएताऋचइतीत्यस्याहृत्यायोजनीयं॥ ॥

तत्कथमित्यत आह॥ ॥अग्निसंस्थेनेति॥ ॥ऋत्विक्॥ परमेश्वरः सन्निहितइत्येव॥ होतरि पुनरग्निसंस्थेनैवरूपेणेतिविशेषेणहोतृसंस्थ
ता॥अनयाचविवक्षयानपुनरुक्तिरिति॥एतदपिकुतइत्यत आह॥यतइति॥होतृ देवतासत्यतोग्निर्होतरिस्थितोतोग्निसंस्थेनरूपेणहोतृ
संस्थतायुक्तेत्यर्थः॥एवंविधोहोतृशब्दव्याख्याया योव्याख्याति॥यतइति॥अतोहोतोच्यतइतिशेषः॥तथाचश्रुतिः॥तथेयं वाक् सोयमग्निः
सहोतेति॥ऋग्वेदिनोहिहोतृत्वापेक्षिणोहोतृसंस्थस्यास्यस्तुतिर्युक्ता। अध्यात्मंहोतृशब्दंव्याख्याति॥इंद्रियेति॥यद्यस्मादिंद्रियाख्येष्वग्नि

अग्निसंस्थेनरूपेणयतोग्निर्होतिदेवता॥इंद्रियाग्निषुचार्थानांयथोताहोतृनामकः॥रतिधारकोत्तमत्वात्तुरत्नधातमईरितः॥ ७॥

षु अर्थानांतत्तदिंद्रियविषयलक्षणानांहविषांहोताहरिः॥तस्माद्धहोतृनामकः॥भोगप्रदस्यस्तुतिः कर्तव्यैव॥परमस्फुरत्वाच्चतस्य
स्तुतिः स्फुरवार्थिनांयुक्तेतिरत्नधातमशब्दंव्याख्याति॥रतीति॥रमतेर्भावेक्तप्रत्ययः॥रत्नंरतिंधत्तइतिरत्नधाः॥आतोमनिन्क्वनिब्वनि
पश्चेतिविच॥अतिशयेनरत्नधारत्नधातमः॥नवाएकेनाक्षरेयाछंदांसिविप्नतीतिवचनान्नछंदोभंगः॥यद्यपिरत्नशब्दोधननाम
सुपठितस्तथापितदपरित्यागेन अर्थांतरस्योक्तत्वान्नदोषः॥१॥७॥

व्यास

आचारोप्यस्तीत्युच्यते॥अग्निः पूर्वेभिः॥सपूर्वैः॥सः अग्निः॥तद्गतोध्यात्मगतोहरिश्च॥पूर्वेभिः पूर्वैः॥बहुलंछंदसीतिभिसऐस्त्वाभावः॥अतीतैः॥नू
तनैः नूतनशब्दोअधपर्यायः॥ततसायंचिरमितितनः॥वर्तमानैः॥उतशब्दादेष्यैः॥आगामिभिरपि॥छंदः सद्देत्सत्रयोगविभागेनाकारोयादेशो
व्याख्यायतेएवंसर्वैः॥ऋषिभिः॥विज्ञानादिविशिष्टज्ञानवत्वादृषिनामकैर्देवादिभिः॥ईड्यः स्तुत्यः॥ऋषज्ञानइत्यस्मात्किप्रत्ययः॥स्तुनश्चसोग्नि

अग्निः पूर्वेभिरृषिभिरीड्यो नूतनैरुत॥सदेवाँएहवक्षति॥२॥ ॥अग्निः॥पूर्वेभिः॥ऋषिभिः॥ईड्यः॥नूतनैः॥उत॥
सः॥देवान्॥आ॥इह॥वक्षति॥ ॥२॥ ॥सपूर्वैर्नूतनैरेष्यैर्विज्ञानादृषिनामकैः॥ईड्योदेवादिभिः सर्वैः सचदेवानिहानयेत्॥२॥

रिहतेषांबाह्ययज्ञेदेवान्॥हविर्भुजः॥आवक्षति॥आनयेत्॥ज्ञानयज्ञेचेंद्रियदेवान्॥तेषांविशेषेयोपकारिणः करोति॥दीर्घादटिसमानपा
इत्यतोदेवानितिनकारस्यरुः॥आइत्युपसर्गस्यव्यवहिताश्चेतिव्यवहितेनवक्षतीत्याख्यातेनसंबंधः॥एवमुत्तरत्रापिज्ञातव्यं॥वक्षतीति
वहतेर्लेट्॥वहतिनयस्योः प्रापणार्थत्वाल्लेटश्च॥लिङर्थेलेडितिलिङर्थत्वादानयेदित्युक्तं॥ ॥२॥ ॥श्रीहरयेनमः॥ ॥७॥

२

किंच॥अग्निना रयिं॥तेनैव।स्तोता॥स्तुतेनैवाग्निना तत्प्रसादेन॥रयिं बाह्यधनादिकं॥अध्यात्मं विद्यात्मकं वित्तं॥अश्नवत् प्राप्नोति॥अनेन
पोषमेवेत्येवशब्दस्याग्निनेत्यनेनापि संबंधः सूचितः॥अश्नवदिति अश्नोतेर्व्याप्तिकर्मणो लडर्थे व्यत्ययो बहुलमिति पंचमो लकारः॥
परस्मैपदं च॥स बहुलं लेटीति बहुलग्रहणात् सिब्भावः॥प्राप्तस्य तस्य वित्तस्य॥दिवेदिवे।दिवसे दिवसे नित्यमिति यावत्॥पोषमेव पु

अग्निना रयिमश्नवत्पोषमेव दिवेदिवे।यशसं वीरवत्तमं॥ ॥३॥ ॥अग्निना॥रयिं॥अश्नवत्॥पोषं॥एव॥दिवेदिवे॥यशसं॥
वीरवत्ऽतमं॥३॥तेनैव रयिमाप्नोति वित्तं विद्याधनात्मकं॥दिवसे दिवसे नित्यं पुष्टिमेवनहीनतां॥यशश्च पुत्रसंयुक्तं वीर्यवत्तममेव वा॥३॥

ष्टिमेव प्राप्नोति॥न पुनर्लोके व क्षीणताम् इत्येवशब्दव्यावर्त्यकथनं॥किंच यशसं॥यशश्च॥आप्नोति॥यशः शब्दादमोऽलुक्॥पुल्लिंगता छांदसं॥कथं
भूतं॥वीरवत्तमं॥वीरः पुत्रः सोऽस्मिन्निति वीरवत्॥अतिशयेन वीरवदिति वीरवत्तमं॥पुत्रेण सम्यग्युक्तं॥सामर्थ्यात् सम्यक्ता पुत्रविशेषणं॥इदं बा
ह्ये॥अध्यात्मं वीरशब्दो भावप्रधानः॥वीरवत्तमं यशः॥वीर्यवत्तमं ज्ञानं स्फुरणं च अश्नवत्॥एवेति बाह्यपुष्ट्याद्यावृत्तौ॥वेतिव्यवस्थितो विकल्पः॥३॥ व्यास

२

अग्निमीळ इत्यस्य व्याख्यानं॥तं स्तौमीति॥ईड स्तुतौ॥ऋक्ष्क डस्य ळः प्रायेण॥कुतः पुरोहितं॥पुरः पूर्वमेव अनादित एव हितं॥प्रतिसंबध्यपेक्षया
मशेषस्येति शेषोक्तिः॥चतुर्थ्यर्थे बहुलं छंदसीति चतुर्थ्यर्थे षष्ठी॥प्रभुमित्युदात्तस्वरार्थः॥उदात्तस्योच्चतार्थतेति हि वक्ष्यति॥हितो हि स्तुत्यो भव
ति॥किंच यज्ञस्य॥ऋत्विजं॥जातावेकवचनं॥यज्ञानां बाह्यानां आध्यात्मिकानां च ऋत्विजं॥तत्कथमित्यत आह॥ऋत्विङ्नियामकत्वेनेति॥तदधीन

ॐ अग्निमीळे पुरोहितं यज्ञस्य देवमृत्विजं॥होतारं रत्नधातमं॥१॥ ॥अग्निं॥ईळे॥पुरःऽहितं॥
यज्ञस्य।देवं।ऋत्विजं॥होतारं।रत्नऽधातमं॥१॥तं स्तौम्यशेषस्य पूर्वमेव हितं प्रभुं॥ऋत्विङ्नियामकत्वे
न यज्ञानामृत्विजं सदा॥द्योतनाद्विजयाकांत्या स्तुत्यस्याव्यवहृतेरपि॥गत्या रत्याच देवाख्यं होतृसंस्थं विशि

त्वादर्थवदिति सूत्रात्॥अध्यात्ममिंद्रियदेवा ऋत्विजः॥कर्मांगत्वाद्दृचां ऋत्विग्वाक्यतया चात्मनो नियामकस्य ज्ञानप्रदस्य स्तुतिरुपपन्नैव॥किंच देवं
द्योतनाद्विजयात्कांत्या व्यवहृतेरपि गत्या रत्या चेति॥द्योतनादेः कर्तृत्वात्॥तथा स्तुत्यास्तुतिकर्मत्वात्॥देवं॥दीव्यते द्योतनाद्यर्थे कर्तरि पचाद्यच्॥
स्तुत्यर्थात्कर्मणि घञ्॥गुणाधिको हि स्तुत्यः स्यात्॥किंच होतारं॥होतृसंस्थं॥ऋत्विजमित्युक्तत्वाद्धोतारमिति पुनरुक्तिरित्यत आह॥विशेषत इति॥छ

अग्निर्होता ॥ सोखिलः ॥ सः अग्निः ॥ होतेतिपूर्ववत् ॥ कवित्वे ॥ अखिलग्रहणे ॥ सर्वज्ञानाय । क्रतुः प्रज्ञायस्यासौकविक्रतुः ॥ सद्भिर्गुणैस्ततः संततः ॥ अखिलं विश्वंयमयतिचेतिसत्यः । सद्भावेसाधुभावेचेतिवचनात्सच्छब्दो गुणवाची ॥ तदुपपदात्तनोतेरौणादिकप्रत्ययोडिच्च ॥ यमेश्चडः ॥ सच्चासोयश्चेतिससः ॥ यमयतीतिस्वार्थेणिच् ॥ चित्रमद्भुतं ॥ श्रवः कीर्तिर्यस्यासौचित्रश्रवाः । अतिशयेनचित्रश्रवाः चित्रश्रवस्तमः ॥ अग्र्यकी

अग्निर्होताकविक्रतुः सत्यश्चित्रश्रवस्तमः ॥ देवोदेवेभिरागमत् ॥ ॥५॥ ॥अग्निः ॥ होता ॥ कविक्रतुः ॥ सत्यः ॥ चित्रश्रवःतमः ॥ देवः ॥
देवेभिः । आगमत् ॥५॥ १ ॥ सोखिलग्रहणप्रज्ञः सद्गुणैः संततोखिलं ॥ यमयत्यग्र्यकीर्तिश्नामुत्तमो विबुधैः सह ॥ आगंताखिलभक्तानांपूजास्वी
कारतत्परः ॥ ॥५॥ ॥१॥ ॥

तीनांपुरुषाणांमध्ये ॥ उत्तमइतियावत् ॥ देवः पूर्ववत् ॥ एवंभूतो भगवान् । देवेभिः विबुधैर्यज्ञभुग्भिरिंद्रियाभिमानिभिश्च । देवैः सहैव ॥ यज्ञस्थानं भक्तशरीरं चप्रति ॥ आगमत् ॥ सार्वकालिको लुङ् लेड्वा ॥ आगंताभवति ॥ तत्रविशेषतः सन्निहितोभवति ॥ अखिलभक्तानांबाह्याध्यात्मिकपूजास्वीकारतत्परः सन्निति विशेषः ॥ आगमनेनहविराद्याशाया किंतुभक्तप्रियमतयेतिशेषः ॥ ५ ॥ ॥१॥ ॥श्रीरामायनमः॥

यदंगदाशुषे । ॥ यजमानाय ॥ प्रियसंबोधने अंगशब्दः ॥ योग्यतयासत्संबंधः ॥ अंगसखिप्रिय ॥ अंगिरसः अंगानांरस ॥ सर्वशरीराणांप्रेरक ॥ पूर्वपदस्यैकारः उत्तरपदस्यलोपश्चछांदसः ॥ तथाचश्रुतिः ॥ एतमु वांगिरसं मन्यंतेंगानां यद्रसस्तेनेति ॥ अग्नेत्वं ॥ दाशुषे यजमानाय ॥ दाश्दाने । दाश्वान्साह्वान्मीढ्वांश्चेतिनिपातनात् ॥ भद्रंकरिष्यसीतियत् ॥ सनर्थेलृट् ॥ भविष्यद्विषयत्वेनसाम्यात्कर्तुमिच्छसीतियत् ॥ तदिच्छारूपमीहनं ॥ तवेत् तवैवसत्यं ॥ अवितथं ॥ अस्माइदंदास्यामीतिछसिचेद्दास्यस्येव ॥ यत्करिष्यसितत्सत्यमितियथाछितयोजनायांनस्कृतिःस्यात् । यजमा

यदंगदाशुषेत्वमग्नेभद्रंकरिष्यसि ॥ तवेत्तत्सत्यमंगिरः ॥ १ ॥ ॥ यत् । अंग । दाशुषे । त्वं । अग्ने । भद्रं । करिष्यसि । तव । इत् । तत् । सत्यं । अंगिरः ॥ ६ ॥
यजमानाययद्भद्रं कर्तुमिच्छसिसखिप्रिय । सत्त्वेष्टयैवकर्माणिवर्तयित्वातदीहनं ॥ तवैवसत्यमंगानांरसयद्वन्हिगोहरिः ॥ अंगिराश्चंगिरः पुत्रोप्यतोग्निरभव

नः पूजयति । स्वयंफलं ददातीत्येवंविनिमयमात्रंनभवतीतिभावेनोक्तं ॥ त्वच्चेष्टयेति ॥ वर्तयित्वायजमानेनेतिशेषः । पूजादिकर्मणांप्रवर्तकोपित्वमेवेति । अनेनांगिरः शब्दप्रयोगस्यप्रयोजनमुक्तंभवति ॥ अंगानांरसेसध्यात्मं व्याख्यानंबहिर्विश्वेयोजयति ॥ यदिति ॥ यद्यस्माधरिर्वन्हिगतः तस्मादंगिराः । वन्हिगतत्वेपिकथमंगिराइत्यतआह ॥ अंगिरः पुत्रइति ॥ यतः कारणात्कस्मिंश्चित्काले अग्निः अंगिरसः पुत्रः अंगिराः पुत्रोयस्येतिवाऽभवत् । तेनांगिराः । कार्यकारणशब्दानांसांकर्यदर्शनात् । तद्भतोपितदधीनत्वादर्थवदित्यंगिराइति ॥ अनेनाग्नावपिव्याख्यातं ॥ १ ॥

१ उपत्वा॥अत्रवस्तरितिपदंतावदनूद्यव्याचष्टे॥वस्तर्दिनंइति॥अहरित्यर्थः॥हेअग्नेधिया॥बुध्यादिभिर्गुणैः॥अल्पाअपीतिशेषः॥वयं॥दिवेदिवे॥
दिवसेदिवसे॥तत्रापिदोषावस्तः॥अहोरात्रंसदेतियावत्॥नमोभरंतः॥अध्यात्मंमनसा॥बहिःकर्मवाग्भ्यां॥त्वन्नमस्कारंसंभराः॥नमनंनमः॥सं
बिभ्रतीतिसंभराः॥तवनमनंसंबिभ्राणाःसंतः॥उच्चगुणंईश्वरमपित्वांत्वां॥उपेमसि॥उपयाम॥इदंतोमसीतिइदंतु॥शरणंव्रजेम॥बुध्येतिपद

उपत्वाग्नेदिवेदिवेदोषावस्तर्धियावयं॥नमोभरंतएमसि॥२॥ उप॥त्वा॥अग्ने॥दिवेऽदिवे॥दो
षावस्तः॥धिया॥वयं॥नमः॥भरंतः॥आ॥इ॥मसि॥ वस्तर्दिनमहोरात्रमभीष्टप्राणिनांसदा॥
अल्पाअपिवयंबुध्यात्वामुच्चगुणमीश्वरं॥उपयाममनःकर्मवाग्भिस्त्वन्नमस्संभराः॥ २॥

सामर्थ्यादल्पाअपीतिशेषवक्तव्येस्तत्तित्वासिध्यर्थंईश्वरत्वादुच्चगुणंत्वामपीत्यपिशेषोवक्तव्योभवति॥धिया॥उपेमसीत्य
पिसंभवेगुणाधिक्यत्वाभायशेषोक्तिः॥महागुणस्यशरणप्राप्तोसाधनहीनश्चेत्कथंशरणंयायादित्यतःप्राक्तंनमंगेत्सेत
दत्राप्याकृष्यव्याख्यातंप्राणिनामभीष्टेति॥केवलंभक्त्यतिवशाच्छरणमुपयामेति॥ २॥ श्रीलक्ष्मीवेंकटेशायमंगलं॥ व्यास

१

एवंस्तुतेरूपपत्तिंतत्वेनोक्तास्तोति॥ ॥अग्नेयं॥यंयज्ञं॥हेअग्ने॥त्वं॥यं॥ अध्वरं॥यज्ञमितिपृथग्वचनादध्वनिरतं॥समंताडडइतिड४॥विधिमा
र्गस्थितंविहितप्रकारेणानुष्ठितं॥यज्ञंबाह्यं॥आंतरंच॥विश्वतःविश्वस्मिन्काले॥सदेव॥परितोभवतीतिपरिभूः॥असि॥भवसि॥परितोभ्र

अग्नेयंयज्ञमध्वरंविश्वतःपरिभूरसि॥सइद्देवेषुगच्छति॥ ॥४॥ ॥अग्ने॥यं॥यज्ञं॥अध्वरं॥विश्वतः॥परिभूः॥असि॥
सः॥इत्॥देवेषु॥गच्छति॥ ॥४॥ ॥यंयज्ञंपरितोभ्रत्वारक्षसित्वंसदैवच॥विधिमार्गस्थितंदेवान्सएवाप्नोत्यसंशयं॥४

त्वारक्षसीतियावत्॥ततोन्यत्रापिद्रष्टव्यातइतिपरियोगेद्वितीया॥सइत्॥सएवयज्ञःदेवेषु॥गच्छति॥देवानाप्नोति॥असंशयमि
त्येवशब्दतात्पर्यं॥परमेश्वररक्षितमेवयज्ञंदेवाःस्वीकुर्वंति॥तादृशाज्ञानस्यदेवादिकंविषयीभवतीतिहि॥ ॥४॥ ॥५॥

सनः॥पितेव॥हेअग्ने॥सएवमस्माभिः शरणंप्राप्तः त्वंच।त्वंतुनोस्माकं॥पितेवपुत्राणां॥सूपायनः॥अधिकरणेल्युट्॥सूपाश्रयः।शोभनोपा
१० श्रयःभव॥पितेवेसनेनैवसूनवइतिलब्धेपिपुनःसूनवइत्युक्तस्यतात्पर्यमाह॥यद्वदिति॥नकेवलंपितेवपुत्रमात्राणांकिंतुऔरससून
वे॥छंदसिषष्ठ्यर्थेचतुर्थीवक्तव्या॥औरससूनोर्यद्वत्तथेति॥अतएवभिन्नवाक्यतासूचनायइवेत्युक्तोपुनर्यद्वदित्युक्तं॥किंचत्वं।नः॥

सनः पितेवसूनवेग्नेसूपायनोभव॥सचस्वानःस्वस्तये॥ ॥४॥२॥ ॥सः॥नः॥पिता॥इव॥सूनवे॥अग्ने॥सुऽउपा
यनः॥भव॥सचस्व॥नः॥स्वस्तये॥ ॥४॥२॥ ॥पितेवनः॥सूपाश्रयोभवत्वंचयद्वदौरससूनवे॥रक्षसंततसौख्यायसम्यक्स
त्वायवासदा॥४॥२॥

अस्मान्।स्वस्तये।संततसौख्याय॥सदासम्यक्सत्वायवा।सचस्व।रक्षस्व॥रक्ष॥यथारक्षणेनसंततसौख्यादिकंभवतितथारक्षेति।स्व
स्तयइतिस्वपूर्वकंसत्तावाचिविभक्तिप्रतिरूपकमव्ययं॥सत्तावाचिनांसौख्यवाचित्वमपिसद्भाववाचिनःशब्दाःसर्वेसुखवाचिन
इतिप्रमाणसिद्धं॥तस्मादुभययथाव्याख्यातं॥अनेकार्थत्वाद्धातूनांसचितिरिहरक्षायांवर्तते॥सेवायाअयोगात्॥४॥ ॥२॥ व्यास १०

एवंव्याख्यातस्यास्यसूक्तस्यव्याकरिष्यमाणानांचज्ञानादिकमृष्यादिज्ञानेसत्येवसफलंनान्यथा॥योहवाअविदितार्षेयछंदोदैवतब्राह्मणेन
मंत्रेणयजतियाजयतिवाध्यापयतिवास्थाणुंवर्छतिगर्तेवापद्यतेप्रमीयतइतिश्रुतेः।तस्मादृषिछंदोदेवतादिकंज्ञापयन्नृषिंतावद्दा
ह॥मुनिस्त्विति॥विशेषतश्चवेदानांभगवानृषिः॥पौरुषेयवाक्यानामुपसंतरमेवदर्शनंवेदानांतुसदेतिविशेषः॥कुतएतदित्यत
आह॥योब्रह्माणमिति॥योब्रह्माणंविदधातिपूर्वंयोवैवेदांश्चप्रहिणोतितस्माइतिश्रुतिस्तावद्ब्रह्मणोपिभगवान्वेदादिक

मुनिस्त्वसर्वविद्यानांभगवान्पुरुषोत्तमः॥विशेषतश्चवेदानांयोब्रह्माणमितिश्रुतिः॥ऋग्वेदादिकमस्यैवश्वसितंप्राहचापरा॥ ॥ वेदा

मुपदिदेशेतिप्राह॥तेनज्ञायतेसएवसर्वविद्यानामृषिरिति॥नह्येवंभूतस्मान्योध्यापकःसंभवति॥श्रुतिःप्राहेतिवक्ष्यमाणेना
न्वयः॥अस्यमहतोभूतस्यनिश्वसितमेवैतदृग्वेदोयजुर्वेदःसामवेदोथर्वांगिरसइतिहासःपुराणंविद्याउपनिषदःश्लोकाःसूत्रा
ण्यनुव्याख्यानानिव्याख्यानान्यस्यैवैतानिनिश्वसितानीत्यपराश्रुतिः॥ऋग्वेदादिकमस्यविष्णोरेवनिश्वसितंप्राह॥तेनपितस्य
र्षित्वंज्ञायते।निश्वसितमितिहिनिश्वसितमिवअनायासेनादिकालेतेनोच्चरितमित्यर्थः॥ ॥

११ ऋ वाचोबभूवुरुशतीः श्वसतोंनस्त इति भागवतेपिस्फुटमेतदर्थंप्रतिपादयद्वचोस्ति ॥ उशतीः उशत्यः प्रकाशमानाः ॥ ब्रह्मांडपुराणेपि ॥ तथा एतदर्थस्याभि
धायकंपरंवचोस्ति । तत्पठति ॥ हयग्रीवादिति ॥ रुद्रशेषविपा अपि ब्रह्मणो जगृहुः ॥ तेभ्यः शक्राद्याः ॥ तेभ्यः दक्षाद्याः ॥ तेभ्यः सनकाद्याः मनवश्च । तेचविश्व

वाचोबभूवुरुशतीर्हयग्रीवादिति स्फुटं ॥ वाचो भागवतेप्यस्ति ब्रह्मांडेपि तथापरं ॥ हयग्रीवादिमा विद्याः श्वसितत्वे
ननिःसृताः ॥ ब्रह्मणा स्वीकृता ताश्च रुद्रशेषविपा अपि ॥ दक्षाद्याः सनकाद्याश्च शक्राद्या मनवस्तथा ॥ जगृहुस्तेन
विश्वस्मिंश्चक्रुर्व्याप्तास्ततोखिलाः ॥ उक्तं पद्मपुराणेन्वक पिलो भगवानजः ॥ प्रोवाच ब्रह्मणे विद्यां हृदिस्थो बाद
रायणः ॥ ॐकारपूर्विका विद्याः प्रेरयत्यखिलेष्वपि ॥ सदैव ब्रह्मणे पूर्वमिति सात्वतसंहिता ॥ ७॥

स्मिंश्चक्रुः । जगत्स्वपदिदिशुः ॥ ततस्तेषामुपदेशात् । अखिला जगति व्याप्ताश्च । हृदिस्थ इत्यादि सात्वतासंहितावाक्यं । सदैव । अखिलेषु प्रेरयति । तं
त्रापि पूर्वं ब्रह्मणे ददाविति । यो ब्रह्माणमिति श्रुतौ वेदपदं सर्वविद्यापरमिति ज्ञापयितुं द्वितीयश्रुत्युदाहरणं ॥ उभयत्रापि विष्णोरन्तीतेः पुराणाद्युदा व्यास

११

राजंतं ॥ देदीप्यमानं ॥ अध्वराणां । यज्ञानां ॥ राजंतं । राजानं ॥ राजतेरौणादिकोङ्गः ॥ शोंतः ॥ बाह्याध्यात्मिकाध्वरेशं ॥ ऋतस्यगोपां । यथार्थज्ञानगोपं
यथार्थज्ञानस्य गोप्तारं ॥ ऋचि तुपेराकारः ॥ भाष्येपचाद्यच् ॥ स्वेदमे ॥ स्वसद्मनि ॥ स्वर्गादौ हृदये च ॥ दीदिविं । देदीप्यमानं ॥ दीप्यतेर्यङ्लुगंता

राजंतमध्वराणांगोपामृतस्य दीदिविं ॥ वर्धमानं स्वेदमे ॥ ॥३॥ ॥राजंतं ॥ अध्व
राणाम् ॥ गोपाम् ॥ ऋतस्य ॥ दीदिविं ॥ वर्धमानं ॥ स्वेदमे ॥ ॥३॥ ॥ देदीप्यमानं
स्वेसद्मन्यध्वरेशं सदा हृधं ॥ यथार्थज्ञानगोपं त्वामुपेमसि ॥ ॥२॥ ॥ ५॥

दिकारप्रत्ययः । अभ्यासस्य चेकारः ॥ वर्धमानं ॥ सार्वकालिकः शानच् ॥ ताच्छील्यार्थश्चानश्च ॥ सदा हृधं । सदाहृष्टं । सदापूर्णं । इत्युपक्ष
पाः कः क्विबा ॥ उपेमसीति पूर्वेणान्वयः ॥ ॥३॥ ॥

मद्येवं ब्रह्मादीनां स्वयं प्रतिभात विद्यात्वादृषित्वं तर्हि तेषामध्ययनं किमर्थमित्यत आह ॥ यत्स्वयमिति ॥ स्वयंभुवादिर्यत्स्वयं प्रतिभातस्य वेदादेः
गुरोर्वचः ॥ गुरोः सकाशादध्ययनं ॥ निगदरूपं ॥ तदस्माभिर्दृष्टोयं वेदो वा यत्किंचिदिति संशयनिरासेन वेद एवायमिति निश्चयार्थं भवति ॥
विरिंचस्य तत्संशयाभावात्केवलं धर्मकारणं भवति ॥ महतो हि धर्मस्य कारणं परमेश्वरादध्ययनं ॥ एवं पौरुषेयापौरुषेयभेदेन स
र्वविद्यानामृषिभेदमुक्त्वा वेदे ध्ववांतरभेदेन तमाह ॥ ऋचामिति ॥ ततः स्वयंभुवानंतरं ॥ ऋगादीनामथर्वांतानां शाखाद्या एकर्षि

यत्स्वयं प्रतिभातस्य संशयार्थं गुरोर्वचः ॥ स्वयंभुवादिर्विरिंचस्य केवलं धर्मकारणं ॥ ऋचामृषिस्ततः शक्रो यजुषां सूर्य एव च ॥ सो
मः साम्नां तृतीयास्ते प्रतिपत्तार ईरिताः ॥ अथर्वांगिरसामग्निरेकर्षिश्चाप्यथर्वणां ॥ इत्युक्ताः समुदायस्य संत्यन्येपि पृथक्पृथक् ॥ ७ ॥

पर्यंता ऋषयः ॥ कुतस्तेषामृषित्वे स्वयंभुवाद्यानंतर्यं ॥ यतस्ते तृतीयाः प्रतिपत्तार ईरिताः ॥ एवं शक्रोक्ते ऋचामेवेत्यादिना संबध्यते ॥ यस्त
र्थः ॥ अथर्वांगिरसां अथर्वणामंगिरसां च ॥ द्विभागस्याप्यथर्ववेदस्येत्यर्थः ॥ तदिदानीं अथर्वणामेकर्षिरप्यृषिर्भवति ॥ ततोऽप्यर्वाक्त
तनानृषीन्पूर्वोक्तानुवादेनाह ॥ इत्युक्ता इति ॥ इत्येते प्रायेणाविभक्तविद्यासमुदायानामृषयस्त्रिविधा उक्ताः ॥ एतेभ्योन्येचतु
र्थश्च ॥ पृथक्पृथक् ॥ एकैकस्मिन्नप्यृगादिसमुदाये अवांतरभेदानां शाखानामृषयः संतीति चशास्त्रांतराज्ज्ञातव्याः ॥ ८ ॥ ॥ व्यास ३२

एवं चतुर्विधानृषीनुक्त्वा तेषां स्मरणं विधातुं तस्य फलमाह ॥ एतज्ज्ञानादिति ॥ एतदिशाद्यानां त्रिविधानां परामर्शः ॥ दृष्टस्य किंचिदित्यर्थः ॥ चतुर्णामपि प्रतिपत्तॄ
णां ज्ञानात्फलं लभेत् ॥ तच्चैहिकमिति योजना ॥ ऋगाद्यवांतरभेदानां सूक्तादीनां च तुर्था ऋषयः संतीत्युक्तं ॥ तत्र चैकैकस्यापि सूक्तादेरेकैक एवेति नियमो नास्ती
त्याह ॥ तेचेति ॥ एतच्च सर्वं विस्मर्तव्यमित्याशंक्य ज्ञापनार्थमुक्तं ॥ बहव एवेति संबंधः ॥ ननु यदि विष्णवादयः सर्वविद्यानामृषयस्तर्हि तद्वाक्यं तानां तांस्यात् ॥ यस्य वा सत्कृष
रिति ॥ ततश्च त्रिष्वादिसंदुपदेषु बद्धः ॥ अवैनं राजावरुणः ससृज्यात् ॥ स नो हिरण्यरथं दंसनावानित्याद्ययुक्तं स्यात् ॥ न हि विष्णवादीनां बंधो मोक्षप्रार्थनमिंद्राइत्थ

एतज्ज्ञानाद्दृष्टस्य फलस्यापि फलं भवेत् ॥ इष्टानां च चतुर्थानां ज्ञानादैहिकं भवेत् ॥ ते चैकस्यापि बहवः स्युः सूक्तस्यर्च एव
वा ॥ तस्यां तस्यामवस्थायां तत्तत्प्राप्तिविशेषतः ॥ तेषां वाक्यस्वरूपेण प्रार्थनादिषु पश्यति ॥ विष्णुर्ब्रह्मा स्वयंभुर्वा ॥

प्राप्तिरित्यादिकं युज्यते अत आह ॥ तस्यामिति ॥ प्रार्थनादिषु वाक्येषु विवक्षितेषु सत्सु विष्णु स्तानि वाक्यानि तस्यां बंधाद्यवस्थायां तत्त इत्थादि फलप्राप्तिविशेष
वत्तया तेषां शुनःशेपादीनां वाक्यतया ॥ यूपेहं बद्धोस्मि बध्यं मां वरुणो मोचयतु ॥ इंद्रप्रसादादहं रथं प्राप्तोस्मीत्यादिकं शुनःशेपोतीतकल्पे प्राबोचत् ॥ पश्यती
ति वा विष्णुः पश्यति न तु स्ववाक्यतयेत्यर्थः ॥ एवं ब्रह्मा स्वयंभुर्न्यो वा मुनयः स्वायोग्यार्थस्य प्रतिपादकानि वाक्यानि येषामृष्यंतराणां योग्यानि तद्वाक्य
तया पश्यतीति न कश्चिद्विरोधः ॥ एवमन्यधर्मा अप्यृषय उत्तमर्षियोग्यार्थाभिधायीनि तद्वाक्यतया पश्यंतीत्यपि द्रष्टव्यं ॥ यथाहं रुद्राय धनुरातनोमीत्यादि ॥ ८

यथैकमपि वाक्यमनेकर्षिदृष्टं न तथा तदर्थोपि साधारण इत्याह ॥ तत्तदिति ॥ यस्य यस्य ऋषेर्यो यो भगवन्महिमाद्यभिधायि वाक्यार्थो दर्शनयोग्यस्तत्तदर्थाभि
धायितयैव तत्तद्वाक्यमसावसोपश्यतीत्यर्थः ॥ एवं पुरुषान् ऋषीनुक्त्वा स्त्रिय आह ॥ सर्वेति ॥ वेदशब्देन सर्वविद्या उच्यंते ॥ न हि स्वाभिमतमपश्यंत्यभिमानिनी
१२ भवति ॥ भारतीत्येति संबंधः ॥ ननु वायुः कस्मादृषित्वेन नोक्त इत्यत आह ॥ व्याख्यात इति ॥ ब्रह्मणा ऋषितया व्याख्याते न निमित्तेन मरुदपि सर्वविद्या
नामृषिर्व्याख्यात एव ॥ तयोः समगुणत्वात् ॥ एवं रुद्रादिष्वपि द्रष्टव्यं ॥ यदि लक्ष्म्यादीनामखिलविद्याद्रष्टृत्वमस्ति कथं तर्हि विष्ण्वादीनामेव ऋषित्वं

तत्तद्योग्यार्थभेदतः ॥ सर्ववेदाभिमानित्वाच्छ्रीर्ब्रह्माणी च भारती ॥ द्रष्ट्र्यश्च सर्वविद्यानां व्याख्यातो ब्रह्मणा मरुत् ॥ स्वभर्त्रनंतरं द्रष्ट्र्यस्तन्नोदि
ताहि ऋक् ॥ ताः स्तुवंति हरिं नित्यं विद्याभिस्ते च सर्वशः ॥ छंदस्त्वेन मुनित्वेन तासां स्मृतिरुदीरिता ॥ स्मर्तव्यास्ते च सर्वेपि मुनित्वेन पृथक् पृथक् ॥ ७ ॥

शास्त्रे ऋषिरुच्यते न तासामित्यत आह स्वेति ॥ यस्मात्ताः स्वभर्त्रनंतरं द्रष्ट्र्य इति भर्तुर्नित्यैव सिध्यति ॥ यतः प्रायो भार्या भर्तृसमानधर्मिणी भवति ॥ तत्तस्मा
दृषित्वे वर्तमाने ऽप्यर्थसिद्धत्वात् ॥ तेभ्यः भर्तृभ्यः ॥ हि ऋक् ॥ पृथक् ऋषित्वेन । ताः नोदिता इति ॥ तासां तेषां च ऋषित्वे व्यापारमाह ॥ ता इति ॥ संत्वेतास्ते च ऋष
यस्तत्तत्श्च किमित्यत आह ॥ मुनित्वेनेति ॥ उदीरिता कर्तव्यतया तात्पर्यद्योतनाय स्मर्तव्यास्ते चेति पृथग्योगः ॥ दृष्टादृष्टफलहेतुत्वादित्यर्थः ॥
एवमृषीनुक्त्वा तत्स्मरणं च विधाय छंदसामपि स्मरणं विधत्ते ॥ छंदस्त्वेन च तासां स्मृतिरुदीरितेति ॥ ॥ ७ ॥ व्यास

१२

एवं परमेश्वरः सर्वविद्यानामृषिरित्युक्त्वा पाद्यब्रह्मापि तथेत्याह ॥ सकृदिति ॥ यस्मात्तेन परमेश्वरेणानंतशक्तित्वाद्युगपत्समुदीरितं ॥ अखिलं
विद्याजातं ॥ आदिकाले सकृन्निगदमात्रेण । ब्रह्मणा । अंतर्गतस्य व्यासस्य प्रसादात् ॥ नित्यशक्तित इति तत्प्रसादाय तनित्यशक्त्या । गृहीतं ॥
तस्मादेव सर्वविद्यानां प्रथमप्रतिपत्त्वाद्ब्रह्माप्यखिलस्य विद्याजातस्य मुनिर्भवति ॥ एवं सर्वविद्यानामृषिमुक्त्वा तद्द्रष्टृणामृष्यंतरमाह ॥ रू
पर्य इति ॥ मुनिरिति संबंधः ॥ एतौ द्वितीयप्रतिपत्तृत्वाद्ब्रह्मणोनंतरं प्रतिपत्तृत्वान्मुनित्वविषये द्वितीयौ संप्रकीर्तितौ ॥ ननु परमेश्वरः स्वय

सकृन्निगदमात्रेण गृहीतं ब्रह्मणाखिलं ॥ अंतर्गतस्य व्यासस्य प्रसादान्नित्यशक्तितः ॥ तेन चानंतशक्तित्वाद्युगप
त्समुदीरितं ॥ प्रथमप्रतिपत्तृत्वान्मुनिर्ब्रह्माखिलस्य च ॥ रूपर्यो खिलवेदानां पंचरात्रस्य नागराट् ॥ द्वितीयप्रतिपत्तृ
त्वात्मुनित्वे संप्रकीर्तितौ ॥ यः पश्यति स्वयं वाक्यं स ऋषिस्तस्य कीर्तितः ॥ अर्वाकु द्वादशाहत्तेरधीत्यापृषिरेवसः ॥

मेव सर्वविद्यानां प्रतिपत्तेर्मुनिर्भवतु ॥ अधीतविद्यास्तु ब्रह्माद्याः कथमृषय इत्याशंकापरिहारार्थमृषित्वं तावदाह ॥ य इति ॥ यथा यः स्वयमध्य
यनेन विनैव यद्वाक्यं पश्यति स तस्य वाक्यस्य ऋषिः प्रकीर्तितः ॥ एवं यो द्वादशाहत्तेरर्वागधीत्यापि प्रतिपद्यते सोप्यृषिरेव ॥ तथाभूतो हि स्व
यं प्रतिभात विद्याकल्प एव भवेत् ॥ नह्यन्य एतावन्मात्रेणाध्ययनेन सर्वविद्याः प्रतिपत्तुं शक्नोति ॥ ब्रह्माद्यास्तु भगवत्प्रसादात्स्वयं प्रतिभाता
खिलविद्याः सकृदधीतवंत इत्यृषित्वं तेषामुपपन्नमिति भावः ॥ ॥ ७ ॥

१४ ननुताःसर्वागायत्र्यादिनियुज्यते॥एकानेकतादात्म्यानुपपत्तेरित्यतआह॥बह्वीनामिति॥नात्रदेवतानांछंदसांचैक्यमुच्यतेकिंतुतत्तदभिमानि
तथातत्तन्नामवत्वं।तत्रबह्वीनांदेवतानामेकछंदोभिमानित्वेनैकनामवत्वंतुनविरुध्यतइत्यर्थः॥एतेनाग्नेर्गायत्र्याअभवदित्यादिकमपिव्याख्यातंभ
वति॥गायत्रीबृहत्यौलक्ष्म्याद्यादेवताउक्ताःनतावदेत्याह॥सर्वेति॥तिसृणांश्रीर्ब्रह्माणीचभारतीस्कृतानां॥यथाक्रमंसर्वछंदोभिमानितावास्ति॥पू
र्वोक्तिंतुविशेषविवक्षयेतिभावः॥एवमृषिछंदसीउक्त्वादेवतामाह॥देवतेति॥स्वयंसाक्षात्।प्रभुरितिदेवतात्वोपपादनार्थं।तत्रभगवति॥प्रसिद्धाःपुरुषसू

बह्वीनामेकमानेनत्वेकंनामचमुच्यते॥सर्वाभिमानिताचैवतिसृणांतुयथाक्रमं॥देवतासर्वविद्यानांस्वयंनारायणःप्रभुः॥ऋतेचतत्र
प्रसिद्धाश्चदेवताश्रीस्तथात्रच॥ऋतेप्रसिद्धाब्रह्मैवततस्तेनक्रमेणच॥पूर्वप्रसिद्धवर्जंतुराक्रांतादेवतामताः॥ब्रह्मवायूगिरोवी
इंद्रोषरुद्राश्चतत्स्त्रियः॥चाक्रकामोकामपुत्रमनुदक्षांगिरःस्कृताः॥तेइच्छवीरतिःसूर्यसोमधर्मादितत्स्त्रियः॥७॥

क्रादिविद्याःऋतेवर्जयित्वा।अन्यासांविद्यानांश्रीश्चदेवता॥तथात्रचश्रीदेव्यांप्रसिद्धाविद्याअंभ्रणीसूक्ताद्याःऋतेअन्यासांब्रह्मैवदेवता॥त
तःपरंचतेनवक्ष्यमाणतारतम्यक्रमेणैव॥पूर्वप्रसिद्धवर्जं॥पूर्वस्यांदेवतायांप्रसिद्धाविद्यावर्जयित्वा।अन्यासांविद्यानांतुराक्रांतादेवतामताःको
सौदेवतानांक्रमइत्यतआह॥ब्रह्मेति॥गिरोसरस्वतीभारती॥अंगिरःस्कृतोबृहस्पतिः॥तद्वत्कामपुत्रवत्॥तत्स्त्रियःमन्वादिस्त्रियः॥७॥ व्यास १४

प्रवाहमरुतः॥प्रवाहाद्याः॥मारुताः॥तदन्ये क्रमाक्रमयुक्तावर्तते॥इत्यनेनक्रमेणोदिताइमाःविद्यानांदेवताज्ञेयाः॥अत्रप्रायोद्वंद्वगृहीता
नांसाम्यंज्ञातव्यं॥प्रधानमरुत्स्कप्रवहःसूर्यादिभ्यःपूर्वंपठितव्यः॥सूर्यसोमधर्मादितत्स्त्रियइत्यत्रसूर्यसोमधर्माणांमनुपत्न्याश्चसा
म्यं॥आदिपदगृहीतानांप्रसूत्यादिस्त्रीणांतदवरत्वं॥वारिपतिधर्माद्यनंतरः॥यद्येताःसर्वाअपिविद्यादेवताःकथंतर्हित्राक्रांतादेवता

प्रधानमरुतोवारिपतिरग्निश्चमारुतः॥निऋतिःस्त्रियश्चसूर्यादेरश्विनावितरेतथा॥अनंतकोटि
शतकदश्चार्धांघ्रंत्रातःक्रमात्॥ज्ञानभक्तिबलैश्वर्यपूर्वाखिलगुणैरपि॥मुक्तावपिक्रमोह्येषदेव
ताउदिताइमाः॥इंद्रावराविज्ञेषेणलिंगेनेवपृथक्पृथक्॥देवतास्तत्रतत्रस्फुरेषएवपरोविधिः॥७॥

इत्युक्तं।तत्राह॥इंद्रावराइति॥यद्यप्येताःसर्वाअपिविद्यादेवताभवंत्येव।तथापिपृथक्पृथक्॥विशेषेण्याव्यावर्तकेनलिंगेन॥श्रुतिलिं
गादिनाज्ञापकेनैव॥इंद्रावराः॥तत्रतत्रविद्यासु॥देवताःस्फुः॥नतुश्रुतिलिंगाद्यभावे॥इंद्रपर्यंतास्तुश्रुत्याद्यभावेपिपूर्वप्रसिद्धवर्जं
देवतास्फुरितिराक्रांतादेवताइत्युक्तं।अन्येतुब्रुवते।तत्तच्छ्रुत्यादिनैवविष्ण्वाद्यादेवतास्युरिति॥तदसदितिभावेनाह॥एषएवेति॥विधिप्रकारः
देवतास्थितिः॥प्रामाणिकत्वादितिशेषः॥७॥

विष्ण्वादीनां विद्यादेवतात्वं विवृणोति ॥ वेदादीति ॥ वेदादि वर्णपर्यंतैः शब्दैः समासव्यासयोगेन पृथग्वा व्याप्त इति ॥ समस्तवेदे नैका ॥ तत्प्रभेदैस्ताव
१५ त्सूक्तदवांतरभेदैरपि तावत्स इत्येवं प्रकारेण वा व्याप्त इत्यर्थः ॥ तदपि यथायोगं । योगवृत्तिमनतिक्रम्य यथान्यायं । तत्तन्मूर्तेर्नां ज्ञापकन्या
येचानतिक्रम्य ज्ञातव्यं ॥ अन्यासामपि लक्ष्म्यादिदेवतानां मूर्तयो विद्यारूपा व्याप्ता ज्ञातव्याः ॥ एवं ऋषिछंदोदेवतास्वरूपमुक्त्वा प्रमाणमा

वेदादिवर्णपर्यंतैर्मूर्तयः केशवस्य तु ॥ समासव्यासयोगेन वा व्याप्तास्तैः पृथक् ॥ यथायोगं यथान्यायं र्म
अन्यासामपि मूर्तयः ॥ ऋक्संहितायास्त्वाध्यायेनिरुक्ते व्यासनिर्मिते ॥ प्रवृत्ते चैतदखिलमुक्तं हि
प्रभुणा स्वयं ॥ सर्ववेदाश्चनामानि ता बाष्टताश्च ऋचस्तथा ॥ इदं मित्रं वरुणमित्याद्यत्र परा प्रमा ॥ ७ ॥

ह ॥ ऋक्संहितायामिति ॥ यास्कनिर्मितप्रसिद्धनिरुक्तव्यावर्तये व्यासनिर्मित इति ॥ विष्णोः सर्वविद्याप्रतिपाद्यत्वे श्रुतीरपि पठति ॥ सर्व
इति ॥ सर्वे वेदा यत्पदमामनंति ॥ नामानि सर्वाणि यमाविशंति ॥ ताबाष्टताः सर्वा ऋचः ॥ इंद्रं मित्रं वरुणमग्निमाहुः ॥ इत्यादीन्स विभक्ति
कान्निर्देशः सुपां सुलुगिति स्मरणात् । इत्यादिका ॥ अत्र विष्णोः सर्वविद्यावेद्यत्वे ॥ परा ऋक्संहितादिभ्यो न्या च प्रमास्ति ॥ ॥ ७ ॥ व्यास

१५

तत्र कस्य छंदसः का देवतेत्यत आह ॥ गायत्रीति ॥ ताः सर्वाः प्रागुक्ताः श्रीर्ब्रह्माणी च भारती ॥ तथा गरुडश्च गायत्री बृहतीच ब्रह्माण्यनुष्टुप् ॥ इंद्राणी
त्रिष्टुप् ॥ न केवलं गायत्री लक्ष्म्याद्याः किंतु स्वाहा च गायत्री स्मर्यते ॥ वारुणी जगती ॥ वक्ष्यमाणदेवतांतरसमुच्चयार्थश्चशब्दः ॥ एवंशब्दो न्यूनोक्तिनिरासा
र्थः ॥ न केवलं ब्रह्माण्यनुष्टुप् अपितु रोहिणीत्तथा रोहिणी चानुष्टुप् ॥ एवं तारा बृहती ॥ शचीपंक्तिश्च ॥ सौरी उष्णिक् ॥ सर्वदेवस्त्रियश्च जगत्सोमता ॥ मि
त्रावरुणयोर्भार्ये विराडिति च कीर्तिते ॥ सर्वदेव्यः सर्वाण्यति छंदांसि प्रकीर्तिताः ॥ आसां च विराडिति नाम ॥ एवं छंदसां देवता उक्त्वा तदवांतरभे

गायत्री बृहती चैव ताः सर्वा गरुडस्तथा ॥ ब्रह्माण्यनुष्टुबिंद्राणी त्रिष्टुप् स्वाहेति चोच्यते ॥ गायजगती चैव वारुणी रोहिणी तथा ॥ अ श्री
नुष्टुप् बृहती चैव तारा पंक्तिः शची तथा ॥ उष्णिक् सौरी जगत्सश्च सर्वदेव्यस्त्रियो मताः ॥ विराण्मित्रावरुणयोर्भार्ये इति च कीर्तिते ॥
अतिछंदांसि सर्वाणि सर्वदेव्यः प्रकीर्तिताः ॥ विराडिति च नामासीतास्ता ऊनाधिकेष्वपि ॥ निचृद्भुरिग्विराट् स्वराट्संज्ञा प्रस्तारेत्यादिनाम च ॥ छं

दानाह ॥ तास्ता इति ॥ यस्य छंदसो यावंतो वर्णास्ततऊनत्वे ऽधिकत्वे विन्यासभेदेनावांतरभेदेषु च ता स्तास्तत्तच्छंदोदेवता एव देवता इत्यर्थः ॥ तत्र नाम
विशेषमाह ॥ निचृदिति ॥ एकेनाक्षरेण न्यूना निचृत् ॥ एकेनाधिका भूरिक् ॥ एवं न्यूनत्वादिना गायत्री निचृदादिसंज्ञा भवति ॥ तथोष्णिगाद्या अपीत्यर्थः ॥
प्रस्तारेत्यादिकं च नाम विन्यासभेदेनावांतरभेदानामित्यर्थः ॥ प्रस्तारेति पंक्तिविशेषः ॥ एतच्च छंदोग्रंथादवगंतव्यं ॥ ॥ ७ ॥

नन्वेवंभावोब्रह्मरुद्रादीनामपिविद्यतइतिनेत्याह॥जातेति॥प्रजापतेनत्वदेतान्यन्योविश्वाजातानिपरिताबभूव॥हेप्रजापते॥भवान्॥जातानि
९६ उत्पत्तिमंतिविश्वानिसर्ववस्तूनिपरिभूतवान्॥तत्स्वामित्वेनवर्तते॥त्वदन्यस्तुनपरिताबभूवेतिश्रुतिर्ब्रह्मणोप्यैश्वर्यस्यमर्यादामाह॥जातेति
विशेषणेनाजातविष्णुपरिभवस्यप्रतिषिद्धत्वात्॥सर्वनेवरेमे॥सोबिभेत्॥एकोनारायणआसीन्नब्रह्मेत्यादिनासुखभयादिदोषान न

जातापरिबभूवेतिमर्यादांब्रह्मणोपिहि॥नैवरेमेऽबिभेद्ब्रह्माना
सीदित्यादिकानपि॥दोषान्हेचतानेवनमिनंतीतिपूर्वकान्॥ छ॥

पिब्रह्मणःश्रुतिराह॥अतोनतस्यभर्गवत्साम्यं॥नापिरुद्रस्य॥नयस्येंद्रोवरुणोनमित्रोव्रतमर्यमानमिनंतिरुद्रः॥नारातयस्तमिदंस्वस्तिहुवेदेवंस
वितारंनमोभिरित्यादिकाश्रुतिः॥यस्यविष्णोर्व्रतंकर्म॥इंद्रोनमिनातिनजानाति॥गतिकर्मसुपाठात्॥नवरुणोनमित्रोनार्यमानरुद्रः॥अरातयो
देसाअपिनमिनंति॥तंविश्वस्यप्रसवितारंदेवंनमोभिर्नमनैरिदं॥ऐहिकामुष्मिकस्वस्तिसुखमुद्दिश्यहुवेह्वयामि॥इत्यज्ञानपूर्वकांस्तान्दोषानेवरुद्रे
चाह॥ छ॥ व्यास
९६

तदेतत्स्पष्टयति॥यमिति॥यंकामयेतंतमुग्रंकृणोमि॥अहंरुद्रायधनुरातनोमि॥अस्यदेवस्यमीळ्हुषः॥माश्चिश्वदेवाअपिगुर्नतंनः॥
प्रांछिश्वदेवाः अभिवयसाभूदित्यादिश्रुतौपराधीनपदत्वाद्याद्यावहवोदोषारुद्रस्येरिताः॥अहंसुवेपितरमस्यमूर्धन्ममयोनिरप्स्वा
अंतःसमुद्रे॥ततोवितिष्ठेभुवनानुविश्वोतामूद्यांवर्ष्मणोपस्पृशामि॥परोदिवापरएनापृथिव्यैतावतीमहिनासंबभूवेतिश्रीदेव्याअपि

यंकामयेतंतमुग्रंरुद्रायधनुरित्यपि॥अस्यदेवस्यमाश्चिश्वदेवाअपिगुरित्यपि॥प्रांछिश्वदेवानिसाद्याद्दोषा
बहवईरिताः॥ततोवितिष्ठेयोनिःसएतावत्यहमित्यपि॥अन्याश्रयत्वंदेव्याश्चकथितंबहुशोपिहि॥ ॥छ॥

भगवदाश्रयत्वंबहुशःकथितं॥ततोनसापितत्समेति॥यस्मादहंततःपरमेश्वरात्॥वितिष्ठे॥उत्थिता॥उत्पन्ना॥तस्मादसौमम
योनिरित्यर्थः॥वर्ष्मणाबलेनशरीरेणच॥उपस्पृशामि॥वशीकरोमि॥व्याप्नोमिच॥संबभूवततइतिवर्तते॥ ॥छ॥ श्री॥

एवं विष्णोः सर्वोत्तमत्वं लक्ष्म्यादीनां ततोऽवरत्वं च प्रसाध्य देव्याः ब्रह्माद्युत्तमत्वं च प्रसाधयति ॥ तदाश्रयत्वमिति ॥ लक्ष्म्याद्याश्रयत्वं ॥ अ
१७ न्येषां ब्रह्मादीनामपि ॥ तत्रैव ॥ अहं रुद्रेभिरित्यादि सूक्त एव ॥ निश्चयात् ॥ स्फुटं ॥ अथ ब्रह्मणो रुद्राद्युत्तमत्वं च साधयति ॥ ब्रह्मैवेति ॥ हिरण्य

तदाश्रयत्वमन्येषामपि तत्रैव निश्चयात् ॥ ब्रह्मैवाग्र इति ह्युक्ता रुद्रादीनां ततो जनिः ॥
उक्ता जातानि विश्वानि स पर्यभवदित्यपि ॥ यस्य छायामृतं मृत्युरिति चादरतोऽब्रवीत् ॥

गर्भः समवर्तताग्र इत्येतस्मिन् सूक्ते ब्रह्मणः प्रथमोत्पत्तिर्यस्य देवा इत्यादिना रुद्रादीनां ततो जनिरुक्ता ॥ विश्वा जातानि परि ता बभूवेति जन्मवतां रुद्रादी- ७
नां तद्वशत्वं चोक्तं यस्य छायामृतं यस्य मृत्युरिति पालकानां संहारकाणां चेंद्रादीनां रुद्रादीनां च तत्प्रतिबिंबत्वं चाब्रवीत् ॥ पुनर्यस्येति पृथग्योगादादरत इत्युक्तं ॥ व्यास

१७

विष्णोः सर्वोत्तमत्वानुमुख्यतः सर्वविद्यावेद्यत्वं लक्ष्म्यादीनामप्याधिक्यतारतम्यानुसारेण विद्यावेद्यत्वमित्युक्तं ॥ तदाधिक्यतारतम्यं प्रमाणैः सा
धयन् विष्णोः सर्वोत्तमत्वं तावदादौ साधयति ॥ देवतेति ॥ अस्मात् संसारात् ॥ अत्र च अस्यामपि न्यायरत्नावल्यां ॥ सर्वज्ञाः ॥ विष्णोः सर्वोत्तमत्वादिकं सर्वं द्रष्टव्यं ॥

देवतातारतम्यं च सर्वोत्कृष्टं च केशवं ॥ ज्ञात्वैव मुच्यते ह्यस्मान्नान्यथा तु कथंचन ॥ इंति पैंगिश्रुतिश्चाह ह्यस्य
तेजश्च सर्वज्ञाः ॥ न ते महित्वमित्यादि नैश्वरानेव केवलान् ॥ गुणान् विष्णोः श्रुतिर्ह्याह नैव दोषान् कथंचन ॥ ॥७॥

अत्रेति प्राचुर्यभिप्रायं ॥ यद्वा ॥ अत्र च प्रसिद्धास्वपि श्रुतिष्विसर्थः ॥ तत्कथमित्यत आह ॥ न तद्वति ॥ परो मात्रयात न्वा ह्वधान् न ते महित्वमन्वश्नुवंती
त्यादिना श्रुतिः सर्वोत्तमत्वादीन् गुणान् विष्णोराह ॥ तांश्च केवलान् ऐश्वरानेव विद्धि मात्रनिष्ठान् आह ॥ दोषांस्तु क्वापि श्रुतिस्तस्य न वक्ति ॥ अतो
नन्यसाधारणात्स्वतमानंतगुणवत्त्वान्निर्दोषत्वाच्च तस्य सर्वोत्तमत्वं ज्ञायते ॥ ॥७॥ ॥

इंद्रपरिवारत्वाद्वायोरुत्तमत्वं विप्रतिपन्नमिति तत्साधयते ॥ नारायणइति ॥ अदितिर्लक्ष्मीः ॥ विभुरिंद्रः ॥ शतांशावायुतोवरा इत्यनेन वायो
र्लक्ष्म्यादितोऽधिकावरत्वं सूचयति ॥ शक्राद्वायोराधिक्यमिति संबंधः ॥ तमेताः सप्ताक्षितय उपतिष्ठंते यच्छुक्रं तेनेंद्र इति श्रुतिः ॥ अयं
तएमितत्वा पुरस्ताद्विश्वेदेवा अभिमामंतिपश्चात् ॥ मदामह्यं दीधरोभागमिंद्रान्मयाकृणवो वीर्याणीसेतत्पूर्वं अन्या अपिश्रुतयः शक्रा

नारायणोऽदितिर्वायुर्वाणीरुद्र उमाविभुः ॥ इतरे चक्रमाधीनाः शतांशावायुतोवराः ॥ इति बर्क
श्रुतिश्चाह शक्रात्सत्याक्षितिश्रुतिः ॥ अयं तएमितत्वेति पूर्वा अन्याश्च पिस्फुटं ॥ वायोराधिक्यमप्या
हुरिंद्रंसोमं दुतादरानं ॥ स्वयंरुद्र इमिमान्यं च देवानेकोमहात्मनः ॥ सृजत्यतिमहान्प्राणइति चाहतुरश्रुतिः ॥४॥

दपिवायोराधिक्यमाहुः ॥ कस्यांचिद्युद्धवेलायां इंद्रं प्रतिवायोर्वचनं ॥ हे इंद्र ॥ अयमहं ॥ तत्वा आयुधादि निरपेक्षेण पुरस्तादेमियुद्ध सर्वथा ॥६॥
भूमिं प्रेक्ष्यामि ॥ त्वदादयः सर्वे देवाः ॥ मां पश्चात्मदनंतरं ॥ अभियंतु ॥ त्वं तु यदा यस्मात् मया मत्प्रेरणयैव ॥ मह्यं भागं । दीधरः मद्
द्रोनयज्ञभागमधारयः मामप्रज यद्यतिय यावत् । आदि तत्तस्मादेव ॥ आवां सह । वीर्याणि कृणुवः कुर्व इति । तुरश्रुतिश्च वायोः शक्रादाधिक्यमाहेति ग्रास

१८

विष्णोरुपेंद्ररूपेणेंद्रानुचरत्वादाधिक्यं विप्रतिपन्नं इति तदुपपादयति ॥ विहिसोतोरिति ॥ यज्ञेषु सोमसवनाय ऋत्विजोव्यसृक्षत विसृष्टाः ॥ प्रेरिता
अभूवन् ॥ तेच । इंद्रं देवं । द्योतनादिगुणैः परिपूर्णं ॥ नामंसत हि ॥ कीदृग्विधेषु यज्ञेषु ॥ यत्रामदद्वृषाकपिरर्यः पुष्टेषु मत्सखा विश्वस्मादिंद्र उत्तरः ॥
यत्र पुष्टेषु पुष्टानां पूर्णानामपि । आर्यः स्वामी मत्सखा । वृषाकपिः । विष्णुः अमदत् । स्फुरद्वी समवर्ततेति ॥ विष्णोरितिपंचमी ॥ ७ ॥ एतयोः श्रुत्योर्विष्णुत्वा
चकस्यस्फुटस्याभावाद्ध्रुसंतरमुदाहरति । वेधाइति ॥ आयोविवायसचथायदेव्यइंद्रायविष्णुः सुकृतेसुकृत्तरः ॥ वेधा अजिन्वत्रिषधस्थ आर्य

विहिसोतोरसृक्षत नेंद्रं देवमममंसत ॥ न यस्येंद्र इति ह्याह विष्णोरिंद्रस्य हीनतां ॥ ७ ॥
वेधा अजिन्वदित्यादि वचनं विष्णुनामतः ॥ आनंदश्रुतिरप्यस्य जीवतामेव दर्शयेत् ॥ ७ ॥

मृतस्य भागे यजमानमाभजदिति विष्णुनामतः ॥ विष्णुनाम्नोपेतं वचनमेतमेवार्थमाह ॥ यः सुकृते साधुकारिणे । इंद्राय । देव्यः । तस्यपरमं दैवतं सुकृत्त
रः । अतिशयेन साधुकारी । वेधाः विशेषेणधारयमाण भक्ता । त्रिषधस्थः श्वेतद्वीपादि स्थानत्रयस्थो विष्णुः । आर्यं वामनावतारे ज्यायांसं । यजमा
नं । अश्वमेधयाजिनं ॥ स च यथा सुखाव स्थितस्ते आविवायस्तदृतवान् । अजिन्वत । अजनयत ॥ ऋतस्य यज्ञस्य । भागे वा भजदिति । तेनेशातमिं
द्रस्यानंदाः स एको बृहस्पतेरानंदा इति जीवानंद तारतम्याभिधात्री श्रुतिः ॥ अस्यइंद्रस्य ॥ जीवतामेव दर्शयति । तेनत्वेश्वरादवरत्वं ज्ञायते ॥ ७ ॥

सूर्यस्य केश्चित्सर्वोत्तमत्वमंगीकृतमितितत्प्रतियोगिकमिंद्रवायुविष्णूनामाधिक्यं साधयति ॥ आहेति ॥ श्रुतिवक्ष्यमाणेन संबंधः ॥ इंद्रा
१९ तामाधिक्यं ॥ यः सूर्यं यउषसं जजान यो अपां नेता स जनास इंद्र इति श्रुतिरिंद्रस्य सूर्यादाधिक्यमाह ॥ ज जानजनयामास ॥ एषवै

आह सूर्यादपींद्रस्य वायोर्विष्णोरपीश्वरतां ॥ यः सूर्यं यउषसं म्रियंते पंचदेवताः ॥
चक्षुषा द्यौश्चादित्यश्चक्षोः सूर्यो ऽजायत ॥ यमादित्यो न वेदेति सर्वा श्रुतिरथापराः ॥

ब्रह्मयो मं पवते तमेताः पंचदेवताः परिम्रियंते विद्युद्वृष्टिश्चंद्रमा आदित्योग्निरिति श्रुतिर्वायोः सूर्यादाधिक्यमाह ॥ तं परिम्रियंत इतितेन
संहियंत इत्यर्थः ॥ चक्षुषा सृष्टो द्यौश्चादित्यश्चेत्येतत्सर्वा श्रुतिः विष्णोः सूर्यादाधिक्यमाह ॥ अथापराश्च श्रुतयः एतदर्थं त्रयेसंति ॥ ७ ॥ व्यास

१९

अथवा वायोर्विष्णोश्च प्रवरत्वं रुद्राद्युत्तमत्वं च साधयति ॥ अनंतादिति ॥ ईशानाल्लक्ष्मीः ॥ इति वायोर्विष्णोश्च प्रवरत्वादिकं ॥ तमेताः सप्ताक्षितय उपतिष्ठंते
तद्यथा इमा अक्षन्लोहिन्योराजय स्ताभिरेनं रुद्रोन्वायत्तः ॥ वायुरस्मा उपामंथत् किनष्टि स्मा कुनन्नाम ॥ केशी विषस्य पात्रेण यद्रुद्रेणापिबत्सह ॥
पूषण्वते मरुत्वते विश्वदेवाय वायव इत्याद्या अप्यपराः प्रमाः ॥ अत्र ॥ वायो रुद्राद्युत्तमत्वे संति ॥ तमक्षिणि स्थितं वायुमेता वक्ष्यमाणा अक्षितयो

अनंताद्वरेण्यानात्स्याः प्राणस्ततश्च वाक् ॥ तस्या रुद्र उमा तस्मादिंद्रस्तस्यास्ततोपरे ॥ सोपर्णश्रुतिरित्या
हसप्ताक्षितय इत्यपि ॥ वायुरस्मा उपामंथद्विश्वदेवाय वायवे ॥ विश्वैर्देवैः स इत्याद्याः प्रमा अत्र परा अपि ॥ ७ ॥

ऽक्षीणगुणाः सप्तदेवताः उपतिष्ठंते ॥ तत्तत्र ॥ अक्षन् अक्षिणि ॥ लोहिताराजयोरेखास्ताभिस्तदधिष्ठानेनैनं वायुं रुद्रोन्वायत्तः तदधीनोकु
र्सितान्नमयीतिकुनन्नामा ॥ केशी प्रशस्तकेशवान् ॥ वायुः ॥ यत् यदा ॥ रुद्रेण सह पात्रेण विषस्य विषमपिबत् ॥ तदा तस्मै रुद्राय ॥ तदनुजि
घृक्षयेति यावत् ॥ तद्विषं ॥ उपामंथत् ॥ तस्यैव विवरं यं पिनष्टि स्मेति ॥ विश्वेषां रुद्रादीनां देवो विश्वदेवः ॥ ॥७॥ रुद्राद्युत्तमभारतीश्राय ॥

अतइत्यक्तभयत्रोक्तमेवहेतुंदर्शयति ॥ निर्दोषत्वेनैवेति ॥ यतोविष्णोः सर्वथानिर्दोषताप्रमाणैर्निर्णीतायतश्चमध्यगतेष्वपिलक्ष्म्यादिषुक्रमान्नि
 र्दोषतानिर्णीता ॥ अतइत्यस्यार्थः ॥ निर्दोषत्वस्यपलक्षणं ॥ गुणइतिरपीतिद्रष्टव्यं ॥ यदिदोषाद्यभिधायिवाक्यमन्यपरंतर्हिविष्ण्वादीनांसर्ववेदा

निर्दोषितैवविष्णोरुक्तक्रमान्मध्यगतेष्वपि ॥ त्रयोर्थाः सर्ववेदेषु दशार्थाः सर्वभारते ॥ विष्णोः सहस्रनामापि

निरंतरशतार्थकं ॥ इतिस्कांदवचोयस्मादर्थभेदव्यपेक्षया ॥ निर्दोषित्वंहरेर्वक्तिदोषमन्येष्वपिक्रमात् ॥

द्विवेद्यतानस्यादित्यतआह ॥ त्रयइति ॥ निरंतरशतार्थकमित्यनेनसर्वाण्यपिपदानिशतार्थानीत्युच्यते ॥ इतिस्कांदवचोयस्मादिदस्यानेका
र्थतांवक्ति ॥ तस्मादर्थभेदव्यपेक्षया ॥ योजनाविशेषव्यपेक्षया ॥ एकमेववाक्यंहरेर्निर्दोषत्वंअन्येषुवेदेषुक्रमाद्दोषमपीत्यंगीकारादद्दोषइत्यर्थः ६

ननुदोषाभिधायिवाक्यंदेवतांतरेपिकस्मादन्यथायोज्यतेदोषाभिधानेकारणाभावादित्यतआह ॥ तारतम्यस्येति ॥ यदितद्देवतासुविद्यमानाः
दोषाःनैवोच्येरन् । नतर्हितासांतारतम्यंविज्ञायेत ॥ तज्ज्ञानंचावश्यमपेक्षितंमुमुक्षोः ॥ देवतातारतम्यंचेत्युक्तत्वात् ॥ अतस्तज्ज्ञापनायदोषवच

तारतम्यस्यविज्ञप्त्यैवचोदोषस्यचार्थवत् ॥ गुणाः श्रुताइतिह्याहगुणैकनियतिंहरो ॥
निर्दोषगुणपूर्णश्चेतिविष्णुरेकोनचापरः ॥ अपूर्णादोषरहिताश्रायैकातद्वत्रौवचे ॥
अदोषःप्रायशोब्रह्मादोषवंतःक्रमात्परे ॥ इतिमान्यश्रुतिश्चाहभेदोर्थानांततोमतः ॥

नमपिसार्थकमित्यर्थः ॥ अतोदोषवचोयत्रेत्युक्तंदृढमति ॥ गुणाइति ॥ श्राहश्रुतिः ॥ मायाश्रीः ॥ निर्दोषेत्यादिकामान्यश्रुतिश्चाह ॥ गुणैकनिय ॥७॥
तिंहरो ॥ अन्येषुचमथास्वरूपमितिशेषः ॥ ततः परमेश्वरस्यनिर्दोषगुणपूर्णत्वादन्येषांचोक्तस्वरूपतात् । योजनाभेदेनार्थानांभेदः ॥ वैलक्षण्यमेवमतमि

यथायोगमितियोगवृत्त्या विष्णोर्वेदवेद्यमुक्तं॥तन्नोपपद्यते॥सर्वज्ञइत्यादौसर्वादिशब्दानामन्यपरत्वेहरेःसर्ववेदाभिधेयत्वस्याव्याघातात्॥
२३ भगवत्परत्वेयोगायोगादिसाशंकास्मिन्नैवपरिहरति॥रूढिमिति॥सर्वादिशब्दानांरूढिमेववृत्तिंतावत्समाश्रित्यानिखिलादीनर्थान्विभज्य
विस्पष्टंज्ञात्वा॥अनंतरंयथाक्रमंमंत्राद्यनुन्यासेनादिक्रमानतिक्रमेण॥विष्णोःसर्वज्ञादिशब्दानांयोगार्थमानयेत्॥पश्चात्सर्वादिशब्दा

रूढिमेवसमाश्रित्यविभज्यार्थान्यथाक्रमं॥विदोषगुणपूर्त्यर्थंविष्णौयोगार्थमानयेत्॥ नि
पश्चादेवयथायोगमितरेष्वपिसन्नयेत्॥ऋग्वेदसंहितायांचप्रभुणैवंसमीरितं॥छ॥

नामपिरवादिशब्दानांरूढार्थाननुपादायसखःसर्वइत्यादियोगमानयेत्॥किमनेनरूढयैवपरमेश्वरस्यवेदवेद्यतास्त्वित्यतउक्तं॥विदोषेति॥भ
गवतोदोषाभावगुणपूर्तिज्ञापनार्थंहिवेदानांप्रवृत्तिः॥नचरूढिमात्रेणसम्यक्तद्भवति॥अतोयोगएवाश्रयणीयः॥यथायोगंतत्तद्देवता
योग्यतानतिक्रमेण॥छ॥ व्यास
२३

ताःपठति॥विष्णोरिति॥एतासांश्रुतीनांप्रत्येकंसर्वार्थप्रतिपादकत्वात्पृथक्कारणं॥विष्णोर्वातइतितुरश्रुतिः॥विष्णोःप्राणइतिसौपर्णश्रुतिः॥
पैंगिश्रुतिरपिईदृशी॥एवंपाठः॥अतोनपृथक्पठ्यतइत्यर्थः॥लयोप्येवमतिक्रममात्रमतिदिश्यते॥सचवैपरीत्येनेतिहृदयं॥वि
ष्णुःसर्वाधिकोनिर्णीतइत्युपलक्षणं॥लक्ष्म्यादयोपियथास्वरूपंनिर्णीताः॥ननुनैवदोषानित्ययुक्तं॥जनितोतविष्णोरित्यादौदो

विष्णोर्वातोअजनिष्टवातादिंद्रस्ततोरविः॥सोमश्चेतिलयोप्येवंस्वैःपूर्वैर्गुणाधिकाः॥विष्णोःप्राणोअजनिष्ट
प्राणादिंद्रोऽरविर्बुधः॥लयोप्येतादृशस्तेषांपूर्वपूर्वैर्गुणाधिकः॥तुरश्रुतिश्चसौपर्णीपैंगिश्रुतिरपीदृशी॥
अतःसर्वाधिकोविष्णुर्निर्णीतःश्रुतिसंचयात्॥अतोदोषवचोयत्रतद्वाक्यमपरंवदेत्॥ ॥छ॥ श्री॥

षप्रतीतेरित्यतआह॥अतइति॥यत्रवाक्ये॥विष्णोर्दोषवचः दोषाभिधानंप्रतीयतेतद्वाक्यं॥अपरं॥संभावितदोषवत्त्वेतरंवदे
दितियोज्यं॥ननुलक्ष्म्यादीनांयत्स्वरूपमुक्तंतदयुक्तं॥क्वचिदधिकदोषश्रवणादित्यतआह॥अतइति॥दोषवचः अधिकदोषा
भिधानं॥अत्रोभयत्रापिदोषाभिधानग्रहणंगुणान्यतायाअप्युपलक्षणं॥ ॥छ॥

२२ कृत्वीदेवैर्नि किल्बिषंहत्वी दस्यूनितिपूर्ववर्णविकाराश्चप्रोक्ताधिक्यविवक्षयाप्रयुक्ताज्ञातव्याः॥यतस्तृतीयोतिशयइतिसूत्रं अर्थातिशये विवक्षितेलक्षणप्राप्तस्यवर्णस्यस्थानेतृतीयोवर्णोभवतीति॥अदृतिब्रह्मेतिविश्लिष्ट।असंहिततयानिर्दिष्टंशब्दरूपं विश्लिष्टार्थेतस्यार्थस्यविश्लिष्टत्वेव्याहृत्तत्वेव्याख्यातव्यं॥सलिलमा।इदंआसीदितिवक्तव्ये।अदृत्याघूनं चार्थस्योनत्वेविवक्षितेज्ञेयं॥कृणिद्विकरण

कृत्वीहत्वीतिपूर्वाश्चतृतीयोतिशयेयतः॥विश्लिष्टार्थेचविश्लिष्टमनार्थेचोनमिष्यते॥व्यत्ययोभेदकरणस्वातंत्र्येषुसमीरितः॥अभेदोहरिरूपाणांगुणानांचक्रियासुच॥तस्यैवावयवानांचभेदःश्रीब्रह्मपूर्वकैः॥मुक्तैरपिजडैर्भेदःकैमुत्यादेवदृश्यते॥ऋग्वेदसंहितायांचप्रोक्तमेतत्समस्तशः॥७॥

लिंगपुरुषकालहलचूस्वरकृत्तधितसमाससन्यङादिव्यत्ययस्त्वभेदकरणस्वातंत्र्येषुव्याख्यातव्यः॥तत्राभेदःकुत्रव्याख्यातव्यइत्यतआह॥अभेदइति॥हरिणापरस्परेच॥परिगणनस्यनिमित्तमाह॥भेदइति॥एतत्सर्वंशपा णीत्यारभ्योक्तं॥समस्तशःसमस्तं॥नकेवलंउदाहृतसूत्रसिद्धमितिचार्थः॥ ॥७॥ व्यास २२

अभेदस्यस्थलांतरंदर्शयति॥अभेदइति॥चिंतादिभिर्गुणैः।भेदसहितोऽभेदः।ज्ञानादिभिरभेदः॥नेवंमुक्तानामितितुशब्दः॥जडादीनामपिपटादीनां॥अवयविनां।अंशतः।एकैकांशेन॥स्थानविशेषरहितांशसमुदायेनच॥उभयंभेदाभेदौ॥समुदायेनसंस्थानविशेषविशिष्टैः॥सर्वांशैरभेद

अभेदःस्वगुणाद्यैस्तुमुक्तानामपिसर्वशः॥भेदाभेदस्त्वभेदश्चगुणैःसंसारिणामपि॥जडानामंशतोभेदःसमुदायेनचोभयं॥मनुष्यगंधर्वपितृगणकार्मिकताल्विकाः॥देवाःशक्रःशिवोब्रह्मामरुतोसौख्यादिभिर्गुणैः॥शतायुतोत्तरानित्यमन्योन्यप्रीतिसंयुताः॥इतिसिद्धांतगंवाक्यंस्वयंभगवतोदितं॥स्वाध्यायस्तत्वविज्ञानंविष्णुभक्तिर्विरागता॥निषिद्धकर्मसंत्यागोविहितस्यसदाक्रिया॥सदाविष्णुस्मृतिश्चैवकेवलंमोक्षसा धनं॥एतैर्विनानमोक्षःस्याद्ध्रुवेदेतैरपिध्रुवं॥ ॥७॥

इत्याहृत्यायोज्यं।मुक्तमुक्तस्वरूपमेवविवृणोति॥मनुष्येति॥देवाइत्येतत्सामर्थ्यात्कार्मिकताल्विकविशेष्यं।केचिच्छतोत्तराःकेचिदयुतोत्तराः।सिद्धांतोनामकश्चिद्ग्रंथविशेषः।एवमुक्तऋषिछंदोदेवताज्ञानपूर्वकस्यवेदस्वाध्यायादेःफलमिथ्याभावांतरंचप्रमाणेदर्शयति॥स्वाध्यायइति॥एतैर्विनेत्युक्तमेवव्यतिरेकान्वयाभ्यामुच्यते॥७॥

ऋषीतिवचनांतरं॥ हरिविषयास्मृतिर्यस्यासोहरिस्मृतिस्तस्य॥ एतेनछंदोज्ञानमनुपयुक्तमितिमतंनिराकृतंभवति॥ जप्ये
२३ नैवेतिवाक्यांतरं॥ जप्येनैवउक्तलक्षणेनैव॥ संसिध्येत्तत्फलोभवेत्॥ कुतः॥ मित्रदेवतागायत्रीजपेनैवफलवत्वाधि

ऋषिछंदोदेवतानिज्ञात्वार्थंचैवभक्तितः॥ स्वाध्यायादेवमोक्षःस्याद्विरक्तस्यहरिस्मृतेः॥ जप्ये
नैववतुसंसिध्येद्ब्राह्मणोनात्रसंशयः॥ कुर्यादन्यन्नवाकुर्यान्मैत्रोब्राह्मणउच्यते॥ तस्मात्नित्यंहरिं
ध्यायन्कुर्यात्स्वाध्यायमंजसा॥ ऐहिकामुष्मिकाभोगारक्तस्यान्यस्यमुच्यते॥ इतिस्वाध्यायवचनं
स्वयंभगवतोदितं॥ स्वाध्यायात्तुप्रवचनेसहस्त्रगुणितंफलं॥ अर्थद्रष्टुःकोटिगुणंततोनंतंनियामके॥छ॥

मैत्रोब्रह्मणः॥ तस्मादित्यादिस्वाध्यायाख्यग्रंथगतंवाक्यं॥ तस्मादित्युक्तमेवदर्शितं॥ ऐहिकेति॥ यथाश्रुतव्याख्यानादपिस्वयमर्थद्रष्टुरनंतअनंतगुणं॥ बहुतरगुणमितिभावः॥ नियामकेस्वोक्तार्थस्यपरप्रत्यक्षप्रतिपादयितरि॥ ॥छ॥ व्यास
२३

ननुयदिसर्वोपिवेदःभगवत्परःकथंतर्हिअग्निसूक्तमिदंवायुसूक्तमिदमितिसूक्तभेदइत्यतआह॥ पृथगिति॥ द्विविधानिभगवद्रूपाणि
अग्न्यादिसूक्तवाच्यानिअग्न्यादिदेवतांतरगानिपृथक्तदनंतरगतानिच॥ सर्वाणिचाग्न्यादिनामवंति॥ तत्राद्यानांस्वनाम्नाअधिष्ठाननाम्ना
वअग्न्यादिसूक्तभेदोभवेत्॥ इतरेषांतुस्वनाम्नैवेति॥ एवमृषिछंदोदेवतास्वरूपंयथाक्रममुपपाद्येदानीमसमस्तव्याख्यानस्यप्रति

पृथग्रूपाणिविष्णोस्तद्देवतांतरगानिच॥ अग्न्यादिसूक्तवाच्यानिनाम्नासूक्तभिदाभवेत्॥
नकिर्माकिःस्मसीत्यादिप्रोक्ताधिक्यविवक्षया॥ आधिक्येधिकमित्येवहरिणास्तुत्नमीरितं॥छ॥

ज्ञातव्याख्यानप्रकारंशिक्षयति॥ नकिरित्या॥ नकिरिंद्रत्वदुत्तरः॥ माकिर्नेषत्॥ स्मसिस्छातर्हरीणामित्यादौयद्वक्षणप्राप्तादधि
कंरूपंतत्तत्रप्रोक्तार्थस्याधिक्यविवक्षयाप्रयुक्तंज्ञातव्यं॥ आधिक्येऽधिकमितिसूत्रात्॥ अर्थाधिक्येविवक्षितेऽधिकंशब्दरूपंभवति॥छ॥

पुनर्वेदव्याख्यानेत्थंभावमाह ॥ क्रमादेवेति ॥ उत्तमा ऋषयो शेषार्थान्पश्यंति ॥ तदन्येषामृषीणां ॥ क्रमादेवस्वयोग्यतानुसारेणतत्तद्वाक्यार्थ
ज्ञानं ॥ इदमुक्तं भवति ॥ योयोर्थोयेनयेनर्षिणा द्रष्टुं योग्यः असावसावेव तत्तद्दृष्टतया ज्ञातव्योनव्यासासेनेति ॥ आदिपदेनदेवता
२४ या अप्येतत् ज्ञातव्यमिस्युच्यते ॥ वेदार्थव्याख्यानंचयथावस्तुकृतमेव फलप्रदंनान्यथेतिभावेनाह ॥ विपर्ययेति ॥ विपर्ययेणार्थकथ
नेविपरीतंफलंभवति ॥ किंतत्तमस्तथा ॥ सदसद्व्याख्याने चस्वाधिक्यानुसारेणफलप्रदेत्याह ॥ यावदिति ॥ ज्ञाने सज्ज्ञाने ॥ विप

क्रमादेवतदन्येषामृष्यादीनांस्वयोग्यतः ॥ विपर्ययार्थकथनेविपरीतंतथा तमः ॥ यावत्प्रयोजकोज्ञानेतावत्तावच्छुभाधिकः ॥ त
मो थैवविपरीतेपिस्यात्तो ज्ञानेपितत्क्षमं ॥ ततोनिरयमानुष्यस्वर्गमोक्षातिरेकतः ॥ योग्यतातारतम्येनफलंसर्वेषु चोच्यते ॥ इतिप्रवृत्त
वचनंविवेकेप्येतदीरितं ॥ यादृशोयोग्यतायायात्सज्ञेयोर्थस्तथास्फुटं ॥ ॥

रीतेज्ञानइतिसंबंधः ॥ स्यात्तोसत्यांविपरीतायांच ॥ तदुक्तेसममित्यर्थः ॥ ननुमोक्षादिकंतत्फलंतच्चैकप्रकारमितिकथमेतदित्यतआह ॥ तमइति ॥ तमःप्र
भृतीनां ॥ अतिरेकतः तारतम्यवत्वात् ॥ सर्वेष्वत्रेषुव्याख्यात्रादिषु ॥ प्रवृत्तवचनंच ॥ स्वाध्यायातुइत्यादिकं ॥ विवेकाख्येग्रंथे ॥ यद्येवंतर्हिवेदव्याख्यानमेवोपर
म्यतां ॥ सदसदर्थविवेकस्यकर्तुमशक्यत्वादित्याशंकांस्मृत्यापरिहरति ॥ यादृशइति ॥ योग्यतायायात्प्रमाणतः ॥ तत्प्रतिपाद्येरन्वितःस्यात् ॥ सोर्थस्तथासन्ज्ञेयइत्यर्थः ॥ ७ व्यास

२४

नन्वेवंसंक्षिप्यकस्माडुच्यते अत्रायंसन्नर्थइतिविस्तरेणैवोच्यतामित्यतआह ॥ अनंतेति ॥ नियमैः व्याख्यानादीत्थंभावैः ॥ अनंताअर्थविशेषाःयेषांसंतिते
तथोक्ताः ॥ नियमः ॥ सदसदर्थव्यवस्था ॥ नियामकं ॥ विवक्षितार्थस्यप्रतिपादकं ॥ यतएवमसदर्थकथनेमहाननर्थस्तस्मात्प्रमादिकापराधपरिहारायप्रत्ती

अनंतनियमैर्युक्ताअनंतार्थविशेषिणः ॥ वादाइतिसमासेननियमोयंसमीरितः ॥ ऋक्संहितागतंवाक्यमि
तिचान्यन्नियामकं ॥ तस्माद्ब्रह्मपूज्याश्चब्रह्माद्याज्ञानयोजकाः ॥ गुरुत्वेनक्रमादेवविशेषेणेवकेशवः ॥ आर
भ्यस्वगुरुंयावद्विष्णुरेवोत्तरोत्तराः ॥ क्रमान्निष्फलान्यत्रगुरुतत्वेसमीरिता ॥ एवंस्थितेग्निगंविष्णुमग्नि
नामानमेवच ॥ मधुछंदाऋचतेनवाय्वादिगतमेवच ॥ साग्न्यादिंस्तौतिसद्भुक्त्यातत्तन्नामानमेवच ॥ ८

नव्याख्यातवंदनादिकंकार्यमित्याह ॥ तस्मादिति ॥ क्रमादित्युक्तंक्रममेवदर्शयति ॥ आरभ्येति ॥ अन्यत्रान्यथा ॥ निष्फलताविपरीतफलताचगुरुतत्वेग्रंथे ॥ रु
तर्हि अग्न्यादिदेवतामधुछंदःप्रभृतयःपरोक्ताऋषयश्चनभवन्त्येवेत्याकांक्षांपरिहरन्नाद्यस्यऋक्सूक्तस्यदेवतामवांतरमृषिंचवक्ति ॥ एवंस्थितइति ॥
एवंप्रमाणतोनिर्णीतेसति ॥ तत्तन्नामानं ॥ वाय्वादिनामानं ७

एवमग्निमीळ इत्यादिनवर्चमाग्नेयं सूक्तं व्याख्यायोपयुक्तं प्रमेयमभिधाय इदानीं वायवा याहीत्यादिनवर्चं सूक्तं व्याख्यातव्यं। तत्राद्यस्त्वृचो वायव्यः॥ तत्र वायुशब्दं व्याचष्टे॥ बलत्वादिति॥ वशब्दो बलवाची। न तत्र व्युत्पादनापेक्षेत्येवशब्दः। अयनात् गमनकर्तृत्वात्। अयतेरिणो वा उण्प्रत्ययः। वश्चासावायुश्चेति वायुः। वाति गच्छति। आयुश्च लोकस्य प्राणधारणहेतुत्वात्॥ वातेः कृत्प्रत्ययः। इणश्छंदसीति णिदुण्। पूर्ववद्विग्रहः। ज्ञानाज्ज्ञानकर्तृत्वात्। वातेर्गत्यर्थत्वेन ज्ञानार्थात्कृवापाजीत्यादिना कर्तर्युण्। अतो युक् चिण्कृतोः। वाति जानातीति वायुः। वरणात्स्वीकरणात्।

बलत्वादयनाच्चैव वायुरित्यभिधीयते॥ वात्यायुरिति वा ज्ञानाद्वरणादाश्रयत्वतः॥ वयबंधन इत्यस्मात्संसारद्वेष्यादपि॥ व्येत्यस्मिन्निति वा वायुर्वयश्रेष्ठत्व इत्यपि॥ ॥ ७ ॥

वृणोतेः कर्तरि कर्मणि वा ऽऽयुप्रत्ययः। वृणोति व्रियते वेति वायुः॥ आश्रयत्वत इति वानेरधिकरणे उण्प्रत्ययः। वाति गच्छति प्रवर्तते ऽस्मिन्निति वायुः। वयबंधन इत्यस्माद्धातोः कर्तर्युणि कृते बंधकत्वाच्च वायुर्भवति॥ व्ययाद्विनाशात्। विपूर्वादयतेरुकारप्रत्ययः। उपसर्गेकारस्य चाकारप्रत्ययः। संसारादेरिति योग्यतया संबंधः॥ व्ययते विनश्यत्यनेनेति वायुः॥ व्येति लीयते। विपूर्वादिणो ऽधिकरणे पूर्ववदुण्। वयश्रेष्ठत्व इति धातोरुणि कृते श्रेष्ठत्वादपि वायुः। श्रेष्ठत्वं नाम तद्व्यापारो विवक्षितः। गडिवदनेकदेश इतीयथा॥ ७॥

आप्तिमात्रेणोपपादकादपि तर्कागमाभ्यां नियतिं। उपपादनं यः करोति तस्याधिकं फलं॥ यदेवं वेदार्थद्रष्टुरादिमान्तस्य महाफलं तदा ब्रह्मणः पूर्णफलं किमु वक्तव्यं वेदाखिलद्रष्टुमिति॥ अखिलवेदतदर्थद्रष्टुरित्यर्थः॥ नियमकत्वं चात्र ग्राह्यं। वेदार्थज्ञानस्य फलमुक्तं। वेदश्च स्वरवर्णात्मकः॥ ततश्च स्वरा निरर्थका इति केषांचिन्मतं तदसदिति भावेनाह॥ दार्ढ्यमिवेति॥ स्वरबहुवर्णार्थस्य। दार्ढ्यमित्यादि। यथास्थितत्वं वर्णार्थस्यानन्यथात्वं॥ अविकारित्वं दार्ढ्यादन्यत्॥ समाहारो नाम साम्यस्वरमंगीकुर्वाणैः पातंजलैः स्वरविशेषो व्युत्पादितः॥ तस्याखिला अप्यर्थाः संति। प्रकरणादिवशात्तत्तद्विशेषग्रहणमित्यन्वयः। यद्वा

तर्कागमाभ्यां नियतिं यः करोत्यधिकं ततः॥ पूर्णवेदाखिलद्रष्टुर्ब्रह्मणः फलमुच्यते॥ दार्ढ्यमेवानुदात्तार्थ उदात्तस्योच्चतार्थता॥
नीचता स्वरितस्यार्थः प्रचयस्य यथास्थितिः॥ समाहारेऽखिला अर्थाः स्वरार्थानामियं स्थितिः॥ तत्तद्धर्मस्य भेदेन पदाद्या
दिस्वरे भिदा॥ साधारणो विधिस्त्वेष विशेषो यत्र यत्र च॥ ७॥

ऽनेकाक्षरे पदे स्वरसमाहारे सत्यखिला अप्यर्था प्रतिपत्तव्याः॥ ७॥ नन्वेवं सति तत्र विरोधः स्यात्। एकस्य पदस्य ह्येकोऽर्थः। अनेकाक्षरत्वादनेके स्वराः। न ह्येकस्यार्थस्योक्तानेकार्थैर्विशेषणं युक्तमित्यत आह॥ तत्तेति॥ एकस्मिन्नपि पदे अनेकवर्णैः तत्तत्स्थानां भगवद्धर्माणामनेकत्वेन तत्तद्विशेषणार्थं पदस्यादिमध्यांतस्वराणां भिदा भिन्नार्थत्वं न विरुद्धमित्यर्थः॥ उक्तं चैतन्नियमतं। अतोऽपि न विरोध इत्याह॥ साधारण इति॥ विधिः प्रकारः। स्वरार्थानां॥ अतो यत्र यत्र विशेष उच्यते तत्र तत्रोक्तः सर्वोऽपि ग्राह्य इत्यर्थः॥ ॥७॥

ननु तेषां पाही सत्र विभक्तिव्यत्यय मंगीकृत्य स्वातंत्र्येण व्याख्यानादपि वरं तेषां मंत्रां पाहीति व्याख्यानमिति तत्राह ॥ गुणाधिक्यमिति ॥ भवेत् । देवतायाः ।
२६ ज्ञापितमिति शेषः । येन अर्थ व्याख्यानेन । प्रयोजकत्वात् । फलवत्वात् । अन्यस्य गुणाधिक्य विरोधिनः । तदर्थता । वेदार्थता । नास्ति । ज्ञातगुणाधिक्यो हि परमेश्वरः फ
लं प्रयच्छति । गुणाधिक्यं च विभक्ति व्यत्यय एव भवतीति भावः ॥ फलवत्वेप्यनेनार्थेन भवितव्यमित्यत्र किं नियामकमिति तत्राह ॥ उपक्रमादय इति ॥ यत्र यस्यार्थस्या
नुकूलाः उपक्रमादयः ॥ स खल्वर्थस्य निश्चायकास्तत्र फलं सर्वाधिकमिति ॥ ७ ॥ ततश्चैवं योजना ॥ हे दर्शत वायो । आध्यात्मिकं बाह्यं च यज्ञं प्रयाहि ॥ किमिति ॥ अध्यात्मम नोद

गुणाधिक्यं येन भवेद्वेदस्यार्थः स एव हि ॥ प्रयोजकत्वान्नान्यस्य फलाभावान्न दर्थता ॥ उपक्रमादयो यत्र तात्पर्यार्थः स एव हि ॥ ३ ॥ ३ ॥ ७ ॥ वायवायाहि दर्शतेमे
सोमा अरंकृताः ॥ तेषां पाहि श्रुधी हवं ॥ १ ॥ वायो इति । आ । याहि । दर्शत । इमे । सोमाः । अरं ऽकृताः । तेषां । पाहि । श्रुधि । हवं ॥ १ ॥ वायउक्थेभिर्जरंते त्वामच्छा जरिता
रः ॥ सुतसोमा अहर्विदः ॥ २ ॥ वायो इति । उक्थेभिः । जरंते । त्वां । अच्छ । जरितारः । सुत ऽसोमाः । आहः ऽविदः । २ ॥ स्तुवंति शास्त्रैः स्तोतारो यथावद्यज्ञवेदिनः ॥ २ ॥

त्वयोभक्त्या दिभिः बहिः प्रसिद्धाः । हिरण्येन । अरं कृताः । अलंकृताः । इमे सोमाः संति । तेषां तान् पाहि । पिब । छांदसः पिबादेशाभावः । हवं । आव्हानं । भावेनुपसर्गस्ये
ति ह्वयत्यर्थादयतेर्भावे चप्रत्ययः । संप्रसारणं च । श्रुधि । शृणु । आगमनेन सफलं कुरु । श्रुश्रृणुपृकृवृभ्यः छंदसीति हेर्धिः विकरणाभावश्च ॥ १ ॥ वायउक्थे
भिः स्तुवंति शास्त्रैः । हे वायो । सुतः सोमो यैस्ते सुतसोमाः । अच्छेति निपातो ऽभेरर्थे वर्तते । अह दिति यज्ञोपलक्षणं । अच्छ । अहर्विदः । अभितः यथावद्यज्ञ
वेदिनः । जरितारः स्तोतारः । स्तोतृनामसु पाठात् । उक्थेभिः उक्थैः शास्त्रैः त्वां जरंते अर्चंति स्तुवंति । स्तुतिकर्मसु पाठात् ॥ २ ॥ व्यास २६

वायो तव । वा त्वक् संपर्किणी । हे वायो तव । त्वां । प्रपृंचती ॥ पृची संपर्के । त्वत्संपर्किणी । त्वत्स्तुति रूपा । उरूची अतिमहती । आधिक्ये धिकमि
त्युक्तत्वात् धेना वाक् ॥ वाङ्नामसु पाठात् ॥ सोमपीतये । सोमस्य पीतिर्यस्येति व्यधिकरणो बहुव्रीहिः ॥ तस्मै सोमपाय ॥ आतोनुपसर्गे
कः ॥ दाशुषे । यज्ञकृते । निपातना साधुः ॥ जिगाति गतिकर्मायं ॥ अंतर्णीतण्यर्थश्च ॥ प्रापयति ॥ ईप्सितमिति शेषः ॥ कथं वाचोतिम

वायो तव प्रपृंचती धेना जिगाति दाशुषे ॥ उरूची सोमपीतये ॥ ३ ॥ वायो इति ॥ तव । प्रपृंचती । धेना । जिगाति ॥
दाशुषे ॥ उरूची । सोम ऽपीतये ॥ ३ ॥ वात्वक् संपर्किणी यज्ञकृते प्रापयतीप्सितं ॥ सोमपायातिमहती महार्थत्वात्वदर्थतः ॥ ७

हत्वं महार्थत्वात् ॥ तदपि कुतः ॥ त्वदर्थतः ॥ त्वदर्थत्वात् । त्वं ह्यतिमहान् ॥ अनेन यतस्तव प्रपृंचती । ततएवोरूची त्युक्तं भवति ॥ यद्वा महार्थ
दिति उरु मंचतीत्युरूचीत्यादस्य निर्वचनांतरं ॥ तस्योपपादनं त्वदर्थत इति ॥ त्वत्स्तुतिर्हि यजमानाभीप्सित साधन स्वभावा ॥ अतस्त्वं तामस्माकमभी
प्सितं कुर्विति ॥ ३ ॥

द्वितीयतृचः ऐंद्रवायवः ॥ इंद्रवायू इमे ॥ अत्रेंद्रशब्दं व्याख्याति ॥ इंद्र इति ॥ इंदतेः परमैश्वर्यार्थाद्दौणादिकोरप्रत्ययः ॥ इदं विषयजातमुद्दिश्य ॥
२७ द्रुतेर्द्रवणात् सर्वविषयोपभोगाच्चेंद्रः ॥ इदंद्रा इत्युपपदाद् द्रु गतावित्यस्मात् डः उपपदस्य चेन्नित्यादेशः ॥ इदं सर्वं ददर्शेति चेंद्रः ॥ दृर्ववद्दृशेड्ः ॥
तथा च श्रुतिः । इदमदर्शमित्यादि ॥ दीप्तिमत्वाच्चेंद्रः ॥ इंधी दीप्तावित्यस्मादप्रत्ययः ॥ धस्य च दः ॥ इंधो ह वै नामेत्यादि श्रुतेः ॥ इदमभीष्टं राति ददाति

इंद्रवायू इमे सुता उप प्रयोभिरागतं ॥ इंदवो वामुशंति हि ॥ ३ ॥ ४ ॥ ॥ इंद्रवायू इति ॥ इमे । सुताः । उप ।
प्रयःऽभिः । आ । गतं । इंदवः । वां । उशंति । हि ॥ ३ ॥ ४ ॥ ॥ इंद्रः स परमैश्वर्यादिदमुद्दिश्य द्रवतेः ॥ ददर्शेंद्र
दीप्तिमत्वादिदं रातीति वा भवेत् ॥ सोमाभिमानिनो देवा वामिच्छंति हि सोमगाः ॥ प्रियैरुपागतं तेन ॥

ति निर्वचनं भवेत् ॥ शतेः कः इदमश्वेंद्रा देशः ॥ हे इंद्रवायू इमे सुताः सोमाः संपादिताः संति ॥ ते च इंदवः सोमाः ॥ सोमनाम चेतनत्वा
द्धि सोमगाः । सोमाभिमानिनो देवाः ॥ अध्यात्ममस्मन्मनोवृत्तयो हि यस्मात् । वां युवां । उशंति इच्छंति । युवयोरागमनं कामयंते ।
तेन कारणेन ॥ प्रयोभिः प्रेयोभिः प्रियैः । ईयसुन ईकारस्याकारः ॥ अतिशयेन प्रियैः सह । उपगतं उपागच्छतं छांदसस्थत्वाभावः ॥ ॥ ७

व्यास २७

एतद्व्याख्यानं भगवतीव किं तदन्यदेवतायामपि ज्ञातव्यमित्यत आह ॥ मुख्यत इति ॥ अनिषिद्धा ये भगवतो लक्षणभूता न भवंति ॥ तदन्ये
ष्वपि बहुवचनेनास्यादिशब्दव्याख्यातेपि अयं न्यायो बोध्य इत्याह ॥ ते च यथायोग्यतयैव न तु निरतिशयाः ॥ तथात्वे पुनर्भगवल्लक्षणत्वा
पत्तेः । दृशोभावे यत्र । तनोते डः । दर्शो दर्शनं । तेन ततो दर्शतिइति । अस्य ताखर्यं दर्शतिस्त्व तद्दृष्टित्वादिति ॥ तदुपपादयति ॥ सर्वज्ञ इति ॥ मनांसीत्यध्या

मुख्यतो वासुदेवे ते गुणाः संत्येव सर्वशः ॥ अनिषिद्धास्तदन्येषु यथायोग्यतया मताः ॥ दर्शत
स्तत्दृष्टित्वात्सर्वज्ञोसौ यतो विभुः ॥ भक्त्याद्यलंकृताः सोमाः मनांस्यन्ये हिरण्यतः ॥ हिरण्यालंकृतायस्मा
त्सूयंते वायवे सुताः ॥ तान्पाहि श्रुधि चाह्वानं स्वातंत्र्ये व्यत्ययोप्ययं । मनोपि भोग्यमीशस्य प्रीतिमात्रेण केवलं ७

तं । अन्ये बहिष्ठाः । हिरण्यत इत्युपपादयति ॥ हिरण्येति ॥ सुताः सोमाः । पाहि । पिब । श्रुणु । तेषामित्येतत्तानितिव्याख्यातं ॥ तत्रायं विभक्तिव्यत्ययः
किंनिमित्त इत्यत आह ॥ स्वातंत्र्य इति ॥ त्वदीयान्सोमांस्त्वं पिबेत्युक्तं भवति । अपिपदेन श्रुधीति संहितयां दैर्घ्यमुक्त्वाधिक्य इति समुच्चिनो
ति ॥ मद्यध्यात्मं मनः सोमः कथं तर्हि तस्य पानमित्यत आह ॥ मनोपीति ॥ ७

वायविंद्रश्चचेतथः। विजानतः। हे वायो। वाजमन्नं। तदेवा वाजि। त्वतीमो तिशय इत्सुक्तत्वात्। तन्नयतीतिवाजिनी। सूर्यः। सहिधर्षणादिनान्नं प्रवर्तयति।
 सत्क्रद्विषेत्सादिनाद्धिपू। तत्रवसतइतिवाजिनीवसू। वसतेरुः। अन्नप तोस्सूर्येसदास्थितौ॥ इंद्रः। चशब्दात्त्वंच॥ सुतानांसुतान्॥ चितीसंज्ञाने। विजा

वायविंद्रश्चचेतथःसुतानांवाजिनीवसू॥ तावायातमुपद्रवत्॥ ३॥ ५॥ वायोइति॥ इंद्रः। च। चेतथः। सुतानां। वाजिनीवसू इति।
सू॰। वाजिनीवसू। आ। यातं। उप। द्रवत्। ३। ५॥ विजानतः सुतानन्नपतोस्सूर्येसदास्थितौ॥ द्रवद्द्रुतंसुतात्पर्यद्योतकोभ्यासइष्यते॥ ३॥ ५॥

नतः। विजानीथः॥ द्विविकरणतावर्णव्यत्ययश्च छांदसः। अस्म त्स्वीकारयोग्या भवंती मे सोमा इतियुवां विजानीथः। अतःकारणात्। द्रवद्द्रुतं। क्षिप्र
नामसुपाठात्। तौयुवां। युपायातं। मद्या। चेतथः। चेततः। विजानतः। युष्मद्दानिनोयजमानस्य। सुतान्। उपायातमिति योज्यं। वायवायाहि
हि उपप्रयोभिरागतं तावायातमितिपुनरुक्तिरित्यतआह॥ सुतात्पर्यमिति॥ ३॥ ५॥ व्यास २८

वायविंद्रश्चसुन्वतः। सुन्वतइतिव्याख्याति॥ यजनि॥ यजन्। यजमानः। सुन्वन्निस्युच्यते॥ ऋत्विग्भिः क्रियमाणस्यापिसवनस्ययजमानार्थत्वात्। सुन्वानितिद्धि
विसाठः। तत्रदीर्घश्छांदसः। निष्कृतं। स्वार्थमाह॥ कृतस्येति॥ यद्वेनिष्कृतं तत्संस्कृतमाहेति श्रुता वव्ययमेवार्थः॥ कृ॰ तत्प्रतीकरेस्यरा इस्यरु इत्यादित्येवार्थः॥
विभक्त्यर्थमाह॥ तदर्थमाह॥ हेवायो। नरा। नरौ। सुपांसुलिगित्सादिनाप्रथमाद्विवचनस्याऽऽत्। युवां। इंद्रश्चत्वं च। सुन्वतः यजतः। निष्कृतं तत्कृतइज्यानुसा

वायविंद्रश्चसुन्वतआयातमुपनिष्कृतं॥ मक्ष्वी३त्थाधियानरा॥ ४॥ ६॥ वायोइति॥ इंद्रः। च। सुन्वतः। आयातं।
उप। निष्कृतं। मक्षु। इत्था। धिया। नरा॥ ४। ६॥ यजन्सुन्वन्सुतस्यानुसारिकमैवनिष्कृतं॥ तदर्थं क्षिप्रमायातंधियेत्थंभू
तयाऽऽचलौ॥ नरौ तावविनाशिलाउपचारः क्वचिद्भवेत्॥ अमरत्वं वद्यतोमोक्षोदेवतानांसुनिश्चितः॥ ४॥ ६॥

रिप्रल्हादानंप्रति। तदर्थंतत्कर्तुं। इत्था। इत्थंभूतया। ददान्येवास्मैफलमित्येवंभूतया। धिया। मक्षु। क्षिप्रं। तन्नामसुपाठात्। उपायातं। नरौतावित्सन्द्यवाचलाविति
व्याख्यातं। निर्विकारो। लापरिवर्तने। ततो नपूर्वात्क्तः। अविनाशित्वादित्स र्थांतरं। रीङ्क्षये। रिपूहिंसायां। ततो डः। किमेवं नरशब्दव्याख्यानंसर्वत्रनेत्याह॥ उपचारइ
ति॥ क्वचित्प्रसिद्धे। वायाविंद्रे। च। उपचारः। गौणी वृत्तिः। विष्णावेव मुख्यता। अमरत्वंवेत्। नहिदेवानांमुख्यतोमरणाभावः। उपचारेबीजमाह॥ यतइति॥ मोक्षेचाविनाशि
त्वंनियतमितिसर्वदाप्युपचर्यतइत्यर्थः॥ ४॥ ६॥

२९ तृतीयस्तृचो मैत्रावरुणः॥ मित्रं हुवे। मित्रावरुणशब्दौ निर्वक्ति॥ मित्वेति॥ मित्वा रक्षणीयं ज्ञात्वा। त्रातीति प्रकृत्यंतरस्येदं रूपं॥ मा त्रा इत्येताभ्यां ककारप्रत्ययः॥
आद्यस्य चेकारः। मातित्रातिचेति मित्रः। तस्य तात्पर्यं मित्वा त्रातीति॥ अयं विष्णुः। अन्हा निमित्तेन। वस्तुजातं मितं ज्ञातं करोतीति मित्रः स्वदंतर्गतो हरिश्च
मितशब्दोपपदाद्रातेः करोत्यर्थादकारउपपदांतश्चलोपश्च। मितं परिमितं। यथायोग्यमेव। रातिददातीति। रमयत्यनेन रमतेरं तण्शितर्ण्यर्थात्। अमं

मित्रं हुवे पूतदक्षं वरुणं च रिशादसं॥ धियं घृताचीं साधंता॥४॥२॥ मित्रं। हुवे। पूतदक्षं। वरुणं। च॥ रिशा
दसं। धियं। घृताचीं। साधंता॥४॥२॥ मित्वा त्रातीति मित्रोयं मितमन्हा करोति वा॥ मितं रातीति वानिशं मितं
रमयतीति वा॥ अवृणोतीति वरुणस्तमसाऽज्ञानतोपि वा॥ वरमुन्नयतीत्यस्माद्वरानंदत्वतोपि वा॥ ॥७॥

तादुद्रु इति उ प्रत्यय उक्तो भवति॥ तमसा बहिः। अज्ञानतो ध्वांतं। कृवृदारिभ्य उनन् इति वृणोतेरुनन्। वरमुत्तमजीवं उन्नयति ऊर्ध्वं नयति। वरशब्दोपपदा
दुत्पूर्वान्नयतेर्डः। उपपदोपसर्गांतयोर्लोपश्च। वरानंदत्वतः। णो हि निर्वृतिवाचक इति वचनात् णशब्द आनंदवाची। वरो णो यस्यासौ वरुणः पूर्वपदस्य ओकारः॥७॥

अत्रेंद्रवायुशब्दाभ्यां विवक्षितं भगद्रूपद्वयमाह॥ उपेंद्र इति॥ इंद्रशब्देनोपेंद्रो वायुशब्देन संकर्षणो हरिरुच्यत इत्यर्थः॥ ननु परमेश्वरे द्विवचनं कथं इत्यत आ
ह॥ द्विरूपत्वादिति॥ नन्वेकस्यैव हरेर्द्विरूपत्वं च कथं। द्वित्वस्य भेदाविनाभूतत्वादिति तत्राह॥ बहुत्वं चेति॥ चशब्देन द्वित्वं। बहुत्वग्रहणं अन्यत्र बहुवचनसं
पादनार्थं॥ द्विवचनादिकं भेदेनैव संपाद्यमित्यत आह॥ नात्रेति॥ कथंचन॥ न केवलोऽभेदसहितश्च। कुत इत्यत्र श्रुतिविरोधादित्याह॥ एकमेवेति॥ अनेनवि

उपेंद्रः संकर्षणो हरिः॥ द्विरूपत्वाद्बहुत्वं च विशेषादेव केवलं॥ एकस्यैव हरेर्नात्र भेदशंकास्य कथंचन॥ एकमेवाद्वितीयं
तन्नेह नानास्ति किंचन॥ मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति॥ यथोदकं दुर्गे वृष्टं पर्वतेषु विधावति॥ एवं धर्मान्पृ
थक्पश्यंस्तानेवानुविधावति॥ उक्ता धर्मान्पृथक्त्वस्य निषेधादेवमेव हि॥ विशेषो ज्ञायते श्रुत्याभेदादन्यश्च साक्षितः॥७॥

अहभेदोपि द्विवचनादिविषयो निरस्तः॥ भेदं विना विशेषमात्रेणैव द्विवचनादिकं घटत इत्यस्य फलं॥ भेदादन्यस्य विशेषस्यैवाप्रामाणिकत्वादिति त
त्राह॥ उक्तेति॥ तं दुर्दर्शमित्यादिना काठके परमेश्वरस्यानेकान्धर्मानुक्त्वा एकमेवाद्वितीयं इत्येवं पुनः पृथक्त्वस्य निषेधाद्भेदादन्यो भगवति श्रुते
र्विज्ञायते॥ अखंडत्वे धर्मकथनानुपपत्तेर्भेदस्य निषेधायोगात्॥ किंच घटादौ भेदादन्यो विशेषः साक्षितश्च ज्ञायत इति॥ ३॥ ७॥ श्रीगुरुभ्यो नमः॥

ऋतेन मित्रा। नित्यवृधः स भगवांस्तस्मादृतवृधः। ऋतमनुगतं सर्वकालमित्यृतशब्दो नित्यपर्यायः। वर्धतेरिगुपधलक्षणः कः। ऋतं नित्यं। वृधोवृधः। ऋतवृधः। ऋतेन सत्येन। सत्यस्यैव नतूपचारत इत्यभिप्रायोक्तिः।। यथार्थत्वादृतो वेदः। तं स्पृशतीति ऋतस्पृक्। स्पृशोनुदके क्विन्। वेदवाच्यः। एवं पूर्वार्धं विश्लेषोयोजयित्वा देवतांतरे योजयति।। अन्यौ चेदिति।। भगवतोन्यौ मित्रावरुणौ विवक्षितौ चेत्तदा द्वितीयतृतीयाभ्यामृत

ऋतेन मित्रावरुणावृतावृधावृतस्पृशा।। क्रतुं बृहंतमाशाथे।।४।।३।। ऋतेन। मित्रावरुणौ। ऋतऽवृधौ। ऋतस्पृशा। क्रतुं। बृहंतं। आशाथेइति।।४।।३।। नित्यवृधः स भगवान् ऋतेनानुपचारतः।। ऋतस्पृग्वेदवाच्यत्वादन्यौ चेद्भगवान्नतः।। ऋगतौ विस्तृतः सर्ववस्तुष्वनुगतत्वतः।। तेन वृधौत स्पृशौ च सर्वदा मित्रवारिपो।। संहितायां च

शब्दाभ्यां हरिरुच्यते।। कुतः। ऋगताविति धातोः कर्तरि क्ते ऋते सर्ववस्तुष्वनुगतत्वतः। सर्वगतत्वादृतो हरिः। तथा च तेन ऋतेन हरिणा वृधाविति मित्रवारिपा ऋतवृधौ। तत्स्पृशौ। तत्संबंधिनाविस्तृत स्पृशौ। सर्वदेति प्रथमर्तशब्दार्थः। ऋतावृधावित्यत्र संहितायां दैर्घ्यं पदे ह्रस्वता। तदभिप्रायमाह।। संहितायां

आदिपदेन अन्ये वर्णविकाराः गृह्यंते। यः संहितायां दैर्घ्यादिः पदे त्वन्यथा। स उक्ताधिक्ये। उक्तार्थस्याधिक्यज्ञापनार्थः।। अनन्यार्थत्व विज्ञप्त्यै।। उक्तस्यावधारणार्थं चेति यावत्।। उत्तरार्धं व्याख्याति।। इन्नाथेइति।। प्रेरयथः।। तृतीयोतिनाये।।

दैर्घ्यादिरुक्ताधिक्ये पदेन्यथा।। अनन्यार्थत्ववि
ज्ञप्त्यै इन्नाथे च महाक्रतु।। महत्सुखं वा।।

ऋतशब्दः सुखनामापि भवतीति बृहंतं क्रतुं। महत्सुखं वा। छंदस्त्वात्। अधीगर्थदयेशां कर्मणीति न भवति।।४।।३।।

कवीनः। तुविजाता विस्पष्टेऽधाव्याचष्टे॥ तुविजाताविति॥ तुवीति बहुनाम। बहुशब्दश्च पूर्णवाची। अतः परब्रह्मणो जातौ। तुविजौ तुविजातौ। तथा
विधौ। तुवित्वेन पूर्णत्वेन जातावित्यवस्थितौ। तुविजाताविति वा। अर्थद्वयस्य व्यवस्थां दर्शयति॥ हरिरिति॥ तथैवभूतत्वात्तुवित्वेनावस्थितत्वा
३१ तुविजातो हरिः॥ अन्यो मित्रावरुणो। ब्रह्मजातत्वेन तुविजाताविति भावः॥ उरुक्षया विस्पत्रक्षयपदार्थमाह॥ स्थानमिति॥ क्षि निवासगत्यो
रित्यस्मादेरजित्यधिकरणे घञ्। शिष्टं व्याख्याति॥ कर्मेति॥ कवी नित्यबुधौ। सर्वज्ञौ। तुविजातौ उरुक्षयौ। महास्थानौ सर्वगतौ। तौ

कवी नो मित्रावरुणा तुविजाता उरुक्षया॥ दक्षं दधाते अपसं॥ ४॥ ४॥ कवी इति॥ नः। मित्रावरुणा। तुविजातौ।
उरुक्षया। दक्षं। दधाते इति। अपसं॥ ४॥ ४॥ तुविजौ ब्रह्मजातौ तथाविधौ॥ हरिस्तथैवभूतत्वात् स्थानं क्षय इहोच्य
ते॥ कर्मापसं चकर्तारं दक्षं कर्तारमेव च॥ अस्मदर्थे दधाते तौ नित्यबुधौ तथागतौ॥ ४॥ ४॥

मित्रावरुणौ। नः अस्मदर्थेनः दक्षं यजमानं प्रति। अपसं कर्म दधाते। तं कर्तारं कुर्वाते इतियावत्। अपः शब्दः। कर्मनाम। ततश्चांदसो ऽमो लुक्।
अथवा न अपसं कर्तारं। अर्श आदिभ्यो अच्। यजमानं दक्षं पृष्टं। दधाते कुर्वाते। अत्र दक्षमिति पूर्वोत्तरयोः संयोजनीयं। गतागताविस्फुरु क्षय
शब्दस्यार्थान्तरं॥ क्षयो गतिः। भावे घञ्। उरुः क्षयो ययोस्तौ। तथोक्तौ। गतागतौ गत्यागतिमन्तौ॥ ४॥ ४॥ व्यास

३१

दक्षाः यजमानाः॥ पूर्वार्धं योजयति॥ तमिति॥ हुवे आह्वयामि॥ बहुलं छंदसीति ह्वयतेः संप्रसारणं॥ शपो लुक्। चरित्रादसमित्येतत्स्फुखिनमिति व्याख्या
नं। तत्कथमित्यवयवार्थमाह॥ शमिति॥ तस्मादिति शेषः॥ ननु रमणमपि स्फुखं अतः पुनरुक्तिरित्यतो भिप्रायमाह॥ अनूनेति॥ रमेर्भवि ङिः॥ रिन्द्रामनू
नस्फुखं। अन्ति अनुभवतीति रिन्द्रादाइत्यर्थः॥ अदेशोणादिकोऽ स्फुन्प्रत्ययः॥ घृ क्षरणदीप्त्योरित्यस्माद्धुध्यर्थो क्तरिक्तः॥ तदंचनात्। तं प्रतिगम

घृतादक्षा अनेनेति घृतदक्ष इतीरितः॥ तमाह्वयामि स्फुखिनं शमदं नमतेयतः॥ अनन्तस्फुखभेकुलादिशादा
इति कीर्तिताः॥ हरिर्घृतः स्फुरुधत्वा द्रुताचींच तदंचनात्॥ स्वधीति साधको विष्णुर्भक्तानां च यथार्थतः॥ ४॥ २॥

नात् विषयीकरणात्॥ उत्तरार्धं योजयति॥ स्वेति॥ स्वविषया धीर्ध्यानं। स्वधीतिः यथार्थत्वं स्वधीतेर्विशेषणं। यद्वा शोभना अधीतिरधिगतिः स्व
धीतिः। शोभनत्वस्य विवरणं॥ यथार्थत इति॥ भक्तानामित्यादि शेषकथनं॥ साधंतौ। साधयंतौ॥ ४॥ २॥ ॥

अश्विना पुरुदंससा॥ बहुकर्मकृतौ॥ पुरु॥ बहु॥ दंसः॥ कर्म ययोस्तौ पुरुदंससौ॥ बहुकर्मकृतौ नरौ॥ पूर्ववत्॥ धिष्ण्या॥ धिष्ण्यशब्दः स्थानपर्या

अश्विना पुरुदंससा नरा शवीरया धिया॥ धिष्ण्या वनतं गिरः॥२॥५॥ अश्विना॥ पुरुऽदंससा॥ नरा॥ शवीरया॥ धिया॥
धिष्ण्या॥ वनतं॥ गिरः॥२॥५॥ बहुकर्मकृतौ सौख्यवीर्याश्रितया धिया गिरः॥ अस्मदीयाः संभजतं धिष्ण्यौ सर्वाश्रयौ सदा॥२॥५॥

य॥ सदा सर्वाश्रयौ। युवां। शवीरया। शं सुखं वीर्यं तदाश्रितया। धिया। गिरः। अस्मदीयाः स्तुतिरूपा वाचः। वनतं। वन षण संभक्तौ। संभजतं। स्वीकुरुतं॥२।५॥

दस्रा। भेदकौ॥ हे रुद्रवर्तनी। नासत्यौ। दस्रौ। दसु विभेदने। ततो रः। सर्वत्र शत्रूणां भेदकौ। वृक्तबर्हिषः। अनेकार्थत्वाद्धातूनां। स्तृतबर्हिषः। स्तृतं विस्तृतं बर्हिर्येन
तस्य यज्वनः। सुताः सोमाः। युवाकवः। वां। युवयोः संबंधिनः॥ युवयोरिदमित्यर्थे आकुप्रत्ययो युष्मदो युवादेशश्च॥ युवयोरर्थे संपादिताः॥ हि यस्मात्तस्माद

दस्रा युवाकवः सुता नासत्या वृक्तबर्हिषः॥ आ यातं रुद्रवर्तनी॥३॥५॥ दस्रा॥ युवाकवः॥ सुताः॥ नासत्या॥ वृक्तऽब
र्हिषः॥ आ॥ यातं॥ रुद्रऽवर्तनी इति रुद्रऽवर्तनी॥३॥५॥ भेदकौ सर्वत्र शत्रूणां दस्रौ संबंधिनो हि वां॥ सुता युवा
कवः सोमा यज्वनस्तृतबर्हिषः॥ नासत्यौ नासिकासंस्थौ नैव चासद्गुणौ क्वचित्॥ ॥३॥५॥ ॥छ॥

यातं। नासत्यशब्दं व्याख्याति॥ नासत्याविति॥ नासाशब्दाद्भवार्थे यत्प्रत्ययः ह्रस्वश्च। नासिकाभिमानित्वात्। एतद्देवतांतरविषयं। विष्णुश्चेत्क्वचिदसद्गुणो नैवेति स
छंदःपर्यायः सत्यशब्दः सद्गुणवाची। सद्भावे साधुभावे चेति वचनात्। न सत्याः असत्याः असद्गुणाः न विद्यंते असत्या ययोस्तौ नासत्यौ। नभ्राडित्यादिना नसा

रुद्रवर्तनिशब्दार्थमाह ॥ रुजामिति ॥ रुक्शब्देन कर्मण्युपपदे द्रुगतावित्यस्माद्दंतण् ३ तण्पर्थाड्डुः । उपपदस्य च द्रः । वासुदेवः स्नेहतस्तदनुवर्तनाद्रुद्रवर्तनिशब्दो
३३ क्तः ॥ आश्विनावप्यनुवशत्वेन तदनुवर्तनाद्रुद्रवर्तनिशब्दोक्तौ ॥ वृत् वर्तने । भावे अनि४ । रुद्रस्य वर्तनि४ । रुद्रमनु वृत्तिर्ययोस्तौ तथोक्तौ । अथवा । तन्मार्गग

रुजां द्रावणतो रुद्रो वायुस्तदनुवर्तनात् ॥ स्नेहतोनुवशत्वाद्वा तन्मार्गगतितोथवा ॥
कस्मिन्वहमिति श्रुत्या वासुदेवोश्विनावपि ॥ रुद्रवर्तनिशब्दोक्ताः ॥ ॥३॥५॥ ॥

तितः ॥ रुद्रस्य वर्तनि मार्गो ययोस्तौ रुद्रवर्तनी इति वा । वासुदेवोश्विनावपि रुद्रवर्तनिशब्दोक्ताः ॥ अस्त्वश्विनो वायुमार्गगतिस्तद्वशत्वाद्वासुदेवस्य तु कथमित्य
त आह ॥ कस्मिन्वहमिति ॥ कस्मिन्वहमुत्क्रांत उत्क्रांतो भविष्यामि कस्मिन्वा प्रतिष्ठिते प्रतिष्ठास्यामीति स प्राणमसृजतेति श्रुत्या वासुदेवस्यापि सा वगम्यते ॥ ३॥५॥ व्यास
३३

अश्विनेत्यादि द्वादशर्चं सूक्तं । तत्राद्यस्तृच आश्विनः । द्वितीय ऐंद्रः । तृतीयो वैश्वदेवः४ । चतुर्थः सारस्वतः । अश्विना यज्वरीः । अन्नानि । हे द्रवत्पाणी । क्षिप्रहस्तौ ।
औदार्यवंतौ । शुभस्पती इषुभादिपौ । पारस्करादित्वात्सुट् । पुरुभुजौ । बहुगोपौ बहोर्विश्वस्य गोप्तारौ । बहुभुजौ वा । बहोर्भोक्तारौ । भुजेरुभयार्थत्वा
त् । अश्विनौ युवां । यज्वरीः४ । इषः । यज्ञयोग्यानि यज्ञसाधनानि । अन्नानि । यजतेः करणे घ्वरच्प्रत्ययः । नः । चनस्यतं । योजयतं । प्रयच्छतं यद्वा । यज्वरीरि
षिः४ । यज्ञदत्तान्स्वभागान्संयोजतं । स्वार्थे णिच् । स्वीकुरुतं । आशु वाद्रतीति द्रवत्पाणी इत्यस्याभिप्रायांतरं ॥ अश्विना इत्यं निर्वक्ति ॥ आशु वानादिति ॥ वा

अश्विना यज्वरीरिषो द्रवत्पाणी शुभस्पती ॥ पुरुभुजा चनस्यतं ॥ १॥५॥ अश्विना । यज्वरीः । इषः । द्रवत्पाणी इति द्रवत्पाणी । शुभः । पती
पुरु ८ इति । भुजा । चनस्यतं ॥ १॥५॥ अन्नानि यज्ञयोग्यानि क्षिप्रहस्तौ शुभाधिपौ ॥ बहुगोपौ बहुभुजौ नो योजयतमश्विनौ ॥ यज्ञदत्तान्स्व पदेष्टता
भागान्वा संयोजमतमाशु वै ॥ आशु वाना द्रुतरश्वी क्षिप्रावगतितोथवा ॥ अश्नुते खिलमित्येवाप्यश्वजत्वात्तथाश्विनौ ॥ १॥ ५॥ ५॥

नादित्यस्येव व्याख्यानं गतेरिति ॥ आङ्पूर्वपदाद्वा गतिगंधनयोरित्यस्मादिनिः । क्विंचेति शेषः । उपपदस्य हस्वलोपौ । क्षिप्रावगतितोथवा ।
गत्यर्थनामवगत्यर्थत्वात् । अखिलं जगत् । अश्नुते व्याप्नोति ॥ आशु व्याप्ताविति तौ विन् । एवं शब्दो व्याप्तेरनुपचरितत्वार्थः । अश्वजत्वादित्यश्व
शब्दो दयत्यार्थेत द्विताद्रतिदृन् । एतत्तु व्याख्यानं देवतांतर एवेति सूचनायाश्विनावित्याह ॥ अश्वरूपात्सूर्याज्जातत्वात् ॥ १॥ ५॥ श्री ॥८॥५

हेचित्रभानोइंद्र।आयाहि।कुतः।अण्वीभिः सूक्ष्माभिः सूक्ष्मतंतुभिः संम्यक्शोधनसाधनीभिः पटीभिरितिशेषः॥तना।विस्तृतस्य।तनोतेराकारः।क्का
र्थे।पूतासः।पूताः शोधिताः इमेसुताः सोमाः॥त्वायवः।त्वदिच्छवः।वर्तते।युष्मदः क्यच्।तदंताउः।इदुर्घटत्वादिदमध्यात्मेयोजयति॥सूक्ष्मेति॥सूक्ष्मा
र्थग्राहिणीभिः प्रमाभिःमनांसिशोधितानीतिशेषः॥ननुबाह्यसोमस्थानेऽध्यात्ममनसोग्रहणेकिंनिमित्तं।देवतैक्यमित्याह॥सोमानामिति॥देवता

त्वदिच्छवइमेसोमाः पटीभिः सूक्ष्मतंतुभिः॥विस्तृतस्यशोधिताः सूक्ष्मप्रमाभिर्वामनांसिच॥
सोमानांमनसांचैवदेवताः सोमरश्मिगाः॥सोमभृत्याः समस्तस्यसोमएवाधिपोहरिः॥

स्वपिकथंसोमशब्दवृत्तिर्येनरसेषुमनः सुत्वतद्वृत्तिरित्यतउक्तं।सोमरश्मिगाइति॥सोमभृत्याइतिच॥सोमरश्मिगततयासोमभृत्यतयाचतत्र
सोमशब्दवृत्तितत्संबंधाद्रसेषुमनः सुचेतिभावः।पक्षांतरमाह॥समस्तस्येति॥समस्तस्य।सोमानांमनसांचसोमएवदेवता।तथाचनपरंपराश्रयण
मितिभावः।ननुपरमेश्वरः समस्तस्यदेवतातत्कथमेतदित्यतआह॥अधिपइति॥हरिः सर्वाधिपएवनत्वभिमानीत्यर्थः।अनेनत्वावयवइत्येतदपिसमर्थितं
भवति॥४।५॥

इंद्रायाधियेषितः।अस्मद्बुध्या।हेइंद्र।धिया।अस्मद्बुध्या।इषितः।अधीष्टः।प्रार्थितइतियावत्।अथवाधिया।स्वबुध्या।प्रेरितः विप्रजूतः।ब्राह्मणैर्ऋत्विग्भिर्भक्त्या
प्रेरितः।त्वांवाघतः।अंजसावदतःस्तुवतः होतुः सुतवतः सोमवतः।यजमानस्य।सोमयुक्तानि।ब्रह्माणिसुक्तिवाक्यानिउपयाहि।होतुर्ब्रह्माणि।यजमानस्यसो

इंद्रायाहिधियेषितोविप्रजूतः सुतावतः॥उपब्रह्माणिवाघतः॥५॥ ५॥इंद्र।आ।याहि।धिया।इषितः।विप्रजूतः।सुतऽवतः॥उप।
ब्रह्माणि।वाघतः॥५॥५॥अस्मद्बुध्याप्रार्थितोवास्वबुध्याप्रेरितोथवा॥ब्राह्मणैः प्रेरितोभक्त्यावदतोहोतुरंजसा॥ब्रह्माणिसोम
युक्तानियजमानस्यवेच्छतः॥उपयाह्यपियःकोपिसाधकोयज्ञकृन्मतः॥मानसोवाचिकोवास्याद्यज्ञोहोताह्यन्स्तच॥५।५॥

मान।अत्रसोमशब्दाभावेपिसुतवतइतिपदसामर्थ्यात्सोमानितिलभ्यते।अध्यात्मंसुतवच्छब्दंव्याचष्टे॥इच्छतोवेति॥मनोहि।सोमः।तद्रूपाचेच्छा।अ
तः सुतवतः।इच्छतइत्यनर्थांतरं।ननुध्यात्मंकोयजमानः कश्चयज्ञः।कोवाहेतेत्यतआह।यः कोपीति॥साधकोमोक्षस्य।सच।सएवसाधकः।यदापरमेश्वरमा
श्रयन्भवतितदाहोताचोच्यतइत्यर्थः॥५।५॥

इंद्रायाहि तूतुजानः। अत्र तूतुजानशब्दं व्याचष्टे॥ वेगवानिति॥ तुजिर्गत्यर्थः। तस्माच्छंदसि पृत्रार्थे यङ्। तस्य लुक्। ततश्च नशः। हरिवइत्येतद्व्याचष्टे॥ संसारमिति॥ हरतेः कर्तरी कारः। हृतुवर्तने। अस्मादकनुडिच्च। संसारमितियोग्यतया संबंधः। भक्तानां संसारं हरति वर्ततेच। उपसंहरन्वर्तत इति यावत्। येनकारणेन। तेन हरिवाः। परमेश्वरः। तस्य संबुधिः हरिव४। अथवा हरिभिः हरिनामकैरश्वैर्वर्तत इति हरिवाः पुरंदरः। हरण्यादिस्व ध्यात्म

इंद्रायाहि तूतुजानउप ब्रह्माणि हरिवः॥ स्कुते दधिष्व नश्चनः॥ ६।५॥ इंद्र। आ। याहि। तूतुजानः। उप। ब्रह्माणि। हरिऽवः। सुते। दधिष्व। नः। चनः॥ ६।५॥ वेगवांस्तूतुजानस्यात्संसारमुपसंहरन्॥ वर्ततेयेन हरिवा हरिभिर्वर्तते ऽथवा॥ हरणाद्धि षयाणां च प्राणाहरयईरिताः॥ तेषु वर्ततइत्यस्मा त्तान्वा पिगमयेदसौ॥ हरिवा हरिवान्वापि विष्णुनावर्ततेऽथवा॥ चनोमन इति प्रोक्तं सुखं

विषयं। गमयेदित्यनेनांतर्णीतण्यर्थो निरिस्कृतं भवति। वातेवेदं रूपं। हरिवान्वापि। हरिनामकाश्ववानितिवा। छंदसीर्यइतिमतोर्वः। मतुवसोरु संबुधौ छंदसीतिरुत्वं। अथवा हरिर्णाविष्णुनाप्रेरितो वर्तत इति हरिवाः इत्यर्थः। चनः शब्दार्थमाह॥ चनइति॥ चित। चनोधाः सहसोयताहो दुग्योदो। हे हरिवः। इंद्र। नः। ब्रह्माणि। स्तुतिरूपवाक्यानि प्रति। तूतुजानः। उपायाहि। आगत्य च। नः। सुते। अस्मदीये सोमे चनः। मनः। दधिष्व। धत्स्व। अस्मदी

इंद्रायाहि चित्रभानो। चित्रभानुशब्दं व्याख्यातुं चित्रशब्दार्थं तावदाह॥ चित्रमिति॥ चित्रं भद्रमित्येकोर्थः। चित्रमालेख्यमद्भुतमित्यभिधानात्। चितोसर्वजीवचैतन्येनियामकतया न तमित्यपरथ। चिछब्दोपपदाद्रमतेर्डः। चिद्रते। अजडस्फुरवात्मकत्वादित्यन्यः। चिञ्चसारतिश्चेतिचित्री। पदसंज्ञानाश्रयणाज्जस्त्वाभावः। चायनीयत्वात्। दर्शनीयत्वात्पूजनीयत्वादित्यर्थांतरत्वं। चायृपूजानिशामनयोरित्यस्मात्कर्मणि इत्रप्रत्ययोडिच्च। चितश्चैतन्यस्य। स्वर

इंद्रायाहि चित्रभानोसुताइमेत्वायवः॥ अण्वीभिस्तनापूतासः॥ ४॥ ५॥ इंद्र। आ। याहि। चित्रभानो इति चित्रभानो॥ सुताः। इमे। त्वाऽयवः। अण्वीभिः। तना। पूतासः॥ ४॥५॥ चित्रंभद्रं रतं चितौ॥ चिद्रतेश्चायनीयत्वाददनाद्वा चितोऽभिदा॥ तादृशार्श्चमयोज्ञानमस्येति भगवोन्यर४॥ चित्रभानुरिति प्रोक्तस्तेजोवातादृशं प्रभो॥

पर्स्यैव। अदनात् अनुभवाद्वा। चित्रं। रातेरदनार्थत्वं अनेकार्थत्वाद्धातूनां। इदानीं चित्रभानुशब्दं व्याख्याति॥ अभेदेति॥ तादृशाश्चित्राः भानुशब्दार्थरश्मयइत्यनूद्य ज्ञानमितिव्याख्यानं॥ ननु चितो रतत्वादीनां भगवद्धर्माणां कथं ज्ञानतजे धर्मत्वमित्यत उक्तं॥ अभिदेति॥ ज्ञानतेजसो४ परमेश्वरेणाभिदोकारणेनोक्तं इत्युक्तं इत्यर्थः॥ भगवांश्चेत्तर्हि परो मुख्यचित्रभानुः। अन्यस्तुयथासंभवमितिभाव४॥

देवतापक्षेसर्वशब्दपर्यायोवाविश्वशब्दइत्याह॥सर्वेवेति॥अथवाविश्वांप्रजानांवानाकर्मनाह्वानाद्। विश्वेवांतीतिविश्वे॥ननुअवेशनाद्विश्वांवानादि
तिपक्षद्वये विश्वेइतिरूपंनसिध्यति। सर्वशब्दपर्यायस्यैवविश्वशब्दस्यसर्वनामसंज्ञास्मरणात्। सर्वनाम्नत्वपरस्मजसःशीभावविधानादितितत्राह।
शब्दइति॥यथाखलुकस्मैदेवायहविषाविधेमेत्यत्रप्रजापतिपर्यायस्यकशब्दस्यसर्वनामसंज्ञाभावेपिसर्वेविधयःछंदसिबहुलंभवंतीतिसर्व

सर्वेवाथविश्वांवानाछब्दःकस्मैयथाभवेत्॥दातारोयजमानावापि॥१॥६॥

नामकार्यंदृश्यते॥एवमिहापिविश्वशब्दस्यसर्वनामसंज्ञाभावेपिसर्वनामकार्यंजसःशीत्वंभविष्यतीति॥दाश्वांसइत्यस्यदातारोयजमानाइत्य
र्थद्वयं।दाशृदाने।यजमानावेतिदेवतांतरविषयं।हे।ओमासः।ओमाः।चर्षणीधृतः।चर्षणीनांधर्तारः।दाश्वांसः।यजमानानां।विश्वेदेवा।दाशु
षः।दातुः।यजमानस्यवा।सुतंसोमंप्रति।आगत।आगच्छत॥७॥६॥समस्तवेदप्रतिपाद्यभगवद्रूपायज्ञभागभोक्तृदेवताभ्योवासोमग्रहणार्थंप्रार्थना॥

विश्वेदेवासोअप्तुरःसुतमागंततूर्णयः॥उस्राइवस्वसराणि।अप्तुरः।अप्शब्दःकर्मवाची।तुरत्वरणे।ततःक्विप्।अतोअप्तुरः।कर्मवेगिनः।एवंशब्दे

विश्वेदेवासोअप्तुरःसुतमागंततूर्णयः॥उस्राइवस्वसराणि॥२॥ ॥विश्वे।देवासः।अप्ऽतुरः।सुतं।आगंत।
तूर्णयः।उस्राःऽइव।स्वसराणि॥२॥ ॥अप्तुरःकर्मवेगिनः॥उस्रास्सूर्यरश्मयश्चैवस्वसराणिदिनानिच॥२॥६॥

नाभिधानिकत्वान्निर्वचनानपेक्षत्वंसूचयति॥हेअप्तुरः।विश्वेदेवाः।स्वसराणिदिनानिप्रति।उस्राइव।रश्मयइव।तूर्णयः।त्वरिताःसंतः।अस्मदीयंसुतं
सोमं।आगंत।आगच्छत॥२॥६॥८॥

३७ विश्वेदेवासो अस्त्रिधः। स्त्रिधु हिंसार्थः। ततः क्विप्। नविद्यते स्त्रिदू येषांते। अस्त्रिधः। अहिंस्याः। एतद्रूगवरूपमादयति॥ असंसारादिति॥
देवतांतरे घटयति॥ देवाश्चेदिति॥ मोक्षनिश्चयात्। उपचारेण अस्त्रिध इत्यर्थः। आइत्यस्य समंतत इति व्याख्यानं। इत्शब्द इच्छावाची।
इकारउच्यते काम इति वचनात्। इषुइच्छाया मित्यस्मात् डिः। अतउक्तं॥ यथेष्टेति॥ हिशब्दः प्रसिद्धवाचित्वा न्निश्चितार्थः। मंत्रार्थः॥

विश्वेदेवासो अस्त्रिध एहिमायासो अद्रुहः॥ मेधंजुषंत वन्हयः॥ ३॥ ६॥ विश्वे। देवासः। अस्त्रिधः। एहिऽमा
यासः। अद्रुहः। मेधं। जुषंत। वन्हयः॥ ३॥ ६॥ असंसारादस्त्रिधस्ते देवाश्चेन्मोक्षनिश्चयात्॥ यथेष्टनिश्चितज्ञा
नाएहिमायाः समंततः॥ अद्रुः खत्वाद द्रुहस्ते मेधं यज्ञं जुषंतु नः॥ वन्हयो वहनादस्य॥ ३॥ ६॥

श्चोज्ञानार्थः। प्रजानाम रूपाठात्। सर्वविषयस्वतंत्र निश्चितज्ञाना इत्यर्थः। द्रुहकेरार्थः। ततः संपादित्वा क्विप्। नविद्यते ध्रुक्येषांते
अद्रुह इत्यभिप्रेत्योक्तं। अद्रुःखत्वादिति॥ जुषंतजुषत॥ सेवध्वं। तस्यतास्यैते जुषंत्विति। अस्यजगतः। वहनात् स्ववर्तनात्। वहतेरौणा
दिको निः॥ ३॥ ६॥ व्यास
३७

ओमासः। आसमंतात्। आइत्यनुवादः। समंतादिति व्याख्यानं। उइतिनिपात ऊरीकरणे वर्तते॥ आ। समंतात्। उ। ऊरीकृताः। माः प्रमाः येस्ते। ओमा इ
तिप्रकीर्तिताः। चशब्दो व्याख्यानसमुच्चये। सर्वविषयज्ञानवंत इत्यर्थः। इदंच परमेश्वरे मुख्यं देवेष्वमुख्यं। अनामेत्यनेनों शब्द समानार्थः ओशब्दः।
मानिर्माण इत्यस्मात्कर्मणि कप्रत्यये इदं रूपं भवति। ॐ नामकेन विष्णुनामिता निर्मिता इति वा ओमाः। इदं च व्याख्यानं भगवद्विषयमित्याह॥

ओमासश्चर्षणीधृतो विश्वेदेवास आगत॥ दाश्वांसो दाशुषः सुतं॥ १॥ ६॥ ओमासः। चर्षणिऽधृतः। विश्वे। देवा
सः। आ। गत। दाश्वांसः। दाशुषः। सुतं॥ १॥ ६॥ आसमंतात् स्वीकृता मा ओमा इति चशब्दिताः॥ ओना मा भगवान्विष्णु
स्तेन वा निर्मिताः सुराः॥ ओतामानेषु मावेषु प्रोता ओमा इतीरिताः॥ प्रजाश्चर्षणयः प्रोक्ता विश्वे ते च प्रवेशनात्॥

सुरा इति॥ ओशब्दः ओतत्ववाची। अवतिरूपत्वादोताः प्रविष्टाः मानेषु प्रमाणेषु प्रतिपाद्यतयेति वोमाः॥ उपसर्जनस्य परनिपातः। माः प्रमाः।
एषु प्रोताः प्रतिपादकतया प्रविष्टा इति वा ओमा ईरिताः। ओतामाएषु तथोक्ता इति प्रोक्ता नैघंटुकैः। ते भगवद्रूपविशेषाः। देवाश्च। प्रेरक
तया सर्वत्र प्रवेशनाद्विश्वे च प्रोक्ताः विशप्रवेशने। ततो वक्विच्॥

३८ ननु हरेरस्त्रीलिंगप्रयोगः कथं। यदि स्त्रीत्वात्कथं तर्ह्यग्न्यादिपुल्लिंगप्रयोगः॥ तत्राह॥ स्त्रीरूपइति॥ एवं चेद्ब्रह्मादिपदप्रयोगान्नपुंसकरूपोप्यंगीकार्यः किं नेत्याह॥ नेति॥ कथं तर्हि नपुंसकलिंगप्रवृत्तिरित्यत्रेत आह॥ स्त्रीति॥ शेषाः पुरुषाभिलापादयः॥ वाजिनीवतीशब्दं व्याख्यातुं वाजिनीशब्दार्थं तावदाह॥ अन्नेनइति॥ वाजमन्नं। तदेव तृतीयातिशायइतिवाजि। तन्नयतीति वाजिनीः सूर्यः। अस्य तत्पर्यमन्नेनइति। यद्वा वाजस्येनो वाजेनः स

स्त्रीरूपश्चैव पुंरूपो भगवान्न नपुंसकः॥ स्त्रीपुंदोषविहीनत्वात् पितछद्गोचरः॥ अन्नेनो वा जिनामीनो वाजिनी सूर्य उच्यते॥ वाजिनी
छंदसां वापि स्वामी प्रोक्तः स वाजिनी॥ छंदांस्यश्वा यतस्तस्य ते चेअन्यवाजिनं॥ अन्नवत्वाद्वाजिनी वाक् ज्ञानपुष्टत्वतोपि वा॥ ७॥

एव वाजिनी सूर्यः। अविभक्तिकोनिर्देशः। अथवा वाजिनाम अश्वानाम् अन्नवतां वा इनो वाजिनः स एव वाजिनीः। पूर्ववदुभयथा विवरणं। अथवा वाजिनो अश्वान् अभिनानि सप्त छंदांसि वाजीनानि तान्येव शकंध्वादित्वाद्वाजिनानि। तान्यस्य संति तेषां स्वामीति वाजिनी। वाजिनां छंदसां स्वामित्वं कथं सूर्यस्येत्यत आह॥ छंदांसीति॥ वाजिनीशब्दस्यान्यदप्यभिधेयमाह॥ अन्नवत्वादिति॥ वाजमन्नं पुष्टं वा तदस्यास्तीति वाजिनी। वाचो पुष्टवत्वोपपादनाय ज्ञानग्रहणं॥ ज्ञानार्थं पुष्टं वादादि॥ व्यास ३८

अस्त्वेवं सूर्यस्य वाचश्च वाजिनीत्वं ततः किमित्यत आह॥ सइति॥ सः सूर्यः। तस्या विष्णुरव्यायाः प्रसिद्धायाश्च सरस्वत्याः पुत्रः। वाक् पुत्री। तद्देवी तदुभयवत्वाद्वाजिनीवती। ननु वागपि सरस्वती तत्कथं तद्वतीत्यत आह॥ वायुमेति॥ एवंविधा सरस्वती। नः अस्माकं। यज्ञं। वाजेभिः वाजैः अन्नैः अन्नैः बहिः। अध्यात्मं ज्ञानपुष्टैश्च। वष्टु वहतु प्रवर्तयतु। विकरणलोपः षत्वं च छंदसत्वात्। अन्नादिदत्वेत्यर्थः। तदुपपादयति॥ अन्न

सपुत्रो वायुमातस्याः पुत्रीत द्वाजिनीवती॥ सरस्वती हविर्वापियज्ञं वहतु नोऽन्नैः॥
अन्नदा हि सदा देवी धियासहवसे यतः॥ धिया वस्तुर्नित्यबोधा॥ ४॥ ६॥ ७५

देति॥ अनेन वाजिनीवतीत्यस्य पर्यायो गोऽभिहितो भवति॥ अत एव वाजेभिरुपेतं नो यज्ञं वष्टु इच्छत्विति व्याख्यानेन कृतं। अन्नमित्युपलक्षणं॥ धियासहवसे इत्यनेन वसतेरुकारप्रत्ययः। तेन सहार्थतृतीयायाः समासे लुक् कृतं भवति। नित्यबोधेति तात्पर्यकथनं॥ ४॥ ६॥

चोदयित्री। सूवाचां। सरस्वती। सूनृतानांसू वाचां। चोदयित्रीसदाप्रेरका। सूमतीनांसू बुद्धीनां। द्वितीयार्थेषष्ठी। चेतंतीचेतयंती। अत्रणि
३९ लोपस्यनिमित्तमाह॥ स्वातंत्र्यादिति॥ चेतंतीशब्दःस्वातंत्र्यविवक्षयालुप्तोयोयस्यसलुप्तयोभवेत्। यइतिणेरुपलक्षणं। स्वातंत्र्यस्नेहयोरं

चोदयित्रीसूनृतानांचेतंतीसूमतीनां॥ यज्ञंदधेसरस्वती॥ ५॥ ६॥ चोदयित्री। सूनृतानां। चेतंती। सूऽमतीनां॥ यज्ञं। दधे॥
सरस्वती। ५। ६। सूवाचांप्रेरकासदा॥ सूबुद्धिज्ञापिकासैवस्वातंत्र्याल्लुप्तयोभवेत्॥ अनेनैवप्रकारेणसैवयज्ञादिधारिणी॥ ५॥ ६॥

तणशितणिजितिस्मरणात्। ततश्चस्वातंत्र्येणसूबुद्धिज्ञापिकेत्यर्थः। तदिदमुक्तंसैवेति॥ एवंभूतासरस्वती। यज्ञंदधे। अनेनोक्तप्रकारेण। वाग्बु
द्धिप्रवर्तकत्वेनयज्ञादिधारिणी। वाग्बुद्धिमूलत्वात्सर्वकर्मणां॥ ५॥ ६॥ वाग्बुद्धिमूलकसर्वकर्मप्रवर्तकसरस्वतीप्रवर्तकवायुप्रवर्तकायनमः॥ ७॥ व्यास
३९

पावकानःसरस्वती। शोधकत्वात्। सरस्वतीशब्दं व्याख्यातुंसरःशब्दार्थंतावदाह॥ सरणादिति॥ सर्वत्रगमनात्। तस्यैवतात्पर्यंसर्वगतत्वेनेति।
सगतौ॥ तस्मादसून्प्रत्ययः। गत्यर्थानांज्ञानार्थत्वात्सर्वज्ञोवासरः। सरसः। ससारइतिवासरः। बलवानित्यर्थः। रसाकारलोपः। सरतिवात्स
सूरवत्वात्। रमेरसून्डिच्च। सहरसा। रत्यावर्ततइतिसरः। तद्वती। सरःशब्दार्थोहरिरस्याविद्यतइति। इदंचव्याख्यानंदेवतांतरविषयं।

पावकानःसरस्वतीवाजेभिर्वाजिनीवती॥ यज्ञंवष्टुधियावसुः॥ ४॥ ६॥ पावका। नः। सरस्वती। वाजेभिः। वाजिनीऽवती। यज्ञं।
वष्टु। धियाऽवसुः॥ ४॥ ६॥ शोधकत्वात्तुपावका॥ सरणात्सर्वगत्वेनसर्वज्ञोवासरोहरिः॥ सरसःसरतिद्वातद्वत्येवसरस्वती॥ ह
रोगुणाःसरःशब्दाःदेवीतुहरिवाचिनी॥ हरिप्रियत्वतोवायुःसरस्वांस्तत्प्रियाथवा। गुणस्त्वेनततद्वांस्तोभगवांस्तुसरस्वती॥ ७॥

हरोतुविवक्षितेउक्तनिरुक्त्यागुणाःज्ञानादयःसरःशब्दोयेषांतेसरःशब्दाः। तद्वत्वात्सरस्वती। देवतांतरस्यपरमेश्वरवत्वंनामकिमित्यतआ
ह॥ देवीत्विति॥ वेदाभिमानित्वात्। उक्तनिर्वचनेनहरिःसरस्वद्वत्वात्तत्प्रियत्वतः। तत्प्रियातद्भार्येतिवा। अन्यासरस्वती। उक्तनिरु
क्त्यागुणाःसरःशब्दार्थाः। तएवस्वंधनंसरस्वंतेनततद्वाप्तत्वात्सरस्वतः। सरस्वतशब्दात्स्त्रियामीकारः॥ ७॥

अत्रसूक्तमनुवाकोवर्गश्चपरिसमाप्तः। ततः सूक्तादिस्वरूपजिज्ञासायामाह॥ सूक्तमिति॥ अनारतंप्रोक्तं। निरंतरपठितं। मूलवेदेऋचांयः क्रमः तत्रऋचोऽनंतरिताः कृत्वा यावत्पठितं तावदुपवेदेसूक्तमुच्यते। ऋषिभिर्दर्शनसमये यावन्निरंतरकालेदृश्यते सोऽनुवाकउच्यते॥ यद्वैककालिकेत्यस्यविराममकृत्वैकस्मिन्नेवकालेपठनीयेत्यर्थः। उक्तस्यापवादमाह। अन्यथात्वंचेति॥ मूलवेदादुद्धृतेषूङ्गिगदा

सूक्तंत्वनारतंप्रोक्तं अनुवाकैककालिका॥ अन्यथात्वंचतत्रस्यादावापो
द्वापतस्तृचां॥ वेदानंतत्वविज्ञप्त्यैतौचक्रेबादरायणः॥ श्रीरामप्र०॥

द्युपवेदेषुयदनारतप्रोक्तंतयासूक्तमुक्तंतत्रतस्यततोप्युद्धृतवेदादिषुऋग्वेदादिषवांतरवेदेष्वन्यथात्वंचस्यात्। कथं। तृचामावापोद्वापरूपक्रमेण तत्क्रमपठितानां कासांचिदृचामुद्वापः स्थानांतरस्थानांतत्रावापइति। उपवेदगतसूक्तांतर्गतऋक्संबंधत्वेनावांतरवेदेसूक्तसंज्ञेतिज्ञातव्यं। आवापोद्वाप करणेकोहेतुरित्यतआह॥ वेदेति॥ इदंतुवक्ष्यमाणविवरणानुसारेणप्रतिपत्तव्यं॥

भवेदेतद्यदिमूलवेदादुपवेदानांततोऽवांतरवेदानांचोद्धारेणप्रबंधनिर्माणंप्रामाणिकंस्यात्तदेवकुतइत्यतआह॥ ऋचइति॥ ऋगुङ्गिगदसामानीतिमूलवेदादुद्धृताउपवेदाउच्यंते। ततोमूलवेदादुपवेदास्ततश्चावांतरवेदाउद्धृताइत्येततदेवंपुराणवचनादवगम्यतइत्यर्थः॥ तथोपवेदादिक्रमःकृत्रिमः एवंशाखाप्रभेदोपीत्येतत्संगादोह॥ ऋचइति। ऋचइतिप्रस्तुतत्वादुक्तं। यजुरादिकंचैवज्ञातव्यं। एवमावापोद्वारावुपपाद्यतत्रलिंगंवद

ऋचःसमृचउद्धृत्यऋग्वेदंकृतवान्प्रभुः॥ यजूंषिनिगदांश्चैवतथासामानिसामतः॥ एवंपुराणवचनादुद्धृताहितत्स्ततः॥ ऋचःशाखात्वमापन्नाः
शिष्यतच्छिष्यकेरिमाः॥ मानस्तेनेतिपूर्वास्तृन्यूनताहदृश्यतेर्थतः॥ पुनःशेषोदिताभ्यश्चपठ्यंतेन्यत्रकाश्चन॥

दृश्यति॥ मानइति॥ मानस्तेनेभ्योयेअभिद्रुहस्पदेनिरामिणोरिपवोन्नेषुजागृधुः॥ आदेवानामोहतेविव्रयोहृदिस्व तेनपरःसाम्नोविदुरित्येतस्यामृचिपूर्वोत्तरार्धयोरसंबद्धार्थत्वेनार्थतोन्यूनतादृश्यतेततोज्ञायतेत्रांतरितंवाक्यमस्तीति। एवमन्यत्रापि। किंचशुनश्शेपस्तावदृचांराद्धंक्रमेणददर्शे तिब्राह्मणं। तासामवांतरवेदेश्रूनःशतमेवद्वितीयाध्यायेदृश्यते॥ ताभ्योन्यस्त्वन्यत्रपठ्यंते॥ तेनज्ञायतेऋचामितउद्वा पोद्वापिइति॥ ॥

किंचात्रमधुछंदसा दृष्टास्वपि ऋक्षु नायमेव क्रम इत्याह ॥ अत्रापीति ॥ अक्रमतो दृष्टिरित्यवांतरवेदेष्वक्रमः तमुल्लंघ्यैव मधुछंदसो दृष्टिरित्यर्थः ॥ यद्वा
४१ मूलवेदोपवेदयोर्यः क्रमस्तमुल्लंघ्यैवावांतरवेदेत्र माधुछंदसे प्रकरणे ऋचो दृश्यंत इत्यर्थः ॥ इतिनैकक्रमोभवेत् । मूलवेदोपवेदावांतरवेदेष्वितिशेषः ॥
वेदानंतत्व विज्ञप्त्या आवापोद्वापाभ्यां संक्षेपः कृत इत्युक्तं तदसत् ॥ अनंता वै वेदा इत्यादिनैव तज्ज्ञप्तिसंभवादित्यत उक्तं विवृणोति ॥ अनंतत्वादिति ॥
अनंतत्वात्तु ऋक्प्रकारेण कर्मकरणाशक्तेरितिशेषः ॥ इतश्च न मूलवेदादिष्वेक प्रकारतेत्याह ॥ अष्टकेति ॥ मूलवेदादावविद्यमानमेवेतिशेषः ॥ उ

अत्राप्यक्रमतो दृष्टिरितिनैकक्रमोभवेत् ॥ अनंतत्वात्तु वेदानां प्रायः कर्मानुसारतः ॥ संक्षेपं कृतवान्देवः शिष्याश्च तदनुज्ञया ॥
अष्टकाध्यायवर्गादिभेदं च कृतवान्स्वयं ॥ स्वाध्यायविश्रमार्थाय तस्मात्क्रमविपर्ययः ॥ तत्र तत्रैवांतरिता दृश्यंते च खिला अपि ॥
यत्रार्थे न विशेषोस्ति पदांतरितता त्र च ॥ यत्राल्पोपि विशेषोस्ति पदं नांतरितं भवेत् ॥

धारे लिंगांतरं च दर्शयति ॥ तत्रेति ॥ खिलाः परिशिष्टाः ॥ नन्वयमुद्धारः कथं ज्ञायत इत्यत स्तस्य ज्ञापकं लेशेन दर्शयति ॥ यत्रेति ॥ यत्र वा
क्य द्वयस्यार्थे विशेषो नास्ति । तत्र येन पदेन सा पुनरुक्तिः परिहृता स्यात्तत्पदमंतरितं ज्ञातव्यं । यत्र तु विनापि पदांतरमल्पेनापि विशेषे
णाश्रुतेनैव पुनरुक्तिपरिहारः स्यात्तत्र पदांतरितता न कल्पनीया ॥ एवमन्यान्यपि लिंगानि गवेषणीयानीति ॥ अनेनैव वर्गस्क्ति सामयि

महो अर्णः । तेजस्त्वान्महत्वतश्चेति महःशब्दस्यार्थद्वयं ॥ अरमानंदरूपत्वादर्णः । सा । देवी । सरस्वती । महो अर्णः परं ब्रह्म । केतुना ज्ञानेन । भक्तेभ्यो
महत्तरं ज्ञानं दत्वा । प्रचेतयति । ज्ञापयति । महत्तरमिति वदता प्रशब्दस्य तात्पर्यमुक्तं भवति ॥ इदं तु देवतांतरविषयं ॥ भगवद्विषये तु देवः

महो अर्णः सरस्वती प्रचेतयति केतुना ॥ धियो विश्वा विराजति ॥ ६ ॥ ६ ॥ महः । अर्णः । सरस्वती । प्रचेतयति । केतुना । धियः ।
विश्वाः । वि । राजति ॥ ६ ॥ ६ ॥ महो अर्णः परं ब्रह्म तेजस्त्वान्महत्वतः ॥ अरमानंदरूपत्वात्तदर्णो हि निरुक्तिवाचकः ॥ साज्ञापयति
सा देवी ज्ञानं दत्वा महत्तरं ॥ महो अर्णः स्वयं देवः स्वमात्मानं प्रकाशयेत् ॥ विराजयति विश्वाश्च धियः स्वज्ञानदानतः ॥ ६ ॥ ६ ॥

स्वयमेव । महो अर्णः । स्वं । आत्मानं । केतुना प्रचेतयति प्रकाशयेदिति । तत एव स्वज्ञानदानतो भक्तानां विश्वा दयः सर्वबुद्धीः विरा
जति । स्वज्ञानवती हि बुद्धिर्विराजते ॥ ६ ॥ ६ ॥ श्री महो अर्णायनमो नमः ॥ ५ ॥

अथाते। तस्मात्। यस्मात्त्वं ज्ञानादिमतोऽभिप्रेतार्थदायी। अथ तस्मात्। वयं ॥ उत्तमोत्तमगणनस्यांते मिताः प्रमिताः उत्तमोत्तमा इति यावत्॥ याः ते तव॥ त्वद्विषयाः सुमतयः॥ तासां॥ अंतमानां॥ सुमतीनां॥ अंतमाः॥ सुमतीः॥ विद्याम लभेमहि॥

अथा ते अंतमानां विद्याम सुमतीनां॥ मा नो अति ख्य आ गहि॥ ३॥ ७॥ अथ। ते। अंतमानां॥ विद्याम॥ सुऽमतीनां॥ मा॥ नः॥ अति॥ ख्यः॥ आ॥ गहि॥ ३॥ ७॥ तस्माल्लभेम सुमतीस्तव॥ अंतेमितास्त्वद्विषया मतयो ह्युत्तमोत्तमाः॥ अस्मानतीत्य मा पश्य करुणार्द्रदृशा सदा॥

व्यत्ययात्॥ त्वं च नः अस्मान्॥ अति। अतीत्य॥ अन्यान्। सदा। मा ख्यः। मा पश्य। मायं न माङ्। अस्मानेव पश्य। आ गहि। आगच्छ। च। क्रूरदृष्ट्यान्यदर्शनमेवाभिमतमिति करुणार्द्रदृशेत्युक्तं॥ ३॥ ७॥ व्यास ४२

परेहि। मन्मनः। हे मन्मनः मदीयं मनः। यद्यपि। त्वं। इंद्रात्। परा। दूरे। वर्तसे। तद्ग्रहणासमर्थं। अथवा ग्राक्रः परमेश्वरः। त्वत्तः परा। दूरे वर्तते। त्वद्विषयो न भवति। अपि। तथापि। तं। विग्रं। वी इत्युपसर्गेन निरर्थे। ग्रह उपादाने। कर्मणि डः। अग्राह्यं। अस्तृतं। अछि

परेहि विग्रमस्तृतमिंद्रं पृच्छा विपश्चितं॥ यस्ते सखिभ्य आ वरं॥ ४॥ ७॥ परा। इहि। विग्रं। अस्तृतं। इंद्रं। पृच्छ। विपःऽचितं। यः। ते। सखिऽभ्यः। आ। वरं॥ ४॥ ७॥ मन्मनो वाथ शक्रो वा दूरेपि परमेश्वरं॥ गच्छाग्राह्यमनष्टं च व्याप्तचित्तं य एव च॥ सखिभ्य उत्तमो नित्यं॥ ४॥ ७॥

न्नं अनष्टं। विपश्चितं। वि इत्यर्वादाप्नोतेरसुन्। धात्वाकारलोपश्च। विपाः व्याप्ता चिद्यस्यासौ विपश्चित्। तं व्याप्तचित्तं॥ अवग्रहदर्शनात् इंद्रं। परमेश्वरं। इहि। गच्छ। शरणं याहि। अवगच्छ वा। तदर्थं गुरून् पृच्छति। यः इंद्रः ते सखिभ्यः आ वरं। आवरः। नित्यमुत्तमं तं। अत्र परेत्युपसर्गस्येहीति क्रियायोगे मरणार्थत्वप्रतीतेरन्यथाव्याख्यातं॥ ४॥ ७॥ ६४

उत ब्रुवंतु। निदः। ये। निदः। तस्य। परमेश्वरस्य। समीपगाः। सृष्ट्यादावेतत्समीपे वर्तमानाः ब्रह्मादयः। ते। उत। तेऽपि। नः। अस्मान्प्रति।
स्व देवं ब्रुवंतु॥ परमेश्वरस्वरूपं यथावद्व्याकुर्वंतु। उतेतिवक्ष्यमाणापेक्षया। निद इत्यव्ययस्य सामीप्यार्थत्वेऽभिधानं वक्ष्यते। येचान्यतः।

उत ब्रुवंतु नो निदो निरन्यतश्चिदारत॥ दधाना इंद्र इद्दुवः॥ ५॥ ७॥ उत। ब्रुवंतु। नः। निदः। निः।
अन्यतः। चित्। आरत। दधानाः। इंद्रे। इत्। दुवः॥ ५॥ ७॥ निदस्तस्य समीपगाः॥ तेपि ब्रुवंतु नो देवं प्राप्नुयेन्वा
न्यतोपितं॥ निर्गत्याज्ञानतस्तस्मात् दधाना ईश्वर एव च॥ दुवः प्राणान्ब्रुवंत्येव तेपि नः परमेश्वरं॥ ५॥ ७॥

स्थानांतरतः। निरुपसर्गस्य श्रवणादारतेत्यनेन च योगायोगादधिकार्थलाभाच्च धात्वध्याहारः। अस्मात्। संसारहेतोः। अज्ञान
तः। निर्गत्यैव। तं परमेश्वरं। आरत प्राप्नुः॥ तेपि ब्रुवंतु॥ इंद्रे इत्। ईश्वर एव। दुवः प्राणान्। आत्मने। विषयान्दुहंतीति दुहेदुः। दधा
ना वर्तंते। तत्प्राप्त्यर्थं तमुपासते। तेपि नः परमेश्वरं ब्रुवंत एव॥ ५॥ ७॥

व्यास
४३

सुरूपकृत्नुं। दशर्चमिदमैंद्रं सूक्तं। विष्टंभं। वयं। द्यविद्यवि। दिनेदिने। गोदुहे। गोदोहिय। संपदादित्वात्क्विप्। गां दोग्धीति गोधुक्। तस्मै गोदु
हे। तदर्थं। दोहायेति शेषः। सुष्टु दोग्धीति सुदुघा। दुहः कप् घश्च। तां कामधेनुमिव॥ तस्मिन्स्थितिर्यस्यासौ तत्स्थितिः। तस्य भगवदाश्र
यस्य यजमानस्य ऊतये। अभिप्रेतार्थसिद्धये। त्राणाय वा। अवतेरुभयार्थत्वात्॥ सुरूपकृत्नुं। साधुरूपाणां कर्तारं। विष्टुं। इंद्रं च। जुहूम
सि। स्वाह्वयामः। ह्वयतेः श्लुः। दार्ष्टांतिके तु ऊतय इति प्रयोजनस्य श्रुतत्वात् दृष्टांते गोदोहायेत्युक्तं। दृष्टांते गोदुह इत्युक्तत्वाद्दार्ष्टांतिके पित

सुरूपकृत्नुमूतये सुदुघामिव गोदुहे॥ जुहूमसि द्यविद्यवि॥ १॥ ७॥ सुरूपऽकृत्नुं। ऊतये। सुदुघांऽइव। गोदुहे॥ जुहूमसि। द्यवि
द्यवि॥ १॥ ७॥ विष्टुं सुरूपकर्तारमभिप्रेतार्थसिद्धये॥ त्राणाय वा कामधेनुमिव दोहात तत्स्थितेः॥ दिनेदिने स्वाह्वयामः॥ १॥ ७॥ उप नः सवना
गहि सोमस्य सोमपाः पिब॥ गोदा इद्रेवतो मदः॥ २॥ ७॥ उप। नः। सवना। आ। गहि। सोमस्य। सोमऽपाः। पिब। गोऽदाः। इत्। रेवतः। मदः॥ २॥ ७॥
ज्ञानदो स्यैव चाधिकं॥ ज्ञानाख्यरयियुक्तस्य हिरण्यादिमतोपि वा॥ सुखकारी भवान्॥ २॥ ७॥

स्थितेरितिशेषोभिहितः। स्मसीत्यादि प्रोक्ताधिक्यविवक्षयेत्युक्तत्वात्स्वाह्वयाम इत्युक्तं॥ १॥ ७॥ उप नः। ज्ञानदः। हे सोमपाः। इंद्र। यो भवान्।
रेवतः। अध्यात्मज्ञानाख्यरयियुक्तस्य। बहिरपित्वर्थार्थं हिरण्यादिमतः। अस्य यजमानस्य इत्। एव। गोदाः। ज्ञानदः। मदः। सुखकारी च।
सत्वं। नोस्माकं। सोमस्य। सवना। सवनानि। उपागहि उपागच्छ। पिब च सोमं। यदि यजमानो ज्ञानाख्यरयियुक्तः किं तस्य ज्ञानदानेनेत्युक्तं। अधि
कमिति॥ क्रिया विशेषणं चैतत्॥ २॥ ७॥

एमारू।आशुवीर्य।विज्ञाब्दोवीर्यवाची।आशु।विः वीर्यंयस्यासावाशुविः।हेआशवे।आशुवीर्य।क्षिप्रकारिसामर्थ्य॥आशुंक्षिप्रं।वेगवंतं।द्र
४४ वत्वात्।यज्ञश्रियं।यज्ञभूषणं।न्टमादनं।पुंमदकरं।कृतपानानांपुंसांहर्षकरं।पतयत्।उत्पतयंतं।मदात्।मदमुत्पाद्य।उत्पतनादि
केव्यवहारेतुं।मंदयत्सखं।मंदयतिसखायमितिमंदयत्सखः।तं।मयूरव्यंसकादिदर्शनात्।यःसोमंपिबतितत्सखीनांमंदत्वेहेतुं।कथं।

एमाशुमाशवेभरयज्ञश्रियंन्टमादनं॥पतयन्मंदयत्सखं॥२।८॥आ।ईं।आशुं।आशवे।भर।यज्ञऽश्रियं।न्टऽमादनं॥
पतयत्।मंदयत्ऽसखं॥२।८॥आशुवीर्यतयैवाशुंसोमंक्षिप्रंमनोपिबा॥आरभस्वोदरेतुष्याह्रदिवायज्ञभूषणं॥
ईमेवपुंमदकरंमदादुत्सतनादिके॥हेतुंमंदत्वहेतुंचतत्सखीनांपुरोगतेः॥२॥८॥ ॥

पुरोगतेः।धावनादौकृतपापानांबलवत्तयाऽकृतपानेभ्यःपुरोगमनात्।एवंभूतंसोमं।आभर।स्वोदरइतिशेषः।अध्यात्मंतुएवंभूतंमनःतु
ष्या।हृदि।साधिदमित्याभरेतिव्यवस्थितोविकल्पः।ईमित्यनर्थकएवेतिव्याख्यातं॥तस्यकेनाप्यन्वयायोगात्तवेत्यध्याहृत्यतवेवेत्यक्तं।तदधी
नमेवसोमत्वंस्वीकुर्विति।सोमस्यद्रवत्वरूपत्वादाशुत्वं।मनसश्चंचलत्वादाशुत्वं।तदुद्रेकेणैवपुंसांमदादिकंभवति।आशवे।आशुत्वार्थमितिव्याख्या न प्रमाणांकिभिमितिमतःसंबुचितमाख्यातं॥२।८॥

अस्यपीत्वा।एनंपीत्वा।शतक्रतो।शतमित्यपरिमितनाम।क्रतुर्ज्ञानं।बहुज्ञान।त्वं।अस्य।एनं।सोमं।पीत्वा।वृत्राणां।तमसां।घनःअभेद्यः
अभवःतमोभिरनावृतोभूरितियावत्॥नतुपरमेश्वरस्यसोमपानोत्पन्नयाशक्त्याऽज्ञानाप्रतिहतिरित्येतत्प्रमाणविरुद्धं।अतोभिप्राय
माह॥प्रसादादिति।येषांसोमःपरमेश्वरेणपीतःतेषुतेनयज्ञेनोदिताद्भगवत्प्रसादादेवमुक्तेषुसत्स्वप्रसादादेवपरमेश्वरस्तमोनसहते॥

अस्यपीत्वाशतक्रतोघनोवृत्राणामभवः॥प्रावोवाजेषुवाजिनं॥२।९॥अस्य।पीत्वा।शतक्रतोऽइतिशतऽक्रतो।घनः।
वृत्राणां।अभवः।प्र।आवः।वाजेषु।वाजिनं॥२।९॥एवंपीत्वाबहुज्ञानाऽभूस्तमोभिरनावृतः॥प्रसादादेवमुक्तेषु
तमोसह्यतयाघनः॥आवृतेरेववृत्राणिह्यज्ञानान्यन्नदंनरं॥प्रावोयुद्धेषुयाधारंभक्तंज्ञानिनमेववा॥२॥९॥ ७॥

अतःसोमंपीत्वावृत्राणांघनोऽभवइत्युच्यते॥नतुसोमपानसामर्थ्येन।तस्याज्ञानानावृत्तिः।असह्यंतमोयस्यासोतमोसह्यः।तमसोस
ह्यइतिवा।अज्ञानेषुवृत्रशब्दनिर्वक्ति।आवृतेति॥सर्वजीवावरणात्।अस्यनिर्वचनस्ययदावृणोत्तद्वृत्रस्यवृत्रत्वमित्यादिश्रुतिप्रसिद्ध
तयाप्राबल्यंसूचयितुंह्येवशब्दो।किंच।त्वंवाजिनं।अन्नवंतं।अन्नदंनरमितियावत्।वाजेषु।अन्नेषु।सर्वभोगविषयेप्रावःअरक्षः।अ
थवावाजिनं।योधारं।वाजेषुयुद्धेषु।प्रावः।नान्नदानादिमात्रेणेश्वरोरक्षतीत्यतःशेषमाह।भक्तंज्ञानिनमिति॥२॥९॥

८५ तंत्वा।योधयामः।हेशतक्रतो।तमेवमुक्तगुणं॥वाजिनं।योधारंत्वां।अध्यात्मं।धनानांसातये।ज्ञानादिधनलब्धये॥वाजेषुयुधेषु।अज्ञा
नाद्यस्मदरिभिः।सह।वाजयामः।योधयामः।शाह्येस्पष्टं॥४॥८॥योरायः।योशेषः।यःइंद्रः।रायः अवनिः।अशेषद्रविणस्यावनिः।अव
निरितिपृथिवीनाम।अवनिरिवाऽवनिः।आश्रयः।अवते रैश्वर्यकर्मणः प्राप्तिकर्मणोवाकर्तर्यनिप्रत्ययः॥महान्।उत्तमः।सुखदः संस्तुतः पा
तंत्वावाजेषुवाजिनंवाजयामःशतक्रतो॥धनानामिंद्रसातये॥४॥८॥तं।त्वा।वाजेषु।वाजिनं।वाजयामः।शतक्रतोइतिशतऽक्रतो॥
धनानां।इंद्र।सातये॥४॥८॥योधयामोवयंतंत्वांज्ञानादिधनलब्धये।अज्ञानाद्यस्मदरिभिः॥४॥८॥योरायो३वनिर्महान्सुपारः सुन्व
तःसखा॥तस्माइंद्रायगायत॥५॥८॥यः।रायः।अवनिः।महान्।सुऽपारः।सुन्वतः।सखा।तस्मै।इंद्राय।गायत॥५॥८॥योशेषद्र
विणावनिः॥सुखदःसंस्तुतःपारस्तस्माइंद्रायगायत॥कंपोशेषग्रहेकापिलज्जयांवापुरातने॥पृथक्त्वेधृष्यतायांवाहरिपादसहितेदि
रश्वेतिसुपारः॥सुन्वतः।यजमानस्य।सखा।तस्मै।इंद्राय।साम।गायत।हेउद्गातारः।यद्वा।गायतिः शब्दमात्रार्थः।तस्मै।तदर्थं।स्तु
तिशब्दान्कुरुतेति॥अशेषेतिकंपार्थउक्तः।तत्रकंपस्याशेषार्थतायांप्रमाणमाह॥कंपइति॥५॥८॥

व्यास
८५

उतनः।अरयोपि।हेदस्म।दस्यतिभेदनार्थः।ततोमक्प्रत्ययः।शत्रुभेदिन्।शत्रूणांहतः।अरिरुत।अरयोपि।कृष्टयः प्रजाः।नः अ

उतनःसुभगांअरिर्वोचेयुर्दस्मकृष्टयः॥स्यामेदिंद्रस्यशर्मणि॥१॥९॥उत।नः।सुऽभ
गान्।अरिः।वोचेयुः।दस्म।कृष्टयः।स्याम।इत्।इंद्रस्य।शर्मणि॥१॥९॥अरयोपिप्रजा
अस्मान्वोचेयुः सुभगान्सदा॥शत्रुभेदिंस्तवेंद्रस्यस्यामेवानुग्रहे सुखे॥१॥९॥ ७ ॥

स्मान्सुभगान्सदा।वोचेयुः।किंच।वयं।इंद्रस्य तव।अनुग्रहे सतीतिशेषः।शर्मणि।सुखे।स्योमेत्।स्यामेव।त्वदनुग्रहेणसुखिनोभवा

सघा। मुक्तौ। अत्र घः। घशब्दोऽवधारणे। वर्तते। ततश्च। सघ। स एव भगवान् नः अस्माकं। आ। समंतात्। योगे। योगार्थं मुक्तौ। सायुज्य
लक्षणाय योगाय भुवत्। अभवत्। विकरणव्यत्ययात्। भवेत्। काल व्यत्ययात्। स एव। राये। अध्यात्मं ज्ञानवित्ताय भुवत्। बहिर्व्यक्तं
स एव च। पुरंध्यां बुद्धौ। सर्वेषां बुद्धिगो भवेत्। कथं बुद्धिः पुरंधिरित्यत आह। बुद्धिरिति। पुरं शरीरं धीयते अस्यामिति पुरंधिः। कर्म

सघानो योग आभुवत्स राये स पुरंध्यां। गमद्वाजेभिरा स नः॥ ३॥ १॥ सः। घ। नः। योगे। आ। भुवत्। सः। राये। सः। पुरं
ध्यां। गमत्। वाजेभिः। आ। सः। नः॥ ३॥ १॥ मुक्तौ योगाय समंताद्भवेन्नो घोऽवधारणे॥ स एव भगवान्ज्ञानवित्ताय
स च बुद्धिग४॥ बुद्धिः पुराश्रयत्वेन पुरंधिः पत्न्यथापि वा॥ पत्न्यर्थत्वे तु तादर्थ्ये सोन्नैः सह न आ व्रजेत्॥ ३॥ १॥

ण्यधिकरणे चेति किः। उपपदस्य नुमागमः छांदसः। बाधे व्याजष्टे॥ पत्नीति॥ अथवा पत्न्यपि पुरंधिरित्यन्वयः। तन्नामसु पाठात्।
तत्र कथं सप्तम्यन्वय इत्यत आह॥ पत्न्यर्थत्व इति॥ पुरंधिशब्दस्य पत्न्यर्थत्वे तु योग इतिवत्सप्तम्यास्तादर्थ्यमर्थः। पुरंध्यां पत्न्यर्थं भु
वदिति। किं च सः। इंद्रः। वाजेभिः वाजैरन्नैः सह। अन्नानि दातुमिति यावत्॥ अस्मान्प्रति। आगमत् आव्रजेत्॥ ३॥ १॥ श्री।

यस्य संस्थे। यस्य स्थितौ। यस्य। इंद्रस्य। संस्थे। घञर्थे कविधानं। स्थितौ। सत्यां। यस्मिन्निंद्रे रथस्थिते सतीति यावत्। समत्सु युद्धेषु। शत्रवः।
हरी। हर्यग्रमपि। न वृण्वते॥ न वृणते। अश्वाग्रमपि न प्राप्नुवंति। तस्मा इंद्राय गायत। अध्यात्मं हरी इत्यस्यार्थमाह॥ मनः पुरो वेति॥ अत्र

यस्य संस्थे न वृण्वते हरी समत्सु शत्रवः॥ तस्मा इंद्राय गायत॥ ४॥ १॥ यस्य। संस्थे। न। वृण्वते। ह
री इति। समत्। सु। शत्रवः। तस्मै। इंद्राय। गायत॥ ४॥ १॥ यस्य स्थितौ न वृण्वते हर्यग्रमपि श
त्रवः॥ मनः पुरो वा विषयहरणान्मन एव च॥ बुद्धिश्च हरिशब्दोक्ते तम आदीनि शत्रवः॥ ४॥ १॥

मनः शब्देन बुद्धेरप्युपलक्षणं। हरिशब्दो मनो बुद्ध्योः कथं वर्तत इत्यत आह॥ विषयेति॥ एवं शनिर्वचनस्फुटतायां। शत्रूनाह॥ तम आ
दीनिति॥ ततश्चैवं योजना। यस्य इंद्रस्य संस्थे। यस्मिन्परमेश्वरे विशेषतो भक्तशरीरे सन्निहिते सति। समत्सु। ज्ञानयुद्धेषु। शत्रवः।
तमः प्रभृतयः। हरी। मनो बुद्ध्योः पुरः। न वृण्वते। मनो बुद्धी नाज्ञानावृते भवत इति॥ ४॥ १॥

४६ सुतपात्रे॥ सोमपे। शुचयः। शुद्धाः सुताः। अभिषुताः॥ दध्याशिरः। दध्याशिराः। दधिविमिश्रिताः। आशिरशब्दो विमिश्रितार्थ इत्येके। अन्येत्वहो रात्रा
न्तरितं दध्याशिरं। ततश्च आशिरं दधियेषु ते दध्याशिराः। तस्य तात्पर्यं दधिविमिश्रिता इति॥ इमे सोमासः। सोमाः। वीतये। वीगत्यादौ पठ्यते। य

सुतपात्रे सुताइमेशुचयोयंतिवीतये॥ सोमासोदध्याशिरः॥५॥१॥ सुत॰पात्रे। सुताः॥
इमे। शुचयः। यंति। वीतये। सोमासः। दधि॰आशिरः॥५॥१॥ सोमपे शुचयः सोमाः प्राप्ये
दधिविमिश्रिताः॥ मनांसि ध्यानयुक्तानि वायांति हरये सदा॥५॥१॥

जमानस्येंद्रप्राप्त्यै। सुतपात्रे। सोमपे। आतो मनिन्क्वनिब्वनिपश्चेति वनिप्। इंद्राय। यंति। यांति। गत्यर्थकर्मणीति चतुर्थी। अध्यात्मे
सुताः। वेदवाक्यसंघर्षवंतः। शुचयः। रागादिविधुराः। दध्याशिरः। आदृगमहनजनः किकिनौ लिट् चेति किप्रत्ययः। दधिः परमेश्वरे धा
रणं। ध्यानमितियावत्। तेनयुक्ताः सोमाः। मनांसि। सुतपात्रे मनसा सेव्याय। सदा यंति। वीतये तस्मा इत्यर्थमिति॥५॥१॥ श्री॥ व्यास

४७

आ त्वेता॥ दशर्चमैंद्रं सूक्तं। हे सखायः। स्तोमवाहसः। स्तोमाः सामविशेषाः। तान्वहंतीति स्तोमवाहसः। छांदसो ह्रस्वः। उद्गाता इतियावत्। एत
आगच्छत। आनिषीदत। आगत्योपविशत॥ इंद्रं। अभि। प्रगायत। च। आगमननिषीदनयोरित्थंभावस्तु चकारः। तु शब्दः। स्पष्टत्वाद्वचो न व्या
ख्यानं कृतं। एवमन्यत्रापि॥१॥१॥७॥ पुरूतमं। सुपूर्णानां। पुरूणां। सुपूर्णानां मध्ये। पुरुतमं। पूर्णतमं। वार्याणां। वरेण्यानां। उपादेया

आत्वेतानिषीदतेंद्रमभिप्रगायत॥ सखायस्तोमवाहसः॥१॥१॥ आ। तु। आ। इत। नि। सीदत। इंद्रं। अभि। प्र। गायत। सखायः।
स्तोम॰वाहसः॥१॥१॥ पुरूतमं पुरूणामीशानं वार्याणां॥ इंद्रं सोमे सचा सुते॥२॥१॥ पुरूतमं। पुरूणां। ईशानं। वार्याणां। इंद्रं। सोमे।
सचा। सुते॥२॥१॥ सुपूर्णानां पूर्णतमं वरेण्यानामधीश्वरं॥ सुते सोमे सुखेनैव सचा गायत तं प्रभुं॥२॥१॥

नां। वस्तूनां। ई[illegible]शानं। अधीश्वरं। इंद्रं। तं। प्रभुं। सोमे। सुते। सति। सचा सुखेनैव। मनःप्रसादपूर्वकं। गायत तत्स्तुत्या संबंधः। अत्र पुरू
तममिति तमप् छांदसः। अत्ययेनोदात्तत्वं। यद्वा तमु अभिकांक्षायामित्यस्य कर्मणि रूपमेतत्। पुरुभिः पूर्णैः तम्यत इति पुरूतमः। तं पुरूणां
वार्याणामिति सामानाधिकरण्यं॥२॥१॥

त्वां स्तोमा४॥व्यंजयंति। हे शतक्रतो प्रभो। त्वां साम्नि। सामविशेषाः स्तोमाः। अवीवृधन्॥ व्यंजयंति स्म॥ एवं ऋक्षु॥ उक्था उक्थानि॥ त्वामेव। अवी
४८ वृधन्। हि यस्मादेवं। तस्मात्। नः। अस्माकमपि॥ गिरः। त्वां वर्धंतु। वर्धयंतु। महागुणैः युक्तं व्यंजयंतु। त्वामिसस्य पुनरुक्तेरधिकमिस्फुक्तं। वर्धं

त्वां स्तोमा अवीवृधंत्वामुक्था शतक्रतो॥ त्वां वर्धंतु नो गिरः४॥२॥१०॥ त्वां। स्तोमाः। अवीवृधन्। त्वां।
उक्था। शतक्रतो इति शतऽक्रतो॥ त्वां वर्धंतु। नः। गिरः॥२॥१०॥ व्यंजयंत्यधिकं स्तोमाः साम्न्युक्थान्यृक्षु
चैव हि॥ महागुणैर्व्यंजयंतु गिरोऽस्माकमपि प्रभो॥ आकाशवृद्धिवद्वृद्धिर्विष्णोः स्यान्नैव चान्यथा॥

त्विस्य त्रणिऽलोपस्य तात्पर्यं स्वातंत्र्यादिमहागुणैर्युक्तमिति। नन्वत्र वृद्धिशब्दस्य प्रसिद्ध एवार्थोऽयुक्तः। व्यक्तौ प्रयोगादर्शनादित्यत आह॥ आ
काशेति॥ कुड्याद्यपसरणादिना आकाशो अभिव्यक्ते वृद्ध आकाश इति प्रयोगवद्विष्णावपि वृद्धिशब्दप्रयोगो न तूपचयाद्यर्थतया॥ ७ ॥ व्यास ४८

आकाशेऽबाधकवशादुपचरितोऽयं गीः क्रियत इति चेत्। समं प्रकृतेऽपीत्याह॥ न वर्धत इति॥ जगो। वृद्धिः क्षयरहितमिति शेषः। बाधकांतरमाह॥ महा
तात्पर्येति॥ विष्णोरीश्वरत्वे यत्सर्ववेदानां महातात्पर्यं तद्विरोधाच्च न वृद्धिः श्रुत्यर्थो भवेत्। कथं विरोध इत्यत आह॥ यदीति॥ यदि विष्णोः त्वा

न वर्धते नो कनीयानिति ह्येनं श्रुतिर्जगौ॥ महातात्पर्यरोधाच्च श्रुत्यर्थो नापरो भवेत्॥ यद्यन्या
पेक्षया वृद्धिरीशत्वं स्यात्कुतोऽन्यथा॥ अक्षितोतिरिति ह्यस्मात्पूर्णाभिप्रायतोदिता॥२॥१०॥

माद्यधीना वृद्धिः स्याच्च हरेरीश्वरत्वं न स्यात्। पराधीनश्चेश्वरश्चेति विप्रतिषेधात्। ततश्च यत्तत्र वेदानां महातात्पर्यं तद्विरुध्यत इति। विष्णोर्वृद्ध्यं
गीकृतो उत्तरवाक्यविरोधोऽपि स्यादित्याह॥ अक्षितोतिरिति॥ अस्माद्वृध्याद्यभावेन। स्वातंत्र्यादेव हि विष्णोरक्षितोतिरित्युदिता पूर्णाभिप्रायतायुक्त
तेनान्यथेऽत्यर्थः॥२॥१०॥

अक्षितोतिः। अनंत। यस्मिन्। यत्रेंद्रे। विश्वानि। पौंस्या॥ पौरुषाणि। अखिलाश्चशक्तयः। संति। सः अक्षितोतिः। पूर्णाभिप्रायः। वांछितस्य अ
४९ खिलस्यपूर्तिमानिंद्रः॥ सहस्रिणं। सहस्रशब्दोऽनंतवाची॥ तद्वंतं अनंतफलदमितियावत्। इमंवाजं। अन्नं। हविः। सनेत्। अस्मत्तोलभतां॥

अक्षितोतिःसनेदिमंवाजमिंद्रःसहस्रिणं॥ यस्मिन्विश्वानिपौंस्या॥ ४॥१०॥ अक्षितऽऊतिः। सनेत्। इमं। वाजं। इंद्रः। स
हस्रिणं। यस्मिन्। विश्वानि। पौंस्या॥ ४॥१०॥ अनंतफलदंवाजमस्मत्तोलभतांसच॥ ददातिवापौरुषाणिशक्तयोयत्र
चाखिलाः॥ अतश्चानंतशक्तित्वान्नदृध्याद्याः कथंचन॥ सर्वोपितेसेतमर्थंअभिप्रेत्याहवेदराट्॥ ४॥१०॥ ॥

अथवा आत्मपूजार्थं वाजमस्माभिः। सनयेत्। लंभयेत्। अस्मभ्यंददात्वित्यर्थः॥ यस्मिन्विश्वानिपौंस्येत्यनेनापिवाक्येनपूर्वत्र दृध्यंगीकारे विरो
धइतिसिंहावलोकितेनाह॥ अतश्चेति॥ ब्रह्मसूत्रविरोधंचतत्राह॥ सर्वेति॥ एतमर्थं सर्वशक्तित्वादीश्वरस्यदृध्याद्यभावं॥ ४॥१०॥ ॥ व्यास
४९

त्वंसुतस्य। सदापृर्णा। हेइंद्र। सुक्रतो। शुभज्ञान। सद्यो वृधः। समानेअहनि। यस्मिन्नहनि स्वयंवर्तते तस्मिन्। सदाचवर्तते। अतः सदावृधः।
सदापृर्णत्वं सुतस्य। पीतये सोमपानाय। सुतात्स्यय इति तात्पर्यं। यद्वा अपिपूर्वस्येण: क्विन्निरूपमेतत्। वष्टिभागुरिरल्लोपमवाप्योरुपस
र्गयोरिति। अपेरल्लोपः। सोमस्यपीतये। सुतापये। यज्ञे। यदजायथाः। अभिव्यक्तोऽभवः। तज्ज्यैष्ठ्याय। ज्यैष्ठ्यव्यक्त्यै। सर्वदेवताभ्योति
स्पं त्वंसुतस्यपीतयेसद्योवृद्धोअजायथाः॥ इंद्रज्यैष्ठ्यायसुक्रतो॥ १॥१०॥ त्वं। सुतस्य। पीतये। सद्यः। वृधः। अजायथाः। इंद्र। ज्यैष्ठ्याय। सुक्र
तोऽइतिसुक्रतो॥ १॥१०॥ सदापृर्णः शुभज्ञानज्यैष्ठ्यव्यक्त्येसुतास्यये॥ नक्षुदादेरभिव्यक्तोऽभवः॥ १॥१०॥ आत्वाविशंत्वाशवःसोमास
इंद्रगिर्वणः॥ शंतेसंतुप्रचेतसे॥ २॥१०॥ आत्वा। विशंतु। आशवः। सोमासः। इंद्र। गिर्वणः। शं। ते। संतु। प्रऽचेतसे॥ २॥१०॥ गीर्भिर्हितप्रभो॥ प्रकृ
ष्टचेतास्त्वद्भसोयोस्मिस्फःशंकराःसुताः॥ २॥१०॥ व्या॰॥ त्वमेनसोमपानादिनास्वकीयंज्यैष्ठ्यंप्रकटयितुमेवनक्षुदादेर्हेतोः॥ १॥१०॥ आत्वागीर्भिः
हेगिर्वणः। गीर्भिःवेदवाक्यैः। वननीयभजनीय। वननेरसुन्। इतेतितात्पर्यं। यद्वात्वणोतेःकर्मण्यसुन्प्रत्यययोज्जित्। इंद्र। प्रभो। आशवः क्षिप्राः। सो
मासः सोमाः। त्वा। त्वां। आविशंतु। त्वामाविष्टःश्च। तेसुताः। प्रचेतसे। यः प्रकृष्टचेताः तेत्वदीयः। त्वद्भ। सोयजमानः। अस्मै। अस्य। शं सुखकराः
संतस्तुः॥ २॥१०॥

युंजंति। दशर्चमेतत्सूक्तं। तत्र प्रथमा द्वितीया चतुर्थी च मारुत्यः। तृतीयापंचम्यौ चेंद्रमारुत्यौ। शेषाश्चैंद्र्य इति विभागः। तत्रेश्वरविषये तावद्व्याख्याति॥
५० पौंस्यानीति॥ यस्मिन्विश्वानि पौंस्येति प्रकृता निवासुदेवस्य पौंस्यानि। अरुषं अरुणं। वर्णतः। तस्थुषः स्थावरान्। गिरीन्। परि परितः। चरंतं ब्रध्नं।

युंजंति ब्रध्नमरुषं चरंतं परि तस्थुषः॥ रोचंते रोचना दिवि॥१॥११॥ युंजंति। ब्रध्नं। अरुषं। चरंतं।
परि। तस्थुषः। रोचंते। रोचना। दिवि॥१॥११॥ पौंस्यानि वासुदेवस्य ब्रध्नं वृधं दिवाकरं॥ अरुणं
चरंतं परितो गिरीन्युंजंति सर्वदा॥ तैरेवान्यानि चंद्रादि रोचनानि त्रिविष्टपे॥ रोचयंति॥१॥११॥

दिवाकरं। कथं। वृधं वृधत्वेन ब्रध्नराद्वाच्यं। बुधु वृधा विसेतस्यैतद्रूपं। अत एव महन्नामसु पाठः। सर्वदा युंजंति। नियुंजंते। प्रवर्तयंति॥
किंच तैरेव। पौंस्यैर्निमित्तैः। अन्यानि दिवाकरात्। चंद्रादिरोचनानि। ज्योतींषि। त्रिविष्टपे। रोचंते दीप्यंते। रोचयंति चान्यान्॥१॥११॥ ६७॥ व्यास ५०

युंजंत्यस्य। हरीच। प्रकृताः। वासुदेवस्य। स्वशक्तयः। स्वरूपभूताः। शक्तयः। अस्य हरी। एतदधीने। मनोबुद्धी। रथे। भक्तानां देहे। युंजंति। योजयंति। तान्मन
स्विनो बुद्धिमतश्च कुर्वंति। एतामृचं मरुद्विषये व्याख्याति॥ अपिवेति॥ देवाः मरुतो पिवा। अस्य। इंद्रस्य। हरी। अश्वौ। तस्यैव रथे युंजंति॥ योजयंति। अथवा

युंजंत्यस्य काम्या हरी विपक्षसा रथे॥ शोणा धृष्णू नृवाहसा॥२॥११॥ युंजंति॥ अस्य। काम्या। हरी इति। विऽपक्षसा। रथे। शोणा।
धृष्णू इति। नृऽवाहसा॥२॥११॥ हरी चास्य मनोबुद्धी स्वशक्तयः॥ युंजंत्यधिगुणत्वेन काम्यावश्वाव थापिवा॥ विशिष्टपक्ष
संयुक्ता विवक्षिप्रतरौ सदा॥ रथे देहे पिवा देवाः स्वमनोबुद्धिमेव च॥ अस्य देहे प्रयुंजंति स्त्र्यदीन्स्थापयंति च॥ सूर्यादिस्था
पकत्वं च ब्रह्मादी नां सदा भवेत्॥ शोयो चराम णो प्रोक्तो सुखं प्राप्तोय तः सदा॥ ६८॥

देवाः। स्वीयं मनोबुद्धिं च। अस्य जीवजातस्य। रथे देहे। युंजंति। योजयंति। तस्तैरयाय प्रयुंजते॥ पूर्वामप्यृचं मरुद्विषयतया तात्पर्यतो व्याचष्टे॥ सू
मदीनिति॥ वासुदेवस्य पौंस्यानीति स्थाने देवा इति वक्तव्यं॥ समानमन्यत्। सूर्यादिस्थापकत्वं किं सर्वदेवतासु प्रतिपन्न यं नेत्याह॥ सूर्यदीति॥ अ

न्मेषु लक्षणया प्रयोग इति भावः॥ ब्रह्मादीनामिति कृत्स्या मरुच्छब्दः सर्वदेवतावचनः प्रतिपत्तव्यः। द्वितीयस्यामृचि काम्यादि विशेषणानि मनोबुध्योर
५३ श्वयोश्च योजयति॥ अधियुणत्वेनेत्यादिना॥ अधियुणत्वं काम्यत्वे हेतुर्न तु राब्दार्थः। विशिष्टो पक्षौ ययोस्तौ विपक्षौ॥ असंभवाद्रोण्यादृत्सा योजय
ति॥ विशिष्टेति। पक्षिणाविति शेषः॥ शामणा वित्यस्यैव विवरणं सुखं प्राप्तो यतः सदेति। अणतेः पचाद्यच्। सुखं अणो प्राप्तो शमणो। शंश
ब्द समानार्थः शशब्दः। अकारस्योकारः। तस्यार्थः सदेति। नन्वस्तु मनोबुध्योरिदं व्याख्यानं। अश्वयोस्तु शोणत्वं प्रसिद्धमेव किं न स्यादित्यत

श्यामो मूर्धनि वाशोणो शाक्राश्वा वज्र गो स्मृतौ॥ धृष्टो नृन् प्रतितं चेशं वहंतौ तावुभावपि॥ २॥ ३३॥

आह॥ श्यामाविति॥ यतः शाक्राश्वौ श्यामौ प्रमितौ। अतोसंभवाद्योग स्तत्राप्यनुसर्तव्य एव॥ प्रकारांतरेण शोणशब्दमश्वयोर्व्याचष्टे॥ मूर्धनीति॥ उत्त
मांगसंबंधिना गुणेन लक्षणया शोणावुच्यते। नन्विंद्रस्य सहस्राश्वत्वाद्द्वयोरेवाश्वयोर्ग्रहणं कस्मादित्यत आह॥ अग्रगाविति॥ प्राधान्याद्द्वयोरेव
ग्रहणमिति भावः॥ धृ स्मृ। धृष्टो। वियातौ। नन्प्रतीत्यसनेन नृवाहसावित्येतन्नृन्प्रति वहंतावितिनरंतमीशमिंद्रं विस्कंवावहंताविति चद्वे धा व्या
ख्यातं॥ तावुभावपीति॥ मनोबुध्यौ। अश्वौ वेत्यर्थः॥ काम्यावित्यादौ सर्वत्रेदं संबध्यते॥ २॥ ३३॥

व्यास
५३

मा नः। मा मर्ताः। हे गिर्वणः। इंद्र। मर्ताः मर्त्याः। नः अस्माकं। तनूनां। शरीरेभ्यः। मा अभिद्रुहन्। द्रोग्धारः कथंचन मा स्युः येन कारणेन। त्वं। ईशानः। इशो
सि तेन नः अस्माकं। वधं। यवय। अपगमय। अपाकुरु। संसारे वधाभावो संभवीत्यतो मुक्तिदान तदिति शेषमाह॥ ऋचं प्रकारांतरेण व्याख्याति॥

मानो मर्ता अभिद्रुहं तनूनामिंद्र गिर्वणः॥ ईशानो यवया वधं॥ ५॥ ७०॥ मा। नः। मर्ताः। अभि। द्रुहन्। तनूनां। इंद्र।
गिर्वणः। ईशानः। यवय। वधं॥ ५॥ ७०॥ मा मर्ता नस्तनूनां तु द्रोग्धारः स्युः कथंचन॥ ईशोस्यपाकुरु वधं तेन नो मु
क्तिदानतः॥ मानुषेभ्यस्तनूनां तु नैव न स्युर्विपत्तयः॥ कालेन देवतः प्राप्तः स्याद देहत्वतो वधः॥ ५॥ ७०॥ ५ ५

मानुषेभ्य इति॥ मर्ताः नः तनूनां। माभिद्रुहन्। अस्मत्तनूनां। मानुषेभ्यो विपत्तयो नैव स्युः। वरं। ईशानः। त्वं। वधं। यवय। प्रापय। कालेन। देवतः। त्वत्तः।
प्राप्तः। अदेहत्वतः देहाभावरूपेण वधः स्यात्। दुर्जनैः क्रियमाणादुपद्रवाद्देवाधीनं मरणमेव वरं। अतस्तत्परिहारं कुर्विस्याशयः॥ ५॥ ७०॥ ७५

आदह॥ हरेर्वशात्। यज्ञियं। यज्ञेभवं॥ यज्ञवाच्यं। नाम॥ दधानाः। परेनास्य शक्तयः॥ आत् अकार वाच्यात् विष्णोर्निमित्तात्स्वेच्छयेतियावत्॥

आदहस्वधामनुपुनर्गर्भत्वमेरिरे॥ दधानानामयज्ञियं॥ ४॥ ९३॥ आत्। अह। स्वधां। अनु। पुनः।
गर्भत्वं। आ॥ इरिरे॥ दधानाः। नाम। यज्ञियं॥ ४॥ ९३॥ हरेर्वशात्॥ ततदेवस्करवमन्वेवपुनर्दत्व
मापिरे॥ स्वेच्छयैवपरेशास्यशक्तयोदेवताअपि॥ यज्ञेवाच्यंदधानाश्चनाम॥ ४॥ ९३॥ ६४॥

अह। तदेव। यज्ञेव्यक्तत्वानंतरमेव। स्वधामनु। स्करवमनु। स्करवेनैव। नतुभयेन। पुनः। गर्भत्वं गूढत्वं। एरिरे। आपिरे। आप्ताः। देवता अयेव। ४॥ ९३॥

वीळुचित्। वीळु दृढं। हि दृढं। गुहाचित्। गुहायांसंस्थितोपि॥ लोकानांगूढत्वेनावस्थितोपिसन् त्वं। वीळु। दृढं। चित्। अपि। ब्रह्मांडादिकं। आरुज
त्नुभिः। आरुजद्भिः। रुजोभंगे। संहरद्भिः। वन्हिभिः। अखिलं लोकं वहद्भिः। पोस्यैः स्वसामर्थ्यैः सह। उस्त्रियाः। प्रकाशत्वानि। प्रकटत्वानि नाना

वीळुचिदारुजत्नुभिर्गुहाचिदिंद्रवन्हिभिः॥ अविंदउस्त्रियाअनु॥ ५॥ ९३॥ वीळु। चित्। आरुजत्नुभिः॥
गुहा। चित्। इंद्र। वन्हिभिः॥ अविंदः। उस्त्रियाः॥ अनु॥ ५॥ ९३॥ वीळु दृढं ह्यपि॥ आरुजद्भिः स्वसाम
र्थ्यैर्गुहायांसंस्थितोपिसन्॥ वहद्भिरखिलं लोकंप्रकाशत्वानिलब्धवान्॥ देवैर्वैता हरेः साकमानुकूल्येनलब्धवान्। ५। ९३।

विधंप्राकाट्यं। अनु। स्वेच्छानुसारेण अविंदः। लब्धवान् असि॥ स्वप्रकाशोवर्तसे॥ यद्वाएताद्दंरोः वीळुचिदारुजत्नु द्भिः। वन्हिभिर्देवैः सा
कंत्व। उस्त्रियाः॥ अन्वविंदः॥ आनुकूल्येनलब्धवानसि॥ ५॥ ९३॥ हृदयगुहासंस्थितोपिब्रह्मांडादिसंहारकायनमः॥ ॥ ६५॥

देवयंतः। सम्यक्। अछेतिनिपातः संज्ञाद्यर्थी। अछदेवयंतः सम्यक्प्रद्योतयंतः। सम्यक्प्रकाशयंत्यः। गिरः वेदरूपाः स्तुगिरः। लिंगव्यत्यासश्छं
दसः। अथवा गिरइति कर्तृसाधनः पुल्लिंगः। अतएवशोभनागिरोयेषांतेस्तुगिरः। यथायथास्थितं। निर्विकारं। मतिं। मतिरूपं। वि

देवयंतोयथामति मछाविद द्वसूं गिरः॥ महामनूषतश्रुतं॥३॥३२॥ देवऽयंतः॥ यथा।
मतिं॥ अछ॥ विदत्ऽवसुं॥ गिरः॥ महां॥ अनूषत॥ श्रुतं॥३॥३२॥ सम्यक्प्रद्योतयंतो
मुंमतिरूपंयथास्थितं॥ विदद्वित्तंमहांतंच विश्रुतं स्तुगिरोस्तुवन्॥ ३॥३२॥ ७॥

दद्वसूं॥ विदद्वित्तं॥ विददितिकर्मणिछांदसंरूपं॥ लब्धवित्तं॥ महांमहांतं। श्रुतं। विश्रुतं। प्रसिद्धंअमुंइंद्रं। अनूषत। अस्तुवन्॥३॥३२॥

केतुंकृण्वन्। अज्ञाय। हेइंद्र। ईश्वर। मर्याः। बहुवचनमेकवचनार्थे। मारकः। त्वं। अकेतवे। अज्ञाय। अज्ञस्य। केतुंसज्ञानं। कृण्वन् कुर्वन्। अपेशसे।
अहेमाय। हेमवर्जितस्य। पेशः। हेमच। कुर्वन्। उषद्भिः। वशकांताविस्यैदंरूपं। शकारस्यषकारः। आधिक्यार्थः। संप्रकाशद्भिः संप्रकामानैः चौ
स्यैः शक्तिभिः। सहसमजायथाः। यज्ञे व्यक्ततामगाः। देवतांतरविषयेयोजयति॥ मर्याइति॥ ततश्चैवंयोजना। येमर्याः मरणवंतोदेवाः तैः॥

केतुंकृण्वन्नकेतवेपेशोमर्या अपेशसे॥ समुषद्भिरजायथाः॥३॥३३॥ केतुं। कृण्वन्। अकेतवे। पेशः। मर्याः। अपेशसे।
सं। उषत्ऽभिः। अजायथाः॥३॥३३॥ अज्ञायकुर्वन्सज्ञानंहेमाहेमायचेश्वर॥ उषद्भिःसंप्रकाशद्भिः शक्तिभिर्व्यक्तता
मगाः॥ मर्यमरणवंतोपिदेवाएवं॥३॥ ॥३३॥ ॥७॥ अ

उषद्भिः सहइत्थंसमजायथाइति॥ किमुक्तंभवतीत्यतआह॥ देवाअप्येवमिति॥ अकेतवे। केतुं। अपेशसे। पेशश्चकुर्वंतः समजायंतेति॥ एत
च्चोभयपरत्वम् चः संपादयितुमुक्तं। नकेवलं। त्वं। किंतुमर्याः मरणवंतोदेवाअप्येवं। अकेतवेकेतुं। अपेशसेपेशश्चकुर्वंतः। स्वसामर्थ्यैः सहसम
जायंतेति॥३॥३३॥ सज्ञानहेमाद्यपेक्षितप्रदात्रेनमः॥ ॥७॥

अनवद्यैः ॥ मखः मखात्मा । मखाभिमानी ॥ पुरुहूतः ॥ अनवद्यैः निर्दोषैः । अभिद्युभिः । अभितो द्योः प्रकाशो ज्ञानं येषां तैः । महाज्ञानैः ॥ इंद्रस्य परमे
५४ श्वरस्य । काम्यैः प्रियैः । गणैः देवता गणैः सह । सहस्वत् । सहस्वान् । सहो वायुः तद्वान् । सहस्वद्यथा भवति तथेति वा ॥ वायुना च सहेति यावत् ।
इंद्रस्य ॥ इंद्रं ॥ परमेश्वरं ॥ अर्चति ॥ तात्पर्यमाह ॥ अर्चतीति ॥ वायुरिंद्रश्च सर्वदेवाश्च परमेश्वरमर्चतीत्युक्तं भवतीति ॥ अनवद्यैरि

अनवद्यै रभिद्युभिर्मखः सहस्वदर्चति ॥ गणैरिंद्रस्य काम्यैः ॥ ३ ॥ १२ ॥ अनवद्यैः । अभिद्युभिः । मखः । सहस्वत् । अर्चति ॥
गणैः । इंद्रस्य । काम्यैः ॥ ३ ॥ १२ ॥ अनवद्यैर्महाज्ञानैः प्रियैर्देवगणैः सह ॥ वायुना च सहार्चतिस्फधीत्वात्परमेश्वरं ॥ ३ ॥ १२ ॥

त्यादि विशेषणानि हेतुगर्भाणीत्यभिप्रेत्य सर्वेषां संग्रह उक्तः ॥ स्फधीत्वादिति ॥ इंद्रविषये त्वनवद्यैरभिद्युभिश्च ॥ इंद्रस्य काम्यैः ॥ ऋत्वि
ग्गणैः क्रियमाणो मखश्च ॥ सहस्वत् बलवत् ॥ अतिशयेन ॥ इंद्रस्य इंद्रमर्चतीतिकरणे कर्तृलोपचारेण योज्यं ॥ ३ ॥ १२ ॥ ६७ ५

व्यास
५४

अतः । अतो हेतोः । परिज्मा । भूमिं वर्तत इति परिज्मा । हे परिज्मन् । सर्वग । यत एवं त्वं । सर्वयज्ञानां भोक्ता । अतो हेतोः । दिवः स्वर्गात् । रोचनाद्देदीप्यमा
नात्सूर्यमंडलाद्वा । अध्यस्माकं समर्हणमधिकृत्य । इह यज्ञस्थाने ॥ आगहि । आयाहि । किंच । अस्मिन्स्थाने । गिरश्च स्तुतिरूपाश्च वेदवाचः । संस
म्यक् । तस्यैव विवरणं । परमसुख्यतश्च । त्वां । ऋंजते ॥ धातूनामनेकार्थत्वात्प्राप्नुवंति ॥ अतो यायाहि ॥ अत्र स्त्त के प्रथमस्त्वृचएं द्रः । आदहेस्वा

वी अतः परिज्मन्नागहि दिवो वा रोचनादधि ॥ समस्मिन्नृंजते गिरः ॥ ४ ॥ १२ ॥ अतः । परिज्मन् । आ । गहि । दिवः । वा । रोचनात् । अधि । सं ॥
अस्मिन् । ऋंजते । गिरः ॥ ४ ॥ १२ ॥ अतो हेतोरिहायाहि दिवो वा सूर्यमंडलात् ॥ परिज्मन्सर्वगास्माकमधिकृत्य समर्हणं ॥ यस्मिन्गि
रः प्राप्नुवंति सम्यक् परमसुख्यतश्च ॥ युंजंतीत्यत्र बाकुल्या देवयंतोत इत्यपि ॥ बाकुल्या दृष्टितो गीर्भिर्विनार्थो नान्य इष्यते ॥ ४ ॥ १२ ॥ दृ

द्याः षण्मारुत्यः ॥ तत्रापि वीळुचिदिंद्रेणेति द्वे ऐंद्रौ च । दशमी वैंद्रेति केचिद्ब्रुवते । यथा युंजंत्या दहेत्या द्याः षण्मारुत्यो वीळुचिदिंद्रेणेति ॥ ऐंद्र्यो
चेति ॥ अनाख्याते लिंगो देवदत्तेति च ॥ तदेतद्दशम्यां विप्रतिपत्त्यभावात्तद्व्याख्यानात्प्रागेव निराकरोति ॥ युंजंतीत्यत्रेति ॥ युंजंति ब्रध्नं ॥ युंजंत्यस्य स

५५ त्रऋग्द्वयेदेवताभ्योन्यइंद्रलक्षणार्थोनिष्यतेप्रामाणिकैः॥कुतः॥बाहुल्यात्।बहुवचनश्रवणात्॥तस्ययथाकथंचिद्व्याख्यानेत्र्यश्वादस्यादित्ये
द्रष्टिविरुध्यते॥असौवाआदित्योत्र्यश्वइतिश्रुत्यंतरव्याख्यानविरोधश्च॥उपलक्षणंचैतत्॥केतुंकृण्वन्नित्यस्यामृचिकृण्वन्नित्याद्येक
वचनस्यमर्यादितिबहुवचनस्यश्रवणादन्यः केवलेंद्रलक्षणोनेष्यते॥चतुर्थ्यांपंचम्यांचनविप्रतिपत्तिः॥उत्तरास्वृचत्सृषुप्रतिपाद्ये
र्थेबाहुल्याद्दृष्टितः॥बहुवचनस्यश्रवणादन्योर्थोदेवतालक्षणोनेष्यते॥कथंचिद्योजनातुक्लिष्टतरा॥ननुदेवयंतमित्यस्यामृचिअ
तःपरिज्मन्नित्यस्यामपिबहुवचनश्रवणात्कथंबाहुल्याद्दृष्टितइत्युच्यतइत्यतउक्तं॥देवयंतोतइत्यपिगीर्भिर्विनाबाहुल्याद्देवानामेवार्थ
त्वं॥अन्यस्त्विंद्रलक्षणोर्थोनेष्यतइत्युक्ते॥शंकते॥एवंतर्हिदेवयंतोतइत्यत्रापिबाहुल्याद्देवार्थत्वमेवेंद्रस्त्वर्थोनेष्यतइति॥तत्रोत्तर
देवयंतइति॥देवयंतोतइत्यपिबाहुल्याद्बहुवचनसामर्थ्यात्॥अन्योदेवतारूपोऽर्थोनेष्यते॥तर्हिबहुवचनंनिरर्थकंस्यादत्राह॥गी
र्भिर्विनेति॥कुतएतदित्याह॥दृष्टितइति॥स्फुटंतथाप्रतीयमानत्वात्॥विषयांतराप्रतीतौसत्यांप्राग्बहुवचनंहेतुत्वेनोक्तमितिभावः॥४॥इं

व्यास
५५

इंद्रेण॥तस्य।अत्रमखात्मेत्युत्तरस्यामृचिस्थितस्यमखशब्दस्यव्याख्याने॥वाचशब्दोव्यत्यासेनयोज्यो॥मं।मदंसुखंददातीतिमंदुः॥शंकरःपुरु
हूतश्च।श्रीर्भूमीवा॥मंदू॥कथं॥सुखात्मिके।ततश्चमंदू॥शंकरपुरुहूतौश्रीभूमीवा॥संदृक्षसे॥दृशोस्तुमर्थेकसे॥तस्यपरमेश्वरस्य।

इंद्रेणासंहिदृक्षसेसंजग्मानोअबिभ्युषा॥मंदूसमानवर्चसा॥२॥६२॥इंद्रेण।सं।हि।दृक्षसे।सं॰जग्मानः।अबिभ्यु
षा॥मंदूइति।समानऽवर्चसा॥२॥६२॥तस्यसंदर्शनायैवसंगतस्तेनशंकरः॥मखात्मापुरुहूतोवाश्रीर्भूमीचसुखात्मिके॥२॥७५

संदर्शनाय।अबिभ्युषा।निर्भयेन।समानवर्चसा॥निर्विकारतेजसा।इंद्रेण।तेनैव॥परमेश्वरेण।संजग्मानः।संजग्मानो।संगतः।संगतो॥
बभूवतुः।प्रसिद्धेंद्रविषयेमंदूइतिद्यावापृथिव्योर्मदहेतुत्वात्॥अन्यत्समानं॥२॥६२॥शंकरपुरुहूतादिदेवतापरोक्षविषयायनमः॥

५६ इंद्रमित् ॥ दशार्चमिंद्रस्य सूक्तं ॥ तमेव ॥ बृहत् ॥ बृहंतं ॥ इंद्रं ॥ इत् ॥ एव ॥ गाथिनः ॥ गाथाः गानानि ॥ तद्वंतः सामवेदिनः ॥ उद्गातारः ॥ साम्ना । अनूषत ॥ अस्तुवन् ॥ सदा स्तुवंति ॥ अर्किणः ॥ अर्काः ऋचः तद्वंतः । बह्वृचः ॥ होतारश्च ॥ अर्केभिः ॥ ऋग्भिः ॥ इंद्रं अनूषत ॥ अन्याश्च य

इंद्रमिद्गाथिनो बृहदिंद्रमर्केभिरर्किणः ॥ इंद्रं वाणीरनूषत ॥ १ ॥ ३३ ॥ इंद्रं ॥ इत् ॥ गाथिनः ॥
बृहत् ॥ इंद्रं ॥ अर्केभिः ॥ अर्किणः ॥ इंद्रं ॥ वाणीः ॥ अनूषत ॥ १ ॥ ३३ ॥ तमेव गाथिनः साम्ना स्तु
वंत्यृग्भिश्च बह्वृचः ॥ बृहंतमन्यवाणीभिरपि ॥ १ ॥ ३३ ॥

यजुराद्याः ॥ वाणीः वाण्यः । सुपां सुलुक्पूर्वसवर्णेति पूर्वसवर्णः ॥ इंद्रं ॥ अनूषत ॥ अत्र करणे कर्तृत्वोपचार इति भावेनान्यवाणीभिरिति मुख्यार्थो दर्शितः ॥ अध्वर्युप्रभृतय इति शेषः ॥ उभयत्र करणस्य दर्शनात्साम्नेत्यध्याहृतं ॥ १ ॥ ३३ ॥ व्यास ५६

इंद्र इत् ॥ हर्योः सः ॥ इंद्र इत् । इंद्र एव ॥ वचोयुजा ॥ वचायुजोः । सुपामिति यनेनैव दिशः । वाङ्मात्रेणैव योगिनोः ॥ हर्योः । अश्वयोः ॥ रथे ॥ सचा स्कसे नैव । आसमंतात् । संमिश्लः । संमिश्रितः । सारथेरतिप्रयत्नमंतरेण रथयोग्यो अश्वाभ्यां युक्तं रथं आरूढ इति यावत् ॥ अथवा इंद्रः परमेश्वरः ॥ व
भक्त शरीरे वचोयुजा ॥ वेदवाक्यानुवर्तिनोः हर्योः । मनोबुध्योः संमिश्लः ॥ तद्युक्तं शरीरं विशेषतो ध्यतिष्ठत् ॥ किं च स इंद्रः वज्री । प्रशि

इंद्र इद्धर्योः सचा संमिश्ल आ वचोयुजा ॥ इंद्रो वज्री हिरण्ययः ॥ २ ॥ ३३ ॥ इंद्रः ॥ इत् । हर्योः । सचा । संमिश्लः ॥ आ ॥ वचः २
युजा ॥ इंद्रः ॥ वज्री । हिरण्ययः ॥ २ ॥ ३३ ॥ हर्योर्विमिश्रितः ॥ रथेऽथवा मनोबुध्योर्वाङ्मात्रेणैव योगिनोः ॥ सचा स्कसे
नवज्री च ज्ञानानंदो हि धातुतः ॥ हितश्च रमणीयश्च हिरण्यय इतीरितः ॥ २ ॥ ३३ ॥

ख्ये । स्फुटं । व्याख्याति ॥ ज्ञानानंद इति ॥ तदुपपादयति ॥ धातुत इति ॥ वज गतौ रमु क्रीडायामिति धातुभ्यां भावेऽः ॥ तद्वान् वज्री इत्यर्थः ॥ विशेषादेवेनि प्रत्यय इति ज्ञापयितुं ज्ञानानंद इत्येव व्याख्यातं ॥ अर्शआदिभ्योऽच् ॥ हितश्चेत्यत्र वर्णलोपादिकमूह्यं ॥ २ ॥ ३३ ॥

५७ इंद्रो दीर्घाय ॥ दीर्घकाले ॥ सः इंद्रः ॥ दीर्घाय चक्षसे । जनानां अर्हलक्षणं दीर्घकालं पदार्थदर्शनाय सूर्यं ॥ दिवि गगने ॥ आ रोहयत् । आ
रोपितवान् ॥ किंच आद्रियत इत्यद्रिः । अद्रिं आदरयोग्यं । प्राणात्मानं । गोभिः ज्ञानैः । व्यैरयत् । समैरयत् । ज्ञानयुक्तं प्रावर्तयत् । प्रसिद्धौ इंद्रस्तु ।
गोभिर्वज्रैः । अद्रिं पर्वतं । वज्रेण । पर्वतान् । व्यैरयत् । हतवान् । यद्वा । उदकैर्वृष्ट्या । पर्वतं हतवान् । अथवा उदके निमित्ते रुदकार्थमितियावत् ॥
इंद्रो दीर्घाय चक्षस आ सूर्यं रोहयद्दिवि ॥ वि गोभिरद्रिमैरयत् ॥ ३ ॥ ६२ ॥ इंद्रः । दीर्घाय । चक्षसे । आ । सूर्यं । रोहयत् । दिवि । वि । गोभिः ।
अद्रिं । ऐरयत् ॥ ३ ॥ ६२ ॥ दीर्घकालं दर्शनाय सूर्यमारोहयद्दिवि ॥ ज्ञानैरादरयोग्यं च प्राण्यात्मानं समैरयत् ॥ ३ ॥ ६२ ॥ इंद्र वाजेषु नोऽव
सहस्रप्रधनेषु च ॥ उग्र उग्राभिरूतिभिः ॥ ४ ॥ ६२ ॥ इंद्र । वाजेषु । नः । अव । सहस्रप्रधनेषु । च । उग्र । उग्राभिः । ऊतिभिः ॥ ४ ॥ ६२ ॥ बहुभिर्यु
ध्यमानेषु युद्धेष्वपि सदावन ४ ॥ दुष्टोग्रैः सदभिप्रायैः ॥ ४ ॥ ६२ ॥ टी० ॥ ॥ अद्रिं मेघं । व्यैरयत् । विगमितवान् ॥ ३ ॥ ६२ ॥ इंद्र वाजेषु ॥ ब
हुभिः । इंद्र । दुष्टानामुग्रः । त्वं । वाजेषु युद्धेषु । अस्मासु । सहस्रप्रधनेषु सत्सु । सहस्रं प्रधनं येषां ते तथोक्ताः । तेषु । बहुभिरपि युध्यमा
नेषु सत्स्विति यावत् । नोऽस्मान् । उग्राभिः । ऊतिभिः । दुष्टानां उग्रैः । स्वयं तु सद्भिः अनुग्रैः वाभिप्रायैः । अव । सदा रक्ष ॥ ॥ ४ ॥ ६२ ॥

इतो वा ॥ इतो दिवः ॥ वयं ॥ इतः । दिवः ॥ अर्वाक्तनात् द्युलोकाद्वा ॥ पार्थिवात् । पृथिवीसंबंधिनः पातालाद्वा ॥ महः ॥ महतः ॥ रजसः रजकाद्विश्मोर्लोका

इतो वा सातिमीमहे दिवो वा पार्थिवादधि ॥ इंद्रं महो वा रजसः ॥ ५ ॥ ६२ ॥ इतः । वा । सातिं । ईमहे । दिवः ॥
वा । पार्थिवात् । अधि । इंद्रं । महः । वा । रजसः ॥ ५ ॥ ६२ ॥ इतो दिवो वा पातालात् सातिं लाभस्वरूपिणीं ॥
महतो रजका द्विश्मोर्लोकादितमधीमहे ॥ ५ ॥ ६२ ॥

द्वा एतेषु लोकेषु स्थितमितियावत् ॥ सातिं ॥ षणसंभक्तौ वितस्येदं रूपं ॥ लाभस्वरूपिणं ॥ भगवानेव हि भक्तानां लाभः ॥ तमिंद्रं ॥
अधीमहे स्मरामः ॥ इङ् स्मरणे ॥ स्तुमो वा ॥ इङ् अध्ययने । याचामहे वा ॥ याञ्चाकर्मसु पाठात् ॥ ५ ॥ ६२ ॥

५८ तुंजेतुंजे॥त्वयैव॥तुंजतिर्गतिकर्मादानकर्मावा।ततश्चत्वयाक्रियमाणे॥तुंजेतुंजे॥गमने॥दानेवा॥क्रियायाश्चतिशेषः॥प्रेरणइतितुतात्पर्यं।य
द्वानेकार्थत्वाद्धातूनांतुंजतिःप्रेरणेवर्तते॥तुंजेतुंजे॥तत्रतत्रस्तोतृषुत्वयैवप्रेरणेजातेसति॥येप्रवृत्ताः॥उत्तरे॥उत्तराःउत्तमाःस्तोमाः।

तुंजेतुंजेयउत्तरेस्तोमाइंद्रस्यवज्रिणः॥नविंधेअस्यसुष्टुतिं॥२॥३४॥तुंजे॥ऽतुंजे॥ये॥उत्ऽतरे॥
स्तोमाः॥इंद्रस्य॥वज्रिणः॥न॥विंधे॥अस्य॥सुऽस्तुतिं॥२॥३४॥त्वयैवप्रेरणेजातेतत्रतत्र
यउत्तराः॥तेपिस्तोमाःसुष्टुतित्वमस्यानंत्यान्नचाप्नुयुः॥२॥३४॥

स्तुतिविशेषाः।तेपि॥अस्यइंद्रस्य॥तव।सुष्टुतिं।सुष्टुतित्वं।नविंधे।वर्णव्यत्यासादिनानविंदे।नाप्नुयुः।आनंत्यात्।गुणैरनंतत्वेन।सर्ववर्ण्यत्वा
दितिभावः॥२॥३४॥

व्यास ५८

वृषा॥प्रतिवीरः॥एकस्यवृषभस्ययःप्रतिवीरोऽपरोवृषासःवंसउच्यते॥तंवंसंप्रतियोविभीर्युद्धायगच्छति॥सवृषावंसगः॥सः।यूथेव॥यूथानीव।
यथागवांयूथानि॥आकर्षति॥एवंईशानःप्रभुः॥अप्रतिष्कुतः॥अप्रतिद्वंद्वः॥इंद्रः॥कृष्टीःप्रजाः॥ओजसासामर्थ्येन॥इयर्ति॥गतिकर्मायं।

वृषायूथेववंसगःकृष्टीरियर्त्योजसा॥ईशानोअप्रतिष्कुतः॥३॥३४॥वृषा॥यूथाऽइव॥वंसगः॥
कृष्टीः॥इयर्ति॥ओजसा॥ईशानः॥अप्रतिऽस्कुतः॥३॥३४॥प्रतिवीरोवृषावंसस्तंगंतावंसगोविभीः॥
यूथान्याकर्षतियथाप्रजाःप्रेरयतिप्रभुः॥अल्पस्यापिप्रसिद्ध्यैवदृष्टांतत्वंतुयुज्यते॥३॥३४॥

अंतर्णीतण्यर्थः॥गमयतिप्रेरयतीतियावत्॥नन्वीश्वरस्याल्पोवृषादृष्टांतःकथमुच्यतेतत्राह॥अल्पस्यापीति॥दृष्टांतोहिप्रत्यायनार्थंवक्त
व्यः॥तच्चप्रसिद्धेनैवभवतीतिभावः॥३॥३४॥श्रीमदप्रतिवीरायास्मदंतर्यामिणेश्रीहरयेनमः॥ ॥

यएकः॥ राजायः। इंद्रः। एकएव। चर्षणीनां॥ प्रजानां वसूनां। वित्तानां च। पंचक्षितीनां॥ देवादिभेदेन पंचविधानां प्रजानां अपि। इरज्यति॥ ऐश्वर्यकर्मायं रा
५९ जा भवति॥ सकृष्टीः। इयतरिति दूर्वेणिसंबंधः। चर्षणीनामित्यादि षष्ठी द्वितीयार्थे॥ चर्षणीनां पंचक्षितीनां चेति पुनरुक्तिरित्यत आह॥ सामान्यादि
ति॥ चर्षणीनामिति सामान्यादुक्तं॥ पंचक्षितीनामिति विशेषतः॥ अतो नोक्तदोषः॥ ४॥ १४॥ इंद्रं वः॥ सम्यक्॥ जनेभ्योव इति वचनाज्जनान्प्रती
यएकश्चर्षणीनां वसूनामिरज्यति॥ इंद्रः पंचक्षितीनां॥ ४॥ १४॥ यः॥ एकः॥ चर्षणीनां॥ वसूनां॥ इरज्यति॥ इंद्रः॥ पंच॥ क्षितीनां॥ ४॥ १४॥
राजा भवति वित्तानां प्रजानां चैक एव यः॥ देवगंधर्वदैतेयपितृमानुषभेदतः॥ प्रजानामपि पंचानां सामान्याच्च विशेषतः॥ ४॥ १४॥ इंद्रं
वो विश्वतस्परि हवामहे जनेभ्यः॥ अस्माकमस्तु केवलः॥ ५॥ १४॥ इंद्रं॥ वः॥ विश्वतः॥ परि॥ हवामहे॥ जनेभ्यः॥ अस्माकं॥ अस्तु॥ के
वलः॥ ५॥ १४॥ सम्यग्घ्वयामहे सर्वगतं व्यक्तरूपतः॥ स्थातुमेकत्र वो थार्थमजनानोस्तु सकेवलः॥ ५॥ १४॥

दं वचनमिति ज्ञायते॥ अत उक्तं॥ हे जनाः॥ विश्वतः॥ सर्वत्र स्थितं॥ सर्वगतं॥ इंद्रम्॥ जनेभ्यः॥ वः युष्माकमर्थाय॥ परि सम्यक्॥ हवामहे॥ आह्वयामः॥
सर्वगतस्य कथमाह्वानमित्यतोभिप्रायमाह॥ व्यक्तरूपतः एकत्र स्थातुमिति॥ आहूतश्चासौ केवलः इंद्रः॥ नः॥ सर्वेषां अस्तु इष्टद इति शेषः॥ ५॥ १५॥

व्यास
५९

इंद्रं वयं॥ महत्॥ वृत्रेषु॥ तमःसु अज्ञानेषु॥ युजं॥ विरोधितया घटमानं॥ तमसां प्रतियोगिनं॥ प्रसिद्धेंद्र विषये बहुवचनमाद्यर्थे॥ वज्रिणं॥ वृजीवर्जन इ
त्यदः रूपं भीतिवद्यत्र अरिभिः वर्ज्यं॥ तमिदं॥ महाधने॥ महाधनाद्यर्थे॥ अर्भे अल्पे च धने अल्पधनार्थे॥ सांसारिक पुरुषार्थार्थे॥ महदल्पधनार्थिनः वयं॥ हवाम
हे॥ आह्वयामः॥ ५॥ १३॥ सनः॥ अस्मदीयं॥ हे वृषन्॥ वर्षितः श्रेष्ठ॥ सत्रादावन्॥ सत्रा॥ सर्वपर्यायैः सहार्थे वा॥ तदुपपदाद्ददातेर्वनिप्॥ सर्वदातः सहार्थे
इंद्रं वयं महाधन इंद्रमर्भे हवामहे॥ युजं वृत्रेषु वज्रिणं॥ ५॥ १३॥ इंद्रं॥ वयं॥ महाऽधने॥ इंद्रं॥ अर्भे॥ हवामहे॥ युजं॥ वृत्रेषु॥ वज्रिणं॥ ५॥ १३॥ महदल्पधना
र्थिनः॥ हवामहेऽरिवर्ज्यं तं तमसां प्रतियोगिनं॥ ५॥ १३॥ स नो वृषन्नमुं चरुं सत्रादावन्नपा वृधि॥ अस्मभ्यमप्रतिष्कुतः॥ ३॥ १४॥ सः॥ नः॥ वृषन्॥
अमुं॥ चरुं॥ सत्राऽदावन्॥ अप॥ वृधि॥ अस्मभ्यं॥ अप्रतिऽस्कुतः॥ ३॥ १४॥ अस्मदीयं चरुं भोज्यमानंदं तमपावृणु॥ मोक्षगं सर्वदातस्त्वमप्रतिद्वंद्वो ६
वृषन्॥ ३॥ १४॥
ऽर्थतः सर्वेष्टदात्वमेव लभ्यते॥ त्वं नः॥ अस्मदीयं॥ अमुं तं परोक्षं चरुं॥ चरति भक्षणार्थः॥ ततः कर्मण्युवारः॥ भोज्यमनुभवनीयं॥ आनंदं॥ अस्मभ्यं अस्मदर्थं॥
अपावृधि॥ अविद्यावृतमपावृणु॥ मतः॥ त्वमेव॥ अप्रतिष्कुतः॥ स्कु युआप्रवणे॥ आवरणमागमनं॥ प्रतुष्कुतः॥ प्रत्यागतः॥ नेवंत्वमित्यप्रतिष्कुतः॥ येरिभिर्युद्धेषु अ
प्रत्यागतः॥ अप्रतिद्वंद्वः॥ अप्रतिद्वंद्व इति लुप्तविभक्तिको निर्देशः॥ प्रसिद्धे इंद्रे प्रतितु॥ चरुं हविः॥ अपावृधि स्वीकारेण सफलीकुरु॥ यद्वा चरुं मेघं॥ वजश्चरुर्वरा
ह इति मेघनामसु पाठात्॥ नः॥ अस्मदर्थमेव॥ जातं॥ अस्मभ्यं॥ अपावृधि॥ उद्घाटयेति योज्यं॥ ३॥ १४॥

६०

नियेन। येनारीन्। येन वित्तेन निमित्तेन॥ त्वोतासः। छंदसि युष्मदस्मदोः प्रत्ययोत्तरपदयोरकारादेशः॥ अवतिः प्रेरणार्थः। त्वत्प्रेरिताः। वयं। मुष्टिहत्यया मुष्टि
घातेन। मुष्टियुद्धेन। अरीन्। निरुणधामहे। निरुंधामः॥ धात्वंतरस्यैतद्रूपं। किंच। येन वृत्रा। वृत्राणि। तमांसि। निरुधामहे। ज्ञानयुक्ता इति शेषः। अत्र येने
ति ज्ञानवित्तमुच्यते॥ येन च। अर्वता तुरगेण। तुरगादिभिः। कांश्चित्। अरीन्। निरुणधामहे॥ तादृग्वित्तमाभरेति पूर्वेण संबंधः॥ ननु येन वृत्राण्य

नियेनमुष्टिहत्ययानिवृत्रारुणधामहे॥ त्वोतासोन्यर्वता॥२॥३५॥ नि। येन। मुष्टिहत्यया। निवृत्रा। रुणधामहे॥ त्वाऽउतासः। नि। अर्वता।२॥३५॥
येनारीन्मुष्टियुद्धेन तमांसि ज्ञानयुक्ताः॥ त्वत्प्रेरिता निरुंधामः कांश्चिद्वा तुरगादिभिः॥ आवृत्त्यैवोपसर्गस्य क्रियावृद्धिर्भविष्यति॥२॥३५॥

रीश्च मुष्टिहत्ययाऽर्वता निरुणधामहा इत्येकमेव वाक्यं कस्मान्नांगीक्रियते तत्राह॥ आवृत्त्यैवेति॥ अत्र नीत्युपसर्गस्य त्रिरावृत्त्या निरुणधामहा इति क्रि
यायाः धातोरपि आवृत्तिरंगीकर्तव्यैव॥ उपसर्गाः क्रियायोग इति क्रियायोग एवोपसर्गत्वश्रवणात्। वाक्यभेदेन सम्यगन्वयसिद्धावध्यासकल्पनानु
पपत्तेः प्रभवस्त्रिष्टुभमित्यादौ वाक्यस्य भेत्तुमशक्यत्वात्तत्कल्पनं॥ आपंचभ्यः प्रयोक्तव्या उपसर्गा मनीषिभिरित्यपि विजातीयापेक्षं॥२॥३५॥ ॥

व्यास

६०

इंद्र त्वोतासः॥ त्वत्प्रेरिताः॥ हे इंद्र। त्वोतासः॥ त्वत्प्रेरिता वयं। वज्रं। ज्ञानं रतिं च॥ ज्ञानविषयां ज्ञाननिमित्तां रतिं वा। घना॥ तृतीयैकवचनांतमेतत् भावप्रधा
नं। दृढत्वेन। आददीमहि॥ त्वत्प्रेरणयैव ज्ञानरतिमंतो भवामेत्यर्थः॥ त्वत्प्रेरिता एव। युधि। स्पृधः। स्पर्धिनः। युद्धानि वा। सं जयेम॥३॥३५॥ वयं शूरे

इंद्रत्वोतासआवयंवज्रंघनाददीमहि॥ जयेमसंयुधिस्पृधः॥३॥३५॥ इंद्र। त्वाऽउतासः॥ आ। वयं। वज्रं। घना॥ ददीमहि॥ जये
म॥ सं। युधि॥ स्पृधः॥३॥३५॥ त्वत्प्रेरिता ज्ञानरतिं दृढत्वेनाददीमहि॥३॥३५॥ वयंशूरेभिरस्तृभिरिंद्रत्वयायुजावयं॥ सास
ह्यामपृतन्यतः॥४॥३५॥ वयं। शूरेभिः। अस्तृभिः। इंद्र। त्वया। युजा। वयं। स सह्याम। पृतन्यतः॥४॥३५॥ त्वया पृतन्यतः शत्रूनभिष्या
मस्त्रयोद्धृभिः॥४॥३५॥

भिः। त्वया। युजा। युनक्तीति युक्। सख्या सता। त्वत्प्रसादेनैव। शूरेभिः। शूरैः। अस्तृभिः। अस्त्रिभिः। अस्त्रयोद्धृभिः। भटैः सह। पृतन्यतः। युध्यतः शत्रून्। सा
सह्याम। अतिशयेन पुनः पुनर्वा सहामहे॥ अभिष्याम। अभिमुखाः स्याम। उपसर्गप्रादुर्भ्यामस्तिर्यच्परः॥ किंच। वयं च। त्वय्येव त्वदधीनसत्ताः इत्यर्थः॥४॥३५॥

महाँ॒ इंद्रः॥यस्मात्॥नु॥यस्मात्॥असौ॥इंद्रः॥विष्णुः॥महान्॥गुणैरनंतः॥परश्च॥अनादिः।कालतोप्यनंतः।प्रथिना।प्रथिम्ना।द्यौर्न।आका
६३ शवत्।देशतोप्यनंतश्च।तथा।शवः।स्कखबले।उभयनामस्कपाठात्।नित्याभिव्यक्तस्करबलात्मकश्च।शब्दः स्कखवाची।वेदेशब्दो बलवाचीति

महाँ॒ इंद्रः परश्चनुमहित्वमस्तुवज्रिणे॥द्यौर्नप्रथिनाशवः॥५॥३५॥महान्॥इंद्रः॥परः॥च॥नु॥महित्वं॥अस्तु॥
वज्रिणे॥द्यौः॥न॥प्रथिना॥शवः॥५॥३५॥यस्मान्महाननादिश्च विष्णुर्जीवोवरस्तथा॥तस्यैवास्तुमहत्वंतन्न
जीव ब्रह्मतांस्मरेत्॥आकाशवत्प्रथिम्नासौशवःस्कखबले तथा॥५॥३५॥

वा॥जीवस्तु अवरः।गुणादिनेतिशेषः।तत्।तस्मात्।महित्वं।महत्वं।ब्रह्मत्वं।वज्रिणे।तस्य।विष्णोरेव।अस्तु।तस्यैवजानीयात्।नपुनर्जी
वस्य ब्रह्मतांस्मरेदितितात्पर्यार्थः॥५॥३५॥

व्यास
६३

ऐंद्र॥दशर्चमेतदैंद्रं सूक्तं॥जयिना॥हेइंद्र॥सानसिं।सानोलाभः॥मत्वर्थेसिः।लाभयुक्तं।सजित्वानं।जित्वना।जयिना।पुत्रादिनासहितं।

ऐंद्रसानसिंरयिंसजित्वानंसदासहं॥वर्षिष्टमूतयेभर॥१॥३५॥आ॥इंद्र॥सानसिं॥रयिं॥
सजित्वानं॥सदाऽसहं॥वर्षिष्टं॥ऊतये॥भर॥१॥३५॥जयिना सहितंलाभयुक्तं वित्तं
सदाबलं॥वर्षिष्टंस्कमहद्रक्षानिमित्तंनित्यदाभर॥१॥३५॥श्रीरामचंद्रायनमः॥

सदासहं॥सदाबलं।सदाबलवत्।वर्षिष्टं।वृद्धतमं।स्कमहत्।ऊतये।रक्षायै।रक्षानिमित्तं।रयिंवित्तं।अस्मभ्यं।नित्यदा।आभर।आहर।देही
तियावत्॥१॥३५॥

यः।कुक्षिः।तस्य।इंद्रस्य।देवस्य।यः।सोमपातमः।अतिशयेनसोमपाः।कुक्षिः।सःसमुद्रइव।रत्नाकरइव।तत्रसोमंसमर्पितवतेभक्ताय।अखिलान्कामान्पिन्व
६२ ते।पिविमिविसेचने।क्षरति।सततंददाति।किंच।तस्य।काकुदः।जिह्वाश्च।ककुदितितालुनाम।तत्रभवाजिह्वाकाकुत्।अकारलोपात्।उर्वीः।उर्व्यः।आपो
न।आपइव।महापइवभक्तानांतर्पकाः।कथंबहुवचनं।बह्व्यः।तदेवकथं।बहुमुखेषुयाः॥२॥१६॥एवाह्यस्य।एवमेव।यस्त्वं।विरप्शी।विशिष्टबलवान्।

यःकुक्षिःसोमपातमःसमुद्रइवपिन्वते॥उर्वीरापोनकाकुदः॥२॥१६॥यः।कुक्षिः।सोमऽपातमः।समुद्रःऽइव।पिन्वते।उर्वीः।आपः।न।काकुदः॥
२॥१६॥यःकुक्षिस्तस्यदेवस्यसमुद्रइवसोखिलान्॥कामान्क्षरतिभक्तायमहापइवतर्पकाः॥काकुदस्तस्यजिह्वास्कबह्व्योबहुमुखेषुयाः॥
२॥१६॥एवाह्यस्यसूनृतावीरप्शीगोमतीमही॥पक्वाशाखानदाशुषे॥३॥१६॥एव।हि।अस्य।सूनृता।विरप्शी।गोऽमती।मही।पक्वा।शाखा।
न।दाशुषे॥३॥१६॥एवमेवास्यवाणीचवेदेतामहतीतथा॥पक्वशाखेवयजतेवरदात्रीविरप्शिनः॥बलिष्ठस्यहिते॥३॥१६॥

तस्यविरप्शिनः।बलिष्ठस्य।अस्य।तेतव।संबंधिनी।गोमती।वाग्युक्ता।वेदेता।वेदैःस्तुत्या।महीमहती।यास्सूनृता।साध्वीवाणी।सापिएवाहि।एवमेवहि।कु
श्यादिवदेव।दाशुषे।यजते।पक्वाफलवती।कल्पतरुशाखेव।वरदात्रीभवतीतिशेषः।यद्वा।विरप्शिनः।बलिष्ठस्य।तेतवसंबंधिनी।हियस्मात्तस्माद्विर
प्शीतिप्रसक्तांतर्भाविनस्सूनृतायाविशेषणमुक्तं।यद्यपिविरप्शीतिमहन्नामसुपठितं।तथापिमहीत्यनेनगतार्थत्वादन्यथाव्याख्यातं॥२॥१६॥ व्यास
६२

एवाहिते।संति।हेइंद्र।दाशुषे।त्वां।यजते।मावते।ज्ञानिने।दातुं।ते।तव।विभूतयेऐश्वर्याणि।ऊतयः।रक्षाश्च।सद्यश्चित्सद्योपि।नित्यमितिया
वत्।संसेवहि॥४॥१६॥एवाह्यस्य।स्तोमाः।अस्यपरमेश्वरस्य।काम्या।काम्यानि।प्रियाणि।उक्थं।उक्थानि।सोमपीतये।सोमपानार्थं॥

एवाहितेविभूतयऊतयइंद्रमावते॥सद्यश्चित्संतिदाशुषे॥४॥१६॥एव।हि।ते।विऽभूतयः।ऊतयः।इंद्र।माऽवते॥
सद्यः।चित्।संति।दाशुषे॥४॥१६॥संतिसद्योपियजतेहिते॥मावतेज्ञानिनेनित्यमूतयश्चविभूतयः॥४॥१६॥ए
वाह्यस्यकाम्यास्तोमउक्थंचशंस्या॥इंद्रायसोमपीतये॥५॥१६॥एव।हि।अस्य।काम्या।स्तोमः।उक्थं।च।शंस्या।इंद्राय।
सोमऽपीतये॥५॥१६॥स्तोमाउक्थानिचैवास्यतस्मैकाम्यानिसर्वदा॥गेयाःशंस्यानिसोमस्यपीतयेनान्यथापिबेत्॥५॥१६॥

तस्मैइंद्राय।शंस्या।शंस्यान्येवहि॥स्तोमःस्तोमाश्च।इंद्राय।सोमपीतये।गेयाइतिशेषः।सोमपीतयइत्स्फपपादयति॥नान्यथेति॥स्तुत्याप्रसन्नए
वहिपिबति।नत्वभिलाषेणेति॥५॥१६॥स्तुत्याप्रसन्नोभगवान्सोमंपिबतिनान्यथा॥पूर्णस्यतस्यकिंतेनसमुद्रइववारिया॥स्तुतिप्रसन्नामनमः॥

इंद्रेहि॥एतदपिदशर्चमैंद्रंसूक्तं।सोमपर्वशब्दार्थमाह॥सोमपा इति॥सोमशब्दोपपदात्पिबतेर्वन्प्रत्यये कृते सोमपाः सोमपर्वाण इत्युच्यंत इत्यर्थः।यद्वा
६३ सोमस्य पर्वाणि अवदानानि येषां ते सोमपर्वाणः।यो हियस्याहारः सतस्य सोमपाः सोमपर्वाण इत्युच्यंत इत्यर्थः।अभिष्टिपदं व्याख्याति॥सर्वमिति॥
सर्वं।जगत्।यस्मात्।तदिछया वर्तते ऽतो सौ।अभिष्टिः।अभितः।सर्वविषये।इष्टिरिछायस्येति।शकंध्वादित्वाद्दीर्घाभावः।ओजसेत्यस्याभि

इंद्रेहिमत्स्यंधसोविश्वेभिः सोमपर्वभिः।महाँ अभिष्टिरोजसा॥१॥१७॥इंद्र।आ।इहि॥
मत्सि।अंधसः।विश्वेभिः।सोमपर्वभिः॥महान्।अभिष्टिः॥ओजसा॥१॥१७॥सोमपाः सोम
पर्वाणः सर्वं यस्मात्तदिछया॥अभिष्टिरोजसा नित्यं मदं स्फुरखमवाप्स्यहि॥१॥१७॥ ॥ सि

ष्टलोपपादकत्वं सूचयितुं स्वरूपेण ग्रहणं॥मत्सीति व्याख्याति॥मदमिति॥विकरणादिव्यत्यासेनेत्यर्थः॥अवाप्स्यसीत्युक्त्याप्राप्तामभि
लषणीयं कांनिवारयति॥नित्यमिति।हेइंद्र॥महान्।ओजसा।सामर्थ्येन।अभिष्टिश्च।त्वं।विश्वेभिः।विश्वैः।सोमपर्वभिः।देवैः सह।ए
हि।एत्य च॥अंधसः अंधसा हविरादिना ऽस्मद्दत्तेन।मत्सि मदं प्राप्स्यसि॥१॥१७॥

व्यास
६३

समोहे॥अन्यये।समोहे।संवहने॥अन्यसंवहनेन वा॥अपि॥अन्यैः दृढाः प्रेरिता अपीतियावत्।तोकस्य॥अपत्यस्य॥ज्ञानमेवहि॥जीवतो
ऽपत्यं॥सनितौ॥लाभा सति॥ज्ञानलाभेन।तं।इंद्रं॥जनार्दनं॥आशत॥आश्नुवत॥प्राप्ताः॥शरणमिति शेषः॥त एव तु॥नरः॥पुरुषाः।

समोहेवायआशततनरस्तोकस्यसनितौ॥विप्रासोवाधियायवः॥१॥१६॥सं।ओहे॥वा।ये।आशत॥
नरः।तोकस्य।सनितौ।विप्रासः।वा।धिया।ऽयवः॥१॥१६॥अन्यसंवहनेनापि ये तं प्राप्ता जनार्द
नं॥ज्ञानलाभेन तु नरस्त एव परावोपरे।विप्राश्चैवधियायुक्ता मूर्खाः श्रद्दसमामताः॥१॥१६॥

अपरे पशव इति शेषः।किंच।ये।धियायवः।धियायुक्ताः।युमिश्रणे।अन्यभ्योदृश्यत इति विच्।इटिग्रहणाद्गुणाभावः॥तृतीयाया अलुक्।भ
गवज्ज्ञानिनः।ते वा त एव।विप्रासः।विप्राः।मूर्खाः।श्रद्दसमामता इति शेषः॥१॥१६॥

अस्तग्रं। त्वन्निस्ताः। हे इंद्र। त्वद्दते। अन्ये नस्तुत्यरूपेणक्कचिदपिअसेव्याः। ते। त्वदीयाः। त्वन्निस्तताः। गिरः। वेदवाचः। अस्तग्रं। अनारतं। वृषभं। श्रेष्ठं।
६४ पतिं। स्वपतिं। त्वांप्रसेव। उत। उच्चैः। सम्यक्। मुख्यतयेतियावत्। अहासत। अगमन्। ओहाङ् गतौ। विस्तृष्टाः। त्वामेवमुख्यया वृत्त्या प्रतिपादयितुमस्मा
भिरुच्चारिताइतितात्पर्यं॥४॥१७॥ संचोदय॥ अर्वाक्। हे इंद्र। अर्वाक्। अधस्तात् स्थितान्नीचान्। अस्मान्प्रति। चित्रं। भद्रं। वरेण्यं। वरणीयं। रा

अस्तग्रमिंद्रतेगिरः प्रतित्वामुदहासत॥ अजोषावृषभंपतिं॥४॥१७॥ अस्तग्रं। इंद्र। ते। गिरः। प्रति। त्वां। उत। अहासत। अजोषाः। वृष
भं। पतिं॥४॥१७॥ त्वन्नःस्तुतावेदवाचस्त्वांप्रसेवाप्यनारतं॥ उच्चैर्मुख्यतयासम्यग्विसृष्टाः स्वपतिंप्रति॥ अजोषाः स्तुत्यरूपेणत्वसे
व्यास्त्वद्दतेक्कचित्॥४॥१७॥ संचोदयंचित्रमर्वाग्राधइंद्रवरेण्यं॥ असदित्तेविभुप्रभु॥५॥१७॥ सं। चोदय। चित्रं। अर्वाक्। राधः। इंद्र।
वरेण्यं। असत्। इत्। ते। विऽभु। प्रऽभु॥५॥१७॥ अर्वाङ्नीचान्प्रतित्वस्माभद्रंराधःप्रचोदय॥ अस्त्येवतेविशेषेणप्रकृष्टंभूमस्तुतं॥५॥१७॥

धः। ऐश्वर्यं। संचोदय प्रचोदय। अस्मभ्यंदेहीतियावत्। दातुंच। तेतव। विशिष्टंभवतीतिविभु। प्रकृष्टंभवतीतिप्रभु। विशेषेणप्रकृष्टमितियावत्। भू
भमितिशेषः। विप्रसंभ्योर्दुसंज्ञायां। असदित्। लडर्थेपंचमोलकारः। अस्त्येव। प्रभ्वप्रभूतमक्षयमितिप्रभुशब्दस्यार्थांतरमाह॥ अच्युतमि ति॥५॥१७॥ व्यास ६४

अस्मान्। रभस्वतः। हेतुविद्युम्न। महाकीर्ते। इंद्र। रभस्वतः। शब्दवतः। स्तोतॄनितियावत्। रेभतीतितत्कर्मकपाठात्। यशस्वतः यशस्विनः। अस्मान्
राये। सप्तम्येषा। महाराये॥ महैश्वर्यरूपे॥ तत्र त्वयि॥ सुचोदय॥ त्वद्विषयबुध्यादियुक्तान्कुरु॥१॥१८॥ संगोमत्। अस्मासु। हे इंद्र। विश्वं॥ संपूर्णं॥

अस्मांत्सुतत्रचोदयेंद्ररायेरभस्वतः॥ तुविद्युम्नयशस्वतः॥१॥१८॥ अस्मान्॥ सु॥ तत्र॥ चोदय॥ इंद्र॥ राये॥ रभस्वतः॥ तुविऽद्युम्न॥
यशस्वतः॥१॥१८॥ रभस्वतःशब्दवतस्तोतॄनस्मान्यशस्वतः॥ तत्रत्वयिमहारायेमहाकीर्तेसुचोदय॥१॥१८॥ संगोमदिंद्रवा
जवदस्मेपृथुश्रवोबृहत्॥ विश्वायुर्धेह्यक्षितं॥२॥१८॥ सं॥ गोमत्॥ इंद्र॥ वाजऽवत्॥ अस्मेइति॥ पृथु॥ श्रवः॥ बृहत्॥ विश्व
ऽआयुः॥ धेहि॥ अक्षितं॥२॥१८॥ अस्मास्वतिबृहद्ज्ञानंनित्यःसंधेहिचाक्षय्यं॥२॥१८॥

आयुर्यस्यासौविश्वायुः॥ नित्यः॥ त्वं॥ अस्मे॥ अस्मासु॥ गोमत्। गोयुक्तं॥ वाजवत्॥ अन्नेनापिसहितं॥ अक्षितं॥ अक्षयं॥ पृथु॥ बृहत् अति
बृहत्॥ श्रवसा॥ श्रवणेन॥ जायतइति॥ श्रवः ज्ञानं॥ संधेहि॥ सम्यक् देहि॥२॥१८॥ श्रीमद्बृहज्ज्ञानप्रदात्रेहरयेनमः॥ ॥

असमे॥ विद्यां॥ हेइंद्र॥ अस्मे॥ अस्मासु॥ बृहत्॥ श्रवः॥ महतीं॥ विद्यां॥ सहस्रसातमं॥ अतिशयेनसहस्रलाभसहितं॥ बहुलाभयुक्तं॥ द्युम्नं॥ कीर्तिंच॥ ताः

६५ प्रसिध्धाः॥ रथिनीः॥ इषः॥ रथोदेहः॥ तद्वतीः॥ सदेहान्नमितियावत्॥ अविकलेनदेहयुक्तमन्नंच॥ धेहि॥ देहि॥ ननुसंचोदयचित्रमित्यादिनोक्तमेवोच्य

तइत्यतः पुनरुक्ति दोषस्तत्राह॥ प्रार्थनइति॥ पौनरुक्त्यंनदोषाययतइतिशेषः॥ ततश्चोदयेत्युक्त्वा पुनः संधेहीत्यादिवचनंयुज्यतइतियोज्यं॥

अस्मेधेहिश्रवोबृहद्युम्नंसहस्रसातमं॥ इंद्रतारथिनी रिषः॥ ३॥३८॥ अस्मे इति॥ धेहि॥ श्रवः॥ बृहत्॥ द्युम्नं॥ सहस्रऽसात

मं॥ इंद्र॥ ताः॥ रथिनीः॥ इषः॥ ३॥३८॥ विद्यांकीर्तिंसदेहान्नंबहुलाभयुतंबृहत्॥ प्रार्थनेपौनरुक्त्यंनचोदयेतिपुनःपुनः॥ ३॥३८॥

वसोरिंद्रंवसुपतिंगीर्भिर्गृणंतऋग्मियं॥ होमगंतारमूतये॥ ४॥३८॥ वसोः॥ इंद्रं॥ वसुऽपतिं॥ गीःऽभिः॥ गृणंतः॥ ऋग्मियं॥

होम॥ गंतारं॥ ऊतये॥ ४॥३८॥ वसोर्वसूनांचपतिं देवदेवेश्वरंप्रभुं॥ ऋङ्मेयमाह्वयामोत्रगृणंतोभीष्टसिध्धये॥ ४॥३८॥

३॥३८॥ वसोः वसुशब्दोदेवपर्यायः॥ जातावेकवचनं॥ वसूनांयेवसवः तेषांपतिं। देवदेवेश्वरं॥ ऋग्मियं॥ ऋग्मेयं ऋग्भिर्ज्ञेयं॥ इंद्रं॥ प्रभुं॥ भ

क्तान्प्रतिगंतारं॥ गीर्भिः गृणंतः स्तुवंतः। वयं॥ ऊतये अभीष्टसिध्धये॥ अत्र होम॥ आह्वयामः॥ ४॥३८॥ ऋतिक्स्तुतिप्रियायनमः॥ ॥ व्यास

६५

एमेनं। एनं। हेऋत्विजः। तंएनं। मंदिं। मदकारणं। करणइकारः। चक्रिं। आदृगमेतिकरणेकिः। आइत्युपसर्गस्य चक्रिमित्यनेनास्तिसंबंधः। सम्यक्कर्मिणं।

विश्वकर्मंदिने। मदनीलाय। विश्वानिचक्रये। विश्वानिकार्याणिकृतवते॥ सर्वकर्मिणे। इंद्रायविश्वमे॥ तस्य। पानाय। सुते। इंदौ। सोमे। आसृजत।

सन्निहितंकुरुतेव॥ स्वसन्निधानपवित्रितमेवसोमंदेवःपिबतीति॥ २॥३७॥ मत्स्व। स्वानंद। हेसुशिप्र। स्वानंदशोभनानंद॥ विश्वाः चर्षण

एमेनंसृजतासुतेमंदिमिंद्रायमंदिने॥ चक्रिंविश्वानिचक्रये॥ २॥३७॥ आ। ईं। एनं। सृजत। सुते। मंदिं। इंद्राय। मंदिने॥ चक्रिं।

विश्वानि। चक्रये॥ २॥३७॥ एनमासृजतेंदौचविश्वकृतंमदकारणं॥ मंदिनेविश्वमेसम्यक्कर्मिणंसर्वकर्मिणे॥ २॥३७॥ मत्स्वासु

शिप्रमंदिभिः स्तोमेभिर्विश्वचर्षणे॥ सचैषुसवनेष्वा॥ ३॥३७॥ मत्स्व। सुऽशिप्र। मंदिऽभिः। स्तोमेभिः। विश्वऽचर्षणे॥ सचा। एषु।

सवनेषु। आ॥ ३॥३७॥ स्वानंदविश्वजीवेशामत्स्वास्मद्रक्षयासह॥ ३॥३७॥

यः प्रजाः यस्यासौविश्वचर्षणिः। विश्वचर्षणे। विश्वजीवेश। एषु त्रिषुसवनेषु। सचा। सह। अस्मद्रक्षयेतिशेषः॥ अस्मद्रक्षांकुर्वन्। मंदिभिः

मदहेतुभिः। स्तोमेभिः। अस्माभिःक्रियमाणैः स्तोमैः। आमत्स्व। सम्यङ्मदमवाप्नुहि॥ ३॥३७॥ ५

६६ यत्सानोः॥ उच्चतः। अस्पष्टो गूढशक्तिमान्। तस्य संबुधिः। हे स्पष्ट। यत् यस्मात्। त्वं कर्त्वं। करणे सामर्थ्यं। सानोः सानुं आरुहत्॥ सानुशब्दो गिरिशिखरवाची॥ उपचारेण उच्चतोप्युच्चम भवत्॥ भूरि। ततोप्यधिकं च। अभवत्॥ तत् तेन कारणेन। वृष्णिः वर्षिता। इंद्र। भवान्। अर्थं। स

अ यत्सानोः सानुमारुहद्भूर्यस्पष्ट कर्त्वं॥ तदिंद्रो अर्थं चेतति यूथेन वृष्णिरेजति॥ २॥ १९॥ यत्। सानोः। सानुं। आ। रुहत्। भूरि। अस्पष्ट। कर्त्वं। तत्। इंद्रः। अर्थं। चेतति। यूथेन। वृष्णिः। एजति॥ २॥ १९॥ उच्चतोप्युच्चतोप्युच्चं सामर्थ्यं करणे तव॥ ततोपि भूरि यत्तेन चेतस्यर्थं मत्तो भवान्॥ मुक्तामुक्तसमूहेन शोभते गूढशक्तिमान्॥ ॥

त्वं पदार्थान्। चेतति जानाति। अतएव च स्थेन। मुक्तामुक्तसमूहेन। एजति। एजतिर्दीप्त्यर्थः। शोभते। न हि पूर्णशक्तित्वमंतरेण सार्वज्ञं सर्वसेव्यत्वं च युज्यते॥

व्यास
६६

ऋ॰ एवं प्रकारांतरेण व्याचष्टे॥ उच्चादिति॥ यद्यस्मात्कारणात्। इंद्रस्य परेशस्य। कर्त्वं। कर्तृत्वं। सानोः सानुमारुहत्। उच्चादुच्चं विरिंचादि देवताजातं। गतं प्राप्तं। परमेश्वरो हिते षु स्थित्वा करोति। तेनैव कारणेन। तत्कर्तृत्वं। भूरि। अस्पष्ट। अतिशयेन स्पष्टमभूत्। स्पृश अज्ञातदृश्येति वक्ष्यति। नह्यन्यांतर्गततया विना साक्षादीश्वरगतं कर्तृत्वं मंदैर्दृश्यते। ततश्च सर्वकर्मकर्तृत्वादेव। स इंद्रः। अर्थं। अशेषांश्चार्थान्। चेतति। स्थेन। स्वरूपाणां महायूथेन। एजति कंपते। चेष्टते। यद्यपि स्वार्थत्वे लन्विहितः। तथापि स

उच्चादुच्चं विरिंचादिगतकर्तृत्वमेव यत्॥ भूरि स्पष्टमभूत्तेन परेशस्य ततश्च सः॥ चेतत्यर्थानशेषांश्च महायूथेन चेष्टते॥ २॥ १९॥ युक्ष्वा हि केशिना हरी वृषणा कक्ष्यप्रा॥ अथा न इंद्र सोमपा गिरामुपश्रुतिं चर॥ ३॥ १९॥ युक्ष्व। हि। केशिना। हरी इति। वृषणा। कक्ष्यऽप्रा। अथ। नः। इंद्र। सोमऽपाः। गिरां। उपऽश्रुतिं। चर॥ ३॥ १९॥ कक्ष्याभिपूरकौ पुष्ट्या युक्ष्व त्वं केशिनौ हरी॥ अथोपगम्य शृणु नो गिरः॥ ३॥ १९॥

सुटो बहुलमिति लट्यर्थे भवति॥ स च भावप्रधान इति कर्त्वं कर्तृत्वं॥ यद्वा तृचो लोपो त्र द्रष्टव्यः॥ अथवा कर्तव्यमेव कर्तृत्वं॥ लक्षणया कर्तृत्वं द्रष्टव्यं॥ २॥ १९॥ युक्ष्वा हि। कक्ष्या। हे सोमपाः। इंद्र। केशिना। केशिनौ। प्रलंबकेशवंतौ। वृषणा। वृषणौ। सेचकौ। युवानौ। कक्ष्यप्रा कक्ष्यप्रौ। कक्ष्येति मध्यरज्जुः। अश्वउरसि बध्यते सोच्यते। प्रा पूरणे। ततो विच्॥ पुष्ट्या कारणेन। कक्ष्याभिपूरकौ। हरी अश्वौ। युक्ष्व युंक्ष्व। योजय। अथ तदनंतरं। इह उपगम्य। नः गिरां उपश्रुतिं उपश्रवणं। चर कुरु। स्तुतिरूपाः नः गिरः शृणु॥ ३॥ १९॥

एहि॥अभिस्वर॥हे इंद्र॥एहि॥स्तोमान्स्तुतिं॥अभिस्वर च॥स्वीकारानुसारिणं स्वरं कुरु॥अभिगृणीहि॥प्रशंसां कुरु॥अस्मदीयामिति शेषः॥हे स्तोता
६७ रः॥साधु कृतमिति॥आरुव॥पुनर्हर्षान्महत्तरं शब्दं च कुरु॥सर्वत्र वसति॥सर्वस्यांतस्छो बहिष्ठश्च वर्तत इति वसुः॥हे वसो॥नः॥अस्म

एहि स्तोमाँ अभिस्वराभिगृणीह्यारुव॥ब्रह्म च नो वसो सचेंद्र यज्ञं च वर्धय॥४॥३९॥आ॥इहि॥स्तोमान्॥
अभि॥स्वर॥अभि॥गृणीहि॥आ॥रुव॥ब्रह्म॥च॥नः॥वसो इति॥सचा॥इंद्र॥यज्ञं॥च॥वर्धय॥४॥३९॥
अभिस्वर च स्तुतिं॥प्रशंसां कुरु शब्दं च पुनर्हर्षान्महत्तरं ब्रह्म यज्ञं च नोंतस्छो बहिष्ठश्चैव वर्धय॥४॥३९॥

दीयं॥ब्रह्म वेदं स्तुतिं च॥यज्ञं च॥सचा सहैव॥सुखेनैव वा॥वर्धय प्रवर्धय॥४॥३९॥स्तोत्रप्रसंनो भगवानस्मदीयस्तोत्र प्रशंसां करोति सा शासनं क्रमेण॥धु

व्यास
६७

सुते सुते॥अरिशब्दं व्याख्याति॥अविनाशीति॥यद्यप्यरिशब्द ईश्वर नाम सु पठितस्तथाप्यत्रान्वयादन्यथा व्याख्यातः॥नरिष्यति नरीयते वेत्यरिः॥यः अरिः अवि
नाशी॥आत्मनो विनाशेछुः अदुष्टो वा॥पुरुषः सः॥बृहच्छूषं महासुखं प्रति॥तत्रोद्दिश्य॥सुते सुते॥प्रतिसोम सवनं॥ओकसे गृहाय॥सदिति योग्यतया संबंधः॥
सतामाश्रयाय॥बृहते पूर्णाय॥इंद्राय देवायान्यर्चति॥द्वितीयार्थे चतुर्थी॥इष्टानिष्टप्राप्तिपरिहारकामः॥परमेश्वरमेवार्चेदिति॥५॥३८॥गायंति॥द्वादशार्च
मेतदैंद्रं सूक्तं॥हे शतक्रतो॥बहुज्ञान॥अर्कं॥अरकं॥अतिकं॥अतिशयेन सुखरूपं त्वां गायत्रिणः॥गायत्रं॥सामविशेषः॥तद्वंतः॥सामगाः॥गायंति॥अर्कि

सुते सुते न्योकसे बृहद्बृहत एदरिः॥इंद्राय शूषमर्चति॥५॥३८॥सुते सुते॥नि ओकसे॥बृहते॥आ॥इत्॥अरिः॥इंद्राय॥शूषं॥अर्चति॥
५॥३८॥अविनाश्यरिरुद्दिश्य बृहच्छूषं सुखं प्रति॥सुते सुते सद्गृहाय देवाय बृहते र्चति॥५॥३८॥गायंति त्वा गायत्रिणोर्चंत्यर्कमर्किणः॥ब्रह्मा
णस्त्वा शतक्रत उद्वंशमिव येमिरे॥३॥३९॥गायंति॥त्वा॥गायत्रिणः॥अर्चंति॥अर्कं॥अर्किणः॥ब्रह्माणः॥त्वा॥शतक्रतो इति शतक्रतो॥उत्॥
वंशं इव॥येमिरे॥३॥३९॥गायंति सामगास्त्विॠग्भिः शंसंत्यृग्वेदिनो तिकं॥विरिंचास्त्वा बहु ज्ञानशक्रकेतुमिवोछ्रितं॥व्यजानन्॥३॥३९॥॥

णः॥अर्का॥ऋचः॥तद्वंतः॥ऋग्वेदिनः॥त्वां अर्चंति॥ऋचस्तुतो॥ऋग्भिः शंसंति॥किंच ब्राह्मणः॥विरिंचाः॥उद्वंशमिव उच्चैर्वंशमिव॥शक्रकेतुमिव॥उछ्रितमिति यावत्॥
त्वां येमिरे॥व्यजानन्॥यद्यपि यमिर्न ज्ञाने पठ्यंते॥तथापि उद्येमिरे॥उदयछन्॥उछ्रयंतीति व्याख्यानस्य पूर्वोक्तन्यायेन दुष्टत्वाद् ज्ञानार्थो व्याख्यातः॥यद्वा उद्येमि
रे उछ्रितमकुर्वन्॥करणं न संभवतीत्युछ्रितं व्यजानन्निति॥३॥३९॥
रव्या

तमित् ॥ तमेव ॥ वयं ॥ सखित्वे ॥ सखित्वार्थे ॥ तमित् तमेव ॥ इंद्रं ॥ नित्यं ॥ शरणं ॥ ईमहे ॥ राये वित्तार्थं ॥ ईमहे ॥ सुवीर्ये ॥ साधुवीर्यार्थं ॥ च ॥ तं ॥
६८ ईमहे ॥ सर्वस्यसंग्रहणोक्तिः ॥ सखित्वाद्यर्थमिति ॥ शरणप्राप्तश्चसः ॥ यस्मात् ॥ शक्रः ॥ नित्यानंदस्वरूपत्वाच्छक्रशब्दार्थः ॥ शक्रः

तमित्सखित्वईमहेतंरायेतंसुवीर्ये ॥ सशक्रउतनःशकदिंद्रोवसुर्दयमानः ॥ ६ ॥ ३९ ॥ तं ॥ इत् ॥ सखित्वे ॥
ईमहे ॥ तं ॥ राये ॥ तं ॥ सुवीर्ये ॥ सः ॥ शक्रः ॥ उत ॥ नः ॥ शकत् ॥ इंद्रः ॥ वसुः ॥ दयमानः ॥ ६ ॥ ३९ ॥ तमेवशरणं
नित्यंसखित्वाद्यर्थमीमहे ॥ शक्त्यानंदस्वरूपत्वाच्छक्रः सर्वत्रचाशकत् ॥ अस्माकंचसदावित्तंददद्देवप्रवर्तते ॥ ६ ॥ ३९ ॥

शक्तो ॥ रमुक्रीडायां ॥ द्वाभ्यांउश्च उत ॥ तस्मात् ॥ शकत् ॥ सर्वत्र ॥ तत्तत्प्रार्थितसंपादने ॥ अशकत् ॥ शक्तोभवत्येव ॥ किंच ॥ सः ॥
इंद्रः ॥ नः ॥ अस्मभ्यं ॥ वसु वित्तं ॥ दयमानः ॥ दयदानगतिरक्षणेषु ॥ दददेवसर्वदाप्रवर्तत इति शेषः ॥ अतश्चतमीमहे ॥ ६ ॥ ३९ ॥ ॥ व्यास ६८

सुविवृतं ॥ विस्पष्टं ॥ हे इंद्र ॥ त्वदातमित् ॥ त्वद्दत्तमेव ॥ सर्वेविधयश्छंदसि विकल्प्यंत इति दोददोरित्यस्य विधिर्नभवति ॥ यद्वादापोदैपोवेद्रूपं ॥ अनेकार्थत्वाद्धा
तूनां दत्तमित्युक्तं ॥ यत्राः सुविवृतं ॥ विस्पष्टं ॥ सु सुष्टु ॥ निरजं ॥ अजगतिक्षेपणयोः ॥ आकल्यं अक्षेप्यं ॥ तिरोनिधेधार्थत्वात् ॥ अनपहार्यंच ॥ हियस्मात् ॥
एवंशुभंत्वदीयंदानं ॥ तस्मात् ॥ त्वं ॥ गवांव्रजं ॥ ज्ञानसमूहं ॥ स्वरूपभूतं ॥ अपदृधि ॥ विवृणु ॥ विवरणप्रार्थनंचआवृतस्यैव संभवतीति गूढमित्युक्तं ॥

सुविवृतंसुनिरजमिंद्रत्वादातमिद्यशः ॥ गवामपव्रजंवृधिकृणुष्वराधोअद्रिवः ॥ ३ ॥ २० ॥ सुऽविवृतं ॥ सुनिःऽअजं ॥ इंद्र ॥ त्वाऽदा
तं ॥ इत् ॥ यशः ॥ गवां ॥ अप ॥ व्रजं ॥ वृधि ॥ कृणुष्व ॥ राधः ॥ अद्रिऽवः ॥ ३ ॥ २० ॥ विस्पष्टंसुष्टुकाल्यंचयशस्त्वद्दत्तमेवहि ॥ स्व
दंज्ञानसमूहं त्वंविवृणुष्व क्षिप्रंनःकुरु ॥ अद्रिशादरणीयत्वात्प्राणस्तद्वंतकोऽद्रिवाः ॥ हरिःशक्रस्तथाद्रीणांछेदनाद्धारणादपि ॥ ३ ॥ २० ॥

नः अस्माकं राधः ॥ ऋद्धिं च ॥ कृणु कृणुष्व ॥ कुरु ॥ अद्रिव इति संबुध्यंतं भगवति व्याख्याति ॥ अद्रिरिति ॥ आदृ ॥ र्वादृ रते ः कर्मणि क्रिः ॥ आउः श्च ह्रस्वत्वं ॥
अद्रिशब्दे कर्मण्युपपदे तृण्शि तृण्यर्थाद्धतोस्कन् ङिश्च ॥ भाव्येतुक्वचिदद्रिवेतिपाठः ॥ तत्रछांदसः सकारलोपः ॥ इंद्रेव्याख्याति ॥ शक्र इति ॥
छेदनाद्धारणादपीत्यर्थद्वयं ॥ अद्रिशद्वोपपदाद्दृश्चतेरंतर्णिश्ताण्यर्थाद्धृञोवा ऽस्कन् ङिश्चेति ॥ ३ ॥ २० ॥

नहि त्वा॥ न त्वां॥ हे इंद्र। ऋघायमाणं। कंडूबादिः॥ वर्धमानं॥ सर्वगतं। त्वा। त्वां। द्यावापृथिव्यौ तदभिमानिन्यौ। श्रीभूमी अपि॥ उभे सहिते च। नहीन्वतः। नैव संप्राप्नुतो हि॥ इवे र्व्याप्तिकर्मसु पाठात्॥ तयोरपि सर्वगतत्वात्कथमेतदित्यत आह॥ अप्रसादत इति॥ त्वत्प्रसादेन विना। किंच। त्वं। स्व
६९ र्वतीः सुखवतीः। अपः प्रजाः। स्वर्गिणो मुक्ताश्च जेषः। अजयः। लेङर्थे लेट्। कथं त्वद्दासत्व तस्त्वासां॥ एवं विधश्च त्वं। स्वयं। अस्म

नहि त्वा रोदसी उभे ऋघायमाणमिन्वतः॥ जेषः स्वर्वतीरपः संगा अस्मभ्यं धूनुहि॥ २॥ २०॥ नहि॥ त्वा॥ रोदसी इति॥
उभे इति॥ ऋघायमाणं॥ इन्वतः॥ जेषः। स्वः ऽवतीः॥ अपः॥ सं॥ गाः॥ अस्मभ्यं॥ धूनुहि॥ २॥ २०॥ न त्वामृघायमाणं
हि वर्धमानं तु रोदसी॥ संप्राप्नुतः श्रीभूमी च सहिते चाप्रसादतः॥ अपः प्रजाः सुखवतीरजयस्त्वद्दासत्वतः॥ ज्ञानानिस्तं
धूनुहि च प्रापयोच्चा अपि स्वयं॥ २॥ २०॥

भ्यं। गाः। ज्ञानानि। संधूनुहि॥ कं पयगमय॥ अस्मान्प्रति प्रापय। च शब्दो ह्यासिध्याश्च गाः॥ साम्प्रितेत दूर्धां विशेषणत्तया च व्याख्या
ति। उच्चा अपीति॥ गा इत्येतदपेक्षया स्त्रीलिंगत्वं॥ यथायोगं भवती इंच व्याख्याति॥ २॥ २०॥ व्यास

६९

उक्थं॥ इंद्राय॥ परमेश्वराय॥ तस्यैव। वर्धनं। उक्थं। शंस्यं। शंसनीयं। अत्रोक्थस्येंद्र वर्धनत्वं प्रतीयते॥ तत्कीदृशमित्यत आह॥ निस्सेति॥ ततश्च वर्धनं प्र
काशकं। पुरुनिष्षिधः इतींद्रविशेषणं॥ बह्निति॥ निषेधतीति निष्षित्॥ पुरुशब्दस्य बह्निति व्याख्यानं॥ शत्रूनिति तस्य विशेष्य। उपपदं ह्वितीयां

उक्थमिंद्राय शंस्यं वर्धनं पुरुनिष्षिधे॥ शक्रो यथा सुतेषु णो रारणत्सख्येषु च॥ ५॥ १९॥ उक्थं॥ इंद्राय॥
शंस्यं॥ वर्धनं॥ पुरुनिःऽसिधे॥ शक्रः॥ यथा॥ सुतेषु॥ नः॥ ररणत्॥ सख्येषु॥ च॥ ५॥ १९॥ नित्यस्तुत्य
त्वतो विहमोर्वर्धनं तु प्रकाशतः॥ बहुशत्रून्निष्षिधसौ हरिर्दनुजघातकः॥ अस्मत्सख्याय शब्दं च चका ष
रास्मासु संस्थितः॥ यथा सुतेषु सोमेषु करोत्युत्स्विक्षु च स्थितः॥ ५॥ १९॥ ॥श्रीगुरवे नमः॥ ६९॥

तमितिदर्शयितुं शत्रूनित्युक्तं॥ अन्यथा विभक्तिव्यत्ययेन शत्रूणामित्यर्थः॥ तत्पर्यार्थमाह॥ दनुजघातक इति॥ सः शक्रः। यथा सोमेषु सुतेषु सत्सु।
रारणत्। शब्दं करोति। रित्विक्षु स्थितः स्तुतिप्रवर्तयति। एवं। नः सख्येषु। अस्मत्सख्याय च। रारणत्। अस्मासु संस्थितः शब्दं चकार सखा हमस्मीति। रार
णदिति रणेर्यङ्लुगंताल्लेट्। स च लडाद्यर्थे॥ ५।१९॥

विश्वाहि॥ विश्वत्वं। हियस्मात्। वृषंतमं। वृषः। शक्तिमान्। अतिशयेन वृषो वृषंतमः॥ छांदसो नकारागमः॥ नकारांताद्वा तमप्॥ अत्र नलोपाभावश्छांदसः। तं वृषं
७० तमं। शक्तिमत्तमं। वाजेषु युद्धेषु। हवनश्रुतं। भक्ताह्वानस्य श्रोतारं च। वा त्वां। विश्व विश्वः। तस्मात्। वृषंतमस्य शक्तिमत्तमस्य तव॥ सहस्रसातमामूतिं॥
सहस्रं सनोतीति सहस्रसाः। अतिशयेन सहस्रसाः सहस्रसातमा॥ तां॥ बहुलाभोत्तमम वनं॥ अतिलाभयुक्तां रक्षां। हूमहे आह्वयामः। प्रार्थयामह

विश्वाहित्वावृषंतमं वाजेषु हवनश्रुतं॥ वृषंतमस्य हूमह ऊतिं सहस्रसातमां॥ ४॥ २०॥ विश्व। हि। त्वा। वृषन्ऽतमं। वाजेषु। हवनऽश्रुतं॥ वृ
षन्ऽतमस्य॥ हूमहे॥ ऊतिं॥ सहस्र ऽसातमां॥ ४॥ २०॥ विश्वत्वां शक्तिमत्तमं॥ श्रोतारं युद्धे चाह्वानमाह्वयामस्त्वावनं॥ बहुलाभो
त्तममिति॥ ४॥ २०॥ स्थानांतरगते ऋचो॥ दृष्टं इयं तगंयाभ्यां मधुछंदाः समस्तवन्॥ आतूनइति तेनैव न विरुध्यारात र्चिता॥

तियावत्॥ श्रोतारमिति तन्। तेन द्वितीयोपपतिः। ऋकृशत् समाप्त्यर्थ इति शब्दः॥ ४॥ २०॥ नन्वितउत्तरे अप्यृचो मधुछंदसा दृष्टे। ऋष्यंतरे प्रमाणाभा
वात्॥ तत्कथं तस्य शातर्चित्विमित्यत आह॥ स्थानांतरेति॥ येन कारणेन आतून इत्यादिके ऋचोस्थानांतर गते आनुपूर्व्यंतरगते। तेन कारणेन मधुछंद
सः शातर्चिता। नैव विरुध्या। एकानुपूर्वी निमित्तत्वात्तस्याः। देशकालांतर दृष्टत्वो चनविरुध्येत्याह॥ दृष्टेति॥ याभ्यांते। स्थानांतरगते इति संबंधः॥ ७॥ व्यास
७०

आतूनइंद्र मात्र॥ अदित्या। जन्मनि। जन्मसमये। सः इंद्रः। गाधित्वाद्वा। कौशिकः। कुशकापत्यत्वाद्गाधिनः। हरिः। तथा कौशिकः। हिरण्यग्रहणं व्र
ह्माण्डद्योतनार्थं॥ कुशशब्दा ह्नहीतार्थे॥ कोशशब्दा इवार्थे वाठक्॥ मंदोमदः॥ आधिक्ये ऽधिके। नित्यस्फुरवं॥ तस्य सानो लाभः यस्यासो मंदसा

आतून इंद्र कौशिक मंदसानः सुतं पिब॥ नव्यमायुः प्रसूतिर कृधी सहस्रसामृषिं॥ ५॥ २०॥ आ। तु। नः। इंद्र। कौशिक। मंदसानः।
सुतं। पिब। नव्यं। आयुः। प्र। सू। तिर। कृधि॥ सहस्रऽसां॥ ऋषिं॥ ५॥ २०॥ मात्राकुशो गृहीतवाज्जन्मन्यासीत्स कौशिकः॥ गाधित्वाद्वा
हिरण्यांडकोशस्थत्वा धरिस्तथा॥ मंदसानो नित्यस्फुरवी स्तुत्यमायुश्च नस्तिर॥ ऋषिं साहस्रलाभं मां कुरु च॥ ५॥ २०॥

नोनित्यस्फुरवीयद्वा सानः संभजनं॥ संशब्देन नित्यत्वं लभ्यते। हे इंद्र। कौशिक। मंदसानः। त्वं। नः। अस्माकं। सुतं सोमं। तु। क्षिप्रं। आपिब॥ प्रसुतो।
सुसं आयुश्च नः प्रस्तिर। अतिप्रकर्षेण देहि। मां सहस्रसां। सहस्रलाभयुक्तं। ऋषिं ज्ञानिनं च॥ कृधि कुरु॥ ५॥ २०॥ श्रीशपादाब्जरतायनमः॥

परि त्वा। त्वा इमाः। हे गिर्वणः। इमाः मदीयाः गिरः। स्तुतिरूपा वाचः। विश्वतः। सर्वदा वृद्धः पूर्णः। अयः लाभः यस्यासौ वृद्धायुः। तं सर्वलाभिनं। त्वा त्वां। परिपरि तो भवंतु। अतिशयेन त्वद्विषया भवंतु। किंच वृद्धयः वृद्धिरूपाः त्वद्बुद्धिप्रकाशिन्यः। जुष्टाः सेव्याः। नः। गिरः। जुष्टयः। अनुभवंतु। त्वत्सेवानुरूपाश्च संतु। ॥६॥२०॥ अष्टाद्वचत्वस्यापि पूर्ववच्छंदकापरिहारो ॥ अन्यत्रगाः ॥ आनुपूर्व्येतरगताः ॥ अनेनेंद्रमष्टो जेतामाधुच्छंदसइति जेतानाम मधुच्छंदसः पुत्रः

परि त्वा गिर्वणो गिर इमा भवंतु विश्वतः ॥ वृद्धायुमनु वृद्धयो जुष्टा भवंतु जुष्टयः ॥६॥२०॥ परि। त्वा। गिर्वणः। गिरः। इमाः। भवंतु। विश्वतः ॥ वृद्धऽआयुं। अनु। वृद्धयः। जुष्टाः। भवंतु। जुष्टयः ॥६॥२०॥ त्वा इमा गिरः ॥ सर्वदा परितः संतु मदीयाः सर्वलाभिनं ॥ वृद्धरूपा गिरो जुष्टाः सेवारूपाश्च संतु नः ॥६॥२०॥ अष्टाद्वचः पुनस्तेन दृष्टा अन्यत्रगास्त्वपः ॥ कुर्वता ॥७॥ इंद्रं विश्वा अवीवृधन्त्समुद्रव्यचसं गिरः ॥ रथीतमं रथीनां वाजानां सत्पतिं पतिं ॥६॥२१॥ इंद्रं। विश्वाः। अवीवृधन्। समुद्रऽव्यचसं। गिरः। रथिऽतमं। रथीनां। वाजानां। सत्ऽपतिं। पतिं ॥१॥२१॥ समुयुद्रिक्तगुणव्यक्तिस्त

अष्टो। इंद्रं विश्वा इति साधाच्च चोपलक्ष्य दित्सेतदपि निरस्तं भवति। उपपत्तिस्तु रत्र वक्ष्यति ॥ इंद्रं विश्वाः ॥ सम्यक्। सम्यगुद्रिक्तानां गुणानां व्यक्तिर्यस्य स तथाभि धः। समुद्रव्यचाः। समितस्र्वा द्रवे ई:। गुणानां योग्यतया संबंधः। व्यचः शब्दो व्यक्तिवद्व्यक्तेरपि वाचकः। समुद्रव्यचसं। रथिनां रथितमं। वाजानामन्ना नां पतिं। सत्पतिं सतां पतिं। इंद्रं। विश्वा गिरः। सर्वाः वेदवाचः। अवीवृधन् प्रकाशितवत्यः ॥१॥२१॥

व्यास

७१

आश्रुत् ॥ वकु ॥ हे आश्रुत्कर्ण ॥ आ ॥ समंतात् ॥ श्रुणुत इति आश्रुतो कर्णो यस्य। बकुश्रवणकर्णेतियावत् ॥ हवं। अस्मत् आह्वानं। श्रुधि श्रुणु ॥ आश्रुत्कर्णश्चेत्स्वयमेव श्रोष्यति किं प्रार्थनेनेत्यत उक्तं। आदरादिति ॥ नूचित् ॥ अद्यैव। मे। मयि। गिरः। वेदरूपाः। दधिष्व धेहि ॥ वेदविदं मां

आश्रुत्कर्ण श्रुधी हवं नू चिद्दधिष्व मे गिरः ॥ इंद्र स्तोममिमं मम कृष्वा युजश्चिदंतरं ॥३॥२०॥ आ॥श्रुत्ऽकर्ण। श्रुधि ॥ हवं ॥ नु ॥ चित्। दधिष्व ॥ मे। गिरः ॥ इंद्र ॥ स्तोमं ॥ इमं। मम ॥ कृष्व ॥ युजः चित् ॥ अंतरं ॥३॥२०॥ बकुश्रवणकर्णा स्मदाह्वानं श्रुणु चादरात् ॥ अद्यैव च गिरो धेहि मयि स्तोमं च मत्कृतं। प्रियं योगादपि कुरु ॥३॥२०॥

करु ॥ हे इंद्र ॥ इदं। मम स्तोमं। मत्कृतस्तुतिविशेषं। युजश्चित्। योगादपि समाधिलक्षणात्। अंतरां सन्निकृष्टं। प्रियमितियावत् ॥ कृष्व कुरु ॥ चत्राद्यो: मिथः समुच्चयार्थः ॥३॥२०॥

त्वंबलस्यत्र्चंपरमेश्वरेयोजयितुंबलशब्दार्थंतावदाह॥बलइति॥वलतिःपरिवर्तनार्थः।अतोवलः।तिर्यग्गतिर्धियन्त्र तिशेषः।मनयदर्थवैपरीत्येननवि
षयीकरणंसवलइत्यर्थः।धियःज्ञानस्यवा।विपरीतज्ञानमितियावत्।इदानींमृचंव्याचष्टे॥वाचामिति॥हेऽद्रिवः।त्वंगोमतःगोसंबंधिनःवलस्यमि
थ्याज्ञानस्यवेदवाचामन्यार्थबुधेरितियावत्।यत्।विलंमूलकारणंतमःअज्ञानं।तत्।अपावः।अपावृतवानसि॥छांदसोविकरणलोपः।उत्सारितवा

त्वंबलस्यगोमतोपावरद्रिवोविलं॥त्वांदेवाअविभ्युषस्तुज्यमानासआविषुः॥५॥२३॥त्वं।वलस्य।गोऽमतः।अप।अवः।अद्रिऽवः।बि
लं।त्वां।देवाः।अबिभ्युषः।तुज्यमानासः।आविषुः॥५॥२३॥वलिस्तिर्यग्गतिर्धियः॥वाचामन्यार्थबुधेस्तद्विलंमूलंतमोहितत्॥तदपा
वृतवांस्त्वंचप्रदर्श्यविनिवार्यच॥त्वांहिदेवाभयाभेताःप्रेर्यमाणास्त्वयैवच॥छाद्यमानेगिरादेसैररक्षन्निवसद्गिरा॥ ॥

नसि॥कथं।प्रदर्श्य।विनिवार्यच।तत्वप्रदर्शनेननिराकृत्येत्यर्थः।ततश्चाज्ञानमिथ्याज्ञाननिश्चयोः।देवाः सत्वप्रकृतयःपुरुषाः।अबिभ्युषः॥
प्रथमार्थेद्वितीया।अविभीवांसःसंसारभयापेताः।तुज्यमानाः।त्वयैवप्रेर्यमाणाश्च।त्वां।आविषुः।देसैर्दुष्टगिराछाद्यमानंसद्गिराक्षरत्निव
हि।प्रकाशितवंतइतियावत्॥ ७॥

व्यास
७२

एतामृचमिंद्रपरतयाव्याकुर्वन्नितिहासगर्भत्वात्तमाह॥इंद्रस्येति॥इंद्रस्यगावः।गोसवोयज्ञविशेषः।जगति।चर्तुंचरितुं।समुत्सृष्टाः।इंद्रस्यापीतिसं
बंधः।सरमा।देवशुनी।तस्याःस्वस्त्वमुक्त्वैव।स्वस्त्वादिमृषोक्त्यातांप्रलोभ्यहृताः।तदर्थं।तन्निमित्तं।सरमाकृतंव्यापारं।कथंज्ञात्वा।पदाताडयित्वा।
ततोपिकथं।वक्रात्।पयसिस्तेसति।पणिनांसकाशं।गिरिव्रजं।गिरिकूटं।ज्ञात्वेत्यादीनांभित्वेत्यंतानामिंद्रेणदेसानिहतास्तन्वयः॥इष्टमेवचे

इंद्रस्यगोसवार्थेचसमुत्सृष्टाजगत्यपि॥चर्तुंगावोहृतादैत्यैःसरमारक्षिताःपुरा॥तस्याःस्वस्त्वमुक्त्वैवतयोश्छिद्रंचगोपयः॥तदर्थं
पणयोनामतेदैत्याबलपूर्वकाः॥इंद्रेणनिहताःपश्चाज्ज्ञात्वाचसरमाकृतं॥ताडयित्वापदावक्रात्स्तेपयसितांभयात्॥शरणागतां
प्रेषयित्वादूत्येनपणिनांपुनः॥भित्वागिरिव्रजंतंचगावोयत्रप्रतिष्ठिताः॥निःसारिताःपुनस्ताश्चगोसवेनेष्टमेवच॥तदादेवाअभीत्येव
परितोजुगुपुःपतिं॥५॥२३॥

संतेनपूर्वार्धोव्याख्यातः।हे अद्रिवः।त्वंगोमतः।गोभिर्युक्तस्यबलस्यदैत्यस्य।बिलंगिरिकूटाधस्तनविवरं।अपावः।अपावृतवानसीति।तदादेवाः।
तुज्यमानाः।त्वयैव।प्रेर्यमाणाः।त्वां।आविषुः।अभीत्येवस्वपतिंत्वां।परितोजुगुपुः॥५॥२३॥श्रीमद्गुरुहृद्गतहयवदनायनमः॥

तवाहं। तवदानैः॥ हे शूर। इंद्र॥ अहं॥ तव॥ रातिभिः॥ दानैर्निमित्तैः॥ सिंधुं नदीं॥ प्रत्यायं॥ प्रत्यागमं॥ यज्ञदीक्षार्थमुद्यतइतिशेषः॥ आगत्य॥
७३ पुनः॥ आवदन्॥ स्तुतिरूपैर्वेद पदैस्त्वामावदन्॥ सम्यक् स्तुवंश्च जातोस्मि॥ यद्वा॥ सर्वदात्वामावदन्नहं पुनः सिंधुं प्रत्याय मितियोज्यं॥ हे गिर्वणः

तवाहं शूर रातिभिः प्रत्यायं सिंधुमावदन्॥ उपातिष्ठंत गिर्वणो विदुष्टे तस्य कारवः॥ ६॥२३॥ तव॥ अहं॥ शूर॥
रातिऽभिः॥ प्रति॥ आयं॥ सिंधुं॥ आऽवदन्॥ उप॥ अतिष्ठंत॥ गिर्वणः॥ विदुः॥ ते॥ तस्य॥ कारवः॥ ६॥२३॥ तवदा
नैरहं सिंधुं नदीं प्रत्यागमं पुनः॥ त्वामावदंस्तुतिपदैर्यज्ञदीक्षार्थमुद्यतः॥ उपातिष्ठंत कर्तारो विदुस्त्वां ये गिरोदिताः॥ ६॥२३॥

गिरासंभजनीय॥ वेदगिरोदित। तस्य ते। त्वां। ये विदुः॥ ते कारवः कर्तारः॥ ऋत्विजः॥ तत्रोपातिष्ठंत॥ मंत्रैस्त्वाम पूजयन्॥ ६॥२३॥ ५॥

व्यास
७३

सख्येते॥ हे शवसस्पते॥ स्वबलस्य बलवापते। इंद्र। ते। सख्ये। सति। त्वदनुग्रहे सति। वाजिनः युध्यवंतः। वयं। माभेम। माभैष्म। तदर्थंच। परेषांजेतारं। स्वयमपराजितं।
अभिप्रणोनुमः। प्रकर्षेणपुनः पुनस्स्तुमः॥२॥२३॥ पूर्वीरिंद्रस्य। प्रथमानि। इंद्रस्यतेतव। रातयः। ऊतयश्च। पूर्वीः पूर्वाः दानान्यवनानिच। प्रथमानिक
थं। महत्वेनकारणेन। किंच। नविंदस्यंति। नविदस्यंते। दसिर्विभेदनार्थः। नभिद्यंते। क्षयार्थोवा। ननश्यंति। सः। इंद्रः। इंद्रः। यदि। गोमतः। वाजस्य। गोमदन्नं।
सख्येत इंद्र वाजिनो मा भेम शवसस्पते॥ त्वामभिप्रणोनुमो जेतारमपराजितं॥ २॥२३॥ सख्ये। ते। इंद्र। वाजिनः। मा। भेम। शवसः। पते। त्वां। अभि।
प्र। नोनुमः। जेतारं। अपराऽजितं॥२॥२३॥ पूर्वीरिंद्रस्य रातयो न विदस्यंत्यूतयः॥ यदी वाजस्य गोमतः स्तोतृभ्यो मंहते मघं॥ ३॥२३॥ पूर्वीः।
इंद्रस्य। रातयः। न। वि। दस्यंति। ऊतयः। यदि। वाजस्य। गोऽमतः। स्तोतृऽभ्यः। मंहते। मघं॥३॥२३॥ प्रथमानि महत्वेन ते दानान्यवनानिच॥ नभि
द्यंते न नश्यंति गोमदन्नं यदा स्तस्तथा॥ यदि मंहते ददातींद्रः॥ ३॥२३॥ पुरांभिंदुर्युवा कविरमितौजा अजायत॥ इंद्रो विश्वस्य कर्मणो धर्ता वज्री
पुरुष्टुतः॥४॥२३॥ पुरां। भिंदुः। युवा। कविः। अमितऽओजाः। अजायत। इंद्रः। विश्वस्य। कर्मणः। धर्ता। वज्री। पुरुऽस्तुतः॥ ४॥२३॥
मघं। यज्ञाश्वरसादिकं। स्तोतृभ्यः। मंहते। मंहतिर्दानार्थः। ददाति। तर्हितानिदानानि प्रथमानीत्यादि संबंधः॥४॥२३॥ पुरंभिंदुः॥ शरीरपुराणां। शंब
रपुराणांचभेत्ता। युवा। कविः सर्वज्ञः। अमितं ओजोयस्यासावमितौजाः। विश्वस्यकर्मणः। धर्ता। सर्वकर्मणांप्रेरकः। वज्री। पुरुभिः स्तुतः पुरुष्टुतः इंद्रः। अजाय
त। जज्ञे। अभिव्यक्तोभवत्॥४॥२३॥ ६

नन्वेवं शतर्चित्वस्य गतिमुक्त्वा प्येतासामृचां मधुछंदाः कस्मादृषिरुच्यते ॥ माधुछंदसो जेता कस्मान्न स्यादित्यत आह ॥ ऋक्संहिता इति ॥ तथात्राब्द ४ समु
७४ च्चये ॥ मानादितिप्रसे क मपि संबध्यते ॥ तथामानात् । मानांतरादिति वा ॥ ये । अत्र । ग्रंथे । अस्माभिर्मुनयः प्रोक्ताः । ते ऋक्संहिताद्यनुसारेणैव ॥
अतस्तास्ते वस्युः । मद्वा ऋक्संहितानामानेन ये ऋमुनयः प्रोक्तास्त एव स्वीकार्याः स्युः । नमानुष रचितग्रंथोक्ता इति ॥ युक्त्यंतरमाह ॥ श्रुत्यभावादिति ॥
शुनःशेपो ह्य द्दित्यादिवच्छ्रुत्यभावात् ॥ मधुछंदसोन्यस्य मुनेर्नामाभावात् ॥ त्रिधादि संद्रुपदेषु बध्द इत्यादिवद्लिंगात् ॥ ऋष्यंतरलिंगाभावाच्च ॥
ऋक्संहितायाः स्वाध्यायात्प्रबंधाध्यासनिर्मितात् ॥ ब्राह्मणेभ्यस्तथामानात्प्रोक्ताः स्युर्मुनयोत्र ये ॥
श्रुत्यभावादलिंगाच्च मुनिर्नान्यः प्रतीयते ॥ श्रुतिलिंगान्यता यावत्तावत्पूर्वी प्रमा भवेत् ॥ ७ ॥

उपलक्षणं चैतत् ॥ ऋष्यंतरज्ञापकप्रमाणाभावादित्यर्थः ॥ अतो मधुछंदसः । किंच तद्रु माधुछंदसमित्यादिना वायवायाहीत्यादिसूक्तानां मधु
छंदसा दृष्टत्वमुच्यते ॥ ततोपि स एवात्र द्रष्टाभ्युपगंतव्यः ॥ एवं तर्ह्यतिप्रसंग इत्यत आह ॥ श्रुतीति ॥ श्रुतिलिंगयोरन्यता ॥ अन्यज्ञापकं श्रुतिलिं
गादि यावत् ॥ भवेत् ॥ तावदेव पूर्वा प्रमा ॥ समान्यप्रमाणं ज्ञापकं भवेत् ॥ एतदुक्तं भवति ॥ तद्रु माधुछंदसमित्यादि सामान्यवचनं ॥ तच्चापवादा
भावे प्रमाणं ॥ अपवादे तु संकोचमर्हति ॥ नचात्रापवादकं श्रुत्यादिकमस्तीति ॥ ७ ॥ व्यास ७४

अथ व्याचिख्यासिता नामृचामृषिमाह ॥ शतर्भिरिति ॥ विशेषणसमासोयं न द्विगुः ॥ समासांतो विधिरनित्यः ॥ वह्निनामानमित्युपलक्षणं ॥ एवं चेत्कस्य नू
नमित्यतः प्राक्तनीनामृष्यंतरं वक्तव्यं प्रसज्येतेत्यत आह ॥ ताभ्य इति ॥ शतसंख्या । च उत्तराः । एकोनचत्वारिंशदपि ॥ समेधातिथिर्दृष्टवान् द्रष्टा मासांतो
स्त इत्यर्थः ॥ तर्हि कथं तस्य शतर्चित्वमित्यत आह ॥ अन्यत्रेति ॥ अन्यत्र गाड्सानु पूर्व्यंतरत्वमुक्तं । तपस्यन्नित्यवस्थांतरत्वं । कदाचनेति कालांतरत्वं ॥
सःमेधातिथिः । अन्यत्र दृष्टत्वं चात्र ग्राह्यं ॥ किमतोपद्येवमित्यत आह ॥ कालेति ॥ कालांतरत्वं स्थानांतरत्वं च दर्शनस्य चेत्तर्हि शतसंख्यातोऽभ्यधिकमपि
शतर्भिरुत्तराभिस्तु वह्निनामानमच्युतं ॥ अस्तौन्मेधातिथिस्ताभ्य उत्तरा अपि तदृचः ॥ अन्यत्र गास्तपस्यंस्ता ददर्श कदाचन ॥ काल
स्थानांतरत्वं चेत्संख्यातोभ्यधिकं भवेत् ॥ अन्यस्थानगता अन्यदृष्टा अप्यत्र गा यदि ॥ संख्यांतर्भावमेष्यंति ता इतोपगता यतः ॥ ७ ॥

तदंतर्भूतमेव भवेत् ॥ कालस्थानांतरत्वमित्युपलक्षणं ॥ अन्यस्थानगतत्वमन्यदृष्टत्वं च ग्राह्यं ॥ अत्र युक्तिमाह ॥ अन्येति ॥ अत्रापि कालांतरत्वादिक
मुपादेयं ॥ ताः ॥ कालांतरे देशांतरे अवस्थांतरे च दृष्टाः ॥ ऋष्यंतरेण वा दृष्टाः ॥ आनुपूर्व्यंतरस्था वा ॥ इतोपगताः ॥ अत्र विद्यमाना अप्यविद्यमानक
ल्पाः । यतः ॥ अतः संख्यांतर्भावमेष्यंति ॥ तास्तु विद्यमानास्तु अपि शतमित्येवोच्यत इति यावत् ॥ एकदेशकालावस्थास्तु तेनैव वर्णिता दृष्टा मूलवेदे चैकानु
पूर्वीस्था हि शतर्चित्वे विवक्षिता इति ॥ ॥ ॥ श्रीमेधातिथिकृतस्तुतिविषयवह्निनामकहमास्यायनम ४ ॥ ७ ॥

७५ अग्निंदूतं॥ द्वादशर्चमिदमाग्नेयंसूक्तं॥ अत्रास्याविष्णोर्दूतशब्दं घटयति॥ यज्ञेति॥ यतः। अग्निः। यज्ञभागार्थं देवैः संप्रेषितः। ततोदू
तः। संदेशेनयः प्रेष्यतेसहिदूतउच्यते॥ अत्रस्थः अग्निस्थोवासुदेवश्च। तत्तत्प्रार्थितिकृ घृतः॥ अतः दूतइवदूतः। विश्वंवेत्तीतिवि

अग्निंदूतंवृणीमहेहोतारंविश्ववेदसं॥ अस्ययज्ञस्यसुक्रतुं॥१॥३२॥ अग्निं। दूतं॥ वृणीमहे॥
होतारं॥ विश्वऽवेदसं॥ अस्य॥ यज्ञस्य॥ सुक्रतुं॥१॥३२॥ यज्ञभागार्थं मत्रस्थोदेवसंप्रेषितोय
तः॥ दूतोग्निर्वासुदेवश्चतत्तत्प्रार्थितकृतघृतः॥ विश्ववेदाः ससर्वज्ञोयज्ञज्ञोयज्ञसुक्रतुः॥१।१२॥

श्ववेदाः। विदेःकर्तरिअसनू। सःविष्णुः। अग्नौतूपचार इतिभावः। यज्ञस्यसुक्रतुमित्यस्यव्याख्यानं। यज्ञज्ञइति॥ क्रतुशब्दस्यज्ञानवा
चित्वात्। एवंयोजना। वयंदूतं। होतारं। विश्ववेदसं॥ अस्यप्रमाणप्रमितस्य। यज्ञजातस्य। सुक्रतुं। सम्यग्ज्ञानिनं। अग्निं। वृणीमहे। प्रार्थ
यामइतियावत्॥१।१२॥ व्यास ७५

मायाभिः॥ शक्तिभिः॥ हेइंद्र॥ त्वं॥ मायिनं॥ शक्तिमंतं॥ श्रीद्यादित्वात्साधुः॥ शुष्णं। शोषकं॥ शुषेर्नइः॥ वृत्रमितियावत्॥ मायाभिः॥ शक्तिभिः॥ अवातिरः।
तिरतिर्वधकर्मा॥ हतवानसि॥ तमोवेत्सध्यास्तं। मायिनं। शुष्णमितितमोऽज्ञानमुच्यते॥ शोषंसमानमिति। किंच। येमेधिराःमेधारताः। तृतीयस्याति

मायाभिरिंद्रमायिनंत्वंशुष्णमवातिरः॥ विदुष्टेतस्यमेधिरास्तेषांश्रवांस्युत्तिर॥७॥२३॥ मायाभिः॥ इंद्र॥ मायिनं॥ त्वं॥ शुष्णं॥ अव॥
अतिरः॥ विदुः॥ ते॥ तस्य॥ मेधिराः॥ तेषां॥ श्रवांसि॥ उत्॥ तिर॥७॥२३॥ शक्तिभिः शक्तिमंतंत्वंशोषकंवृत्रमातिरः॥ तमोवात्वंवि
दुर्मेधारतास्तेषांश्रवांसिच॥ विद्याउच्चैस्तरांदेहि॥७॥२३॥ इंद्रमीशानमोजसाभिस्तोमाअनूषत॥ सहस्रंयस्यरातयउतवासंति
भूयसीः॥८॥२३॥ इंद्रं॥ ईशानं॥ ओजसा॥ अभि॥ स्तोमाः॥ अनूषत॥ सहस्रं॥ यस्य॥ रातयः॥ उत॥ वा॥ संति॥ भूयसीः॥ छा॥ स्तुवंतित्वांसहो

रार्थत्वात्॥ तस्य॥ ते॥ तंत्वां॥ विदुः॥ तेषां॥ श्रूयंत इतिश्रवांसि॥ विद्याः॥ वेदाद्याः॥ उत्तिर॥ उच्चैस्तरांदेहि॥७॥२३॥ इंद्रमीशानं॥ स्तुवंति॥
यस्य इंद्रस्य॥ सहस्रं। उतवा। ततोपिभूयसीः॥ भूयस्यः। रातयः। दानानि। संति। तं। ईशानं। इंद्रं। त्वां। ओजसा। ओजःप्रभृतिभिर्गुणैःसह।
स्तोमाः स्तुतिविशेषाः॥ अभ्यनूषत॥ सदास्तुवंति॥८॥२३॥

७६ अग्नेदेवान्॥ जज्ञानः॥ हे अग्ने॥ जज्ञानः॥ जायमानः॥ अस्मद्यज्ञैर्व्यज्यमानः॥ त्वं॥ वृक्तबर्हिषे॥ वृक्तं प्रस्तृतमच्युते॥ वृक्तं बर्हिर्येनासौ वृक्तबर्हिर्यजमा
नः। तस्मै॥ तत्प्रयोजनाय॥ देवान्॥ इह॥ यज्ञे॥ आवह॥ यतः। त्वं॥ होता॥ असि॥ नः॥ अस्माकं॥ ईड्यश्च॥ असि॥ ३॥ २२॥ तान् बोधय॥ हे अग्ने॥ ई

इह।

अग्ने देवाँ इहा वह जज्ञानो वृक्तबर्हिषे॥ असि होता न ईड्यः॥ ३॥ २२॥ अग्ने॥ देवान्॥ आवह। जज्ञानः। वृक्तबर्हिषे। असि। होता। नः॥
ईड्यः॥ ३॥ २२॥ जज्ञानोऽभिव्यज्यमानस्त्वं वृक्तं प्रस्तृतमुच्यते॥ यजमानो वृक्तबर्हिः॥ ३॥ २२॥ ताँ उशतो वि बोधय यदग्ने यासि दूत्यं॥ देवैरा स
त्सि बर्हिषि॥ ४॥ २२॥ तान्। उशतः॥ वि। बोधय। यत्। अग्ने। यासि। दूत्यं। देवैः। आ। सत्सि। बर्हिषि॥ बोधयेच्छतः। स्फुरान्॥ देवैः सहोपविशसि॥ ४॥ २२॥

शे। यद्यस्मात्। दूत्यं। दूतस्य भावं। कर्म वा। यासि। प्रतिपद्यसे। देवानां दूतो यतः। तस्मात्। उशतः। आगंतुमिच्छतः। तान्। स्फुरान्। विबोधय विज्ञापय।
अस्य यज्ञे। सुष्ठाभिर्गतव्य इति॥ ततश्च देवैः सह। बर्हिषि। असत्सि। आसीदसि॥ उपविशसि॥ उपवेक्ष्यसि॥ ४॥ २२॥   श्रीव्यास
                                                                                                                                                                                                    ७६

हप्रथसागुणानांप्रथिम्नावर्ततइतिसप्रथाः॥आधिक्येनसप्रथाः॥सप्रथस्तमइत्युक्तं भवति॥तृतीयपादंयोजयति॥यस्येति॥अत्रयस्येति

नराशंसंसुधृष्टममपश्यंसप्रथस्तमं॥दिवोनसद्ममखसं॥४॥३५॥नराशंसं॥सुऽधृष्टमं॥अ
पश्यं॥सप्रथःऽतमं॥दिवः॥न॥सद्मऽमखसं॥४॥३५॥नरैस्तुत्योनराशंसोहरिर्धृष्टतमश्च
सः॥गुणानांप्रथिमाधिक्यात्सप्रथस्तमईरितः॥यस्यस्वर्गादपिगृहंमखःप्रियमिवेर्यते॥४॥३५॥

प्रियमितिव्याध्याह्रियते॥गृहंमखइतिअनेनमखसशब्दोमखवर्यायोनपुंसकलिंगःकर्मधारयश्चसमासइत्युक्तंभवति॥यद्वागृहंमखइत्यनेनद्वंद्वैकवद्भा
वंसूचयति॥तदयमर्थः॥यस्य॥नराशंसस्य॥सद्ममखसं॥गृहरूपोमखः॥यद्वाऽग्निगृहंमखश्च॥दिवःस्वर्गादप्यतिशयेन॥प्रियंनप्रिय
मिव॥ईर्यतेप्रतीयते॥संतुधृष्टमं॥प्रगल्भतमं॥सप्रथस्तमं॥गुणविस्तारयुक्तं॥नराशंसंब्रह्मादिस्तुत्यं॥अहमपश्यमिति॥४॥३५॥७॥

यदीं इंखयन्तिप्रतोलयंति ॥ ये ॥ पर्वतान् गिरीन् ॥ इंखयंति ॥ इंखिर्गत्यर्थः ॥ सममयंति प्रतोलयंतीति यावत् ॥ तथा ऽर्णवं ॥ उदकवंतं ॥ समुद्रं सागरं च ॥
१०२ तिरः तिरस्कृत्य वर्तते ॥ विष्णुविषये पर्वतान् समुद्रं चेति व्याचष्टे ॥ पुरुषानिति ॥ कथं पुरुषाः पर्वतशब्दाद्युक्त आह ॥ पर्ववंतो हि ॥ हि यस्मात्पुरु

यदीं इंखयंति पर्वतान् तिरः समुद्रमर्णवं ॥ मरुद्भि० ॥ २ ॥ ॥ ये ॥ इंखयंति ॥ पर्वतान् ॥ तिरः ॥ समुद्रं ॥ अर्णवं ॥ मरु० ॥ २ ॥ ॥ प्रतोलयं
ति च गिरीं स्तिरस्कृत्य च सागरं ॥ पुरुषान्प्रकृतिं चापि पर्ववंतो हि जन्मना ॥ पुरुषाः कं समुद्रे कात्समुद्रः प्रकृतिर्मता ॥ प्रकृतेश्च
पुरुषाणां च प्रेरकः सन्सदा हरेः ॥ स्वतंत्रैर्बद्धभिर्युक्त मायाहि समसद्गुणैः ॥ २ ॥ ३० ॥ ॥ इति श्रीमदानंदतीर्थभि० तरग्भाष्ये १ अध्यायः

षाः जन्मना पर्ववतः ॥ जन्मलक्षणपर्ववंतः ॥ तस्मात्पर्वताः ॥ मत्वर्थे तश्च ॥ प्रकृतिश्च कथं समुद्रशब्देस्यत आह ॥ कं समुद्रे कादिति ॥ अर्णवत्वं च त इ
स्याः जलादिभूताधारत्वं ॥ पुरुषादीनामींखनादिकं व्याकुर्वन्मरुद्भिरग्न आगहीत्येत दपि व्याख्याति ॥ प्रकृतेरिति ॥ मरुद्भिरिति सहयोग व्यास
१०२

लक्षणा तृतीया ॥ ततः सहयुक्ते ऽप्रधाने इति मरुतामप्रधान्यं प्रसक्तं ॥ तन्निरासायार्थमाह ॥ सद्गुणैरिति ॥ २ ॥ ॥ यंये ॥ ये ॥ रश्मिभिश्च तेजो
भिः ॥ सर्वं ॥ आतन्वंति प्राप्नुवंति ॥ तथा ॥ ओजसा ॥ समुद्रं ॥ तिरस्कुर्वंति ॥ तैर्मरुद्भिरग्न आग हि ॥ ३ ॥ ॥ अभित्वा ॥ अहंत्वा ॥ अभि ॥ त्वां

आ ये तन्वंति रश्मिभिस्तिरः समुद्रमोजसा ॥ मरुद्भिरग्न आगहि ॥ ३ ॥ आ ॥ ये ॥ तन्वंति ॥ रश्मिभिः ॥ तिरः ॥ समुद्रं ॥ ओजसा ॥
मरु० ॥ ३ ॥ अभि त्वा पूर्वपीतये सृजामि सोम्यं मधु ॥ मरुद्भिरग्न आगहि ॥ ४ ॥ ॥ अभि ॥ त्वा ॥ पूर्व ऽपीतये ॥ सृजामि ॥ सो
म्यं ॥ मधु ॥ मरुत् ऽभिः ॥ अग्ने ॥ आ गहि ॥ ४ ॥ ३० ॥ ॥ इति श्रीमदृग्वेदे प्रथमोध्यायः ॥ ॥ श्रीवेदव्यासायनमः ॥ छ

प्रति ॥ पूर्वपीतये ॥ प्रथमपानाय ॥ सोम्यं सोमरूपं ॥ मधु ॥ स्वादुद्रव्यं ॥ सृजामि ॥ निर्मामि ॥ तस्मान्मरुद्भिरग्न आगहि ॥ ४ ॥ ३० ॥ ॥ इ
ति श्रीमदानंदतीर्थभगवत्पादाचार्यविरचितर्ग्वेदप्रथमाष्टकभाष्यटीकायां जयतीर्थमुनिविरचितायां प्रथमाध्यायः समाप्तः ॥ ॥ व्यासाब्धिश्री ॥

येनाकस्य॥स्वर्गोपरि॥ये॥देवासः॥स्फुराः॥मरुतः॥नाकस्याधि॥स्वर्गोपरि॥दिवि॥रोचने॥रुचिदर्श्नो॥सूर्यदीप्रकाशे॥आसते॥तैर्मरुद्भि

येनाकस्याधिरोचनेदिविदेवासआसते॥मरुद्भि॰॥३॥ ॥ये॥नाकस्य॥अधि॥
रोचने॥दिवि॥देवासः॥आसते॥३॥ ॥स्वर्गोपरिप्रकाशेचसूर्यादावासतेस्फुराः
॥नाकोनिर्दुःखरूपत्वात्द्यौःप्रकाशस्वरूपतः॥३॥ ॥

रग्न आगहि॥अत्रनाकस्याधिदिवीतिपुनरुक्तिरित्यतोर्थभेदमाह॥नाकइति॥नाकंस्फुरवं॥तद्विरुद्धंदुःखंअकं।नविद्यते।अकमस्मि
न्निति।निर्दुःखरूपत्वान्नाकः॥द्यौःप्रकाशस्वरूपतः॥दिव्यतेहिरूपमेतत्॥३॥ ॥

यइंद्राय। वाङ्मात्रेणैव। ये। ऋभवः॥ इंद्राय। इंद्रस्यार्थे। वचोयुजा। वचसा युज्येत इति। सारथेर्वाङ्मात्रेणैव रथेयौज्यौ। हरी।
वाजिनौ। मनसा संकल्पमात्रेणैव। ततक्षुः तक्षतिः करोति कर्मा। चक्रुः। येच शमीभिः। विष्णुनिष्ठाभिः। शमीम ल्लिष्टताबु
धेरि स्त्रीलिंगं। इःस्पृक्छांदसः। यज्ञं यज्ञभागं। अशात। अष्ट्व्याप्तौ। अभ्नुवत। लेभिरे। तेभ्यः स्तोमोऽकारीति। पूर्वे

यइंद्राय वचोयुजा ततक्षुर्मनसा हरी॥ शमीभिर्यज्ञमाशात ॥२॥ ये॥ इंद्राय॥ वचः २ युजा॥ तत
क्षुः॥ मनसा॥ हरी इति॥ शमीभिः॥ यज्ञं॥ आशात॥२॥ वाङ्मात्रेणैव यौज्यौ येचक्रुरिंद्राय
वाजिनौ॥ शमीभिर्विष्णुनिष्ठाभिर्यज्ञभागंचलेभिरे॥ भगवांश्चेतदखिलं कृतवान्नभुःस्थितः॥२॥

णसंबंधः। नन्विंद्रस्यकर्मकरा ऋभव इति तेषु इंद्रार्थे हरिनिर्माणमुपपद्यते। अदेवाश्च देवत्वप्राप्ता इति शमीभिर्यज्ञमाशा
तेत्यपि॥ विष्णोः कथमित्यत आह। भगवांश्चेति॥ एतद्धरिनिर्माणादिकं॥ एतदित्यनेनैव सिद्धे अखिलमिति वचनमागामिनो
रथनिर्माणादेरपि संग्रहार्थं॥ कथं॥ ऋ॥ भुषुस्थिताः स्ताः क्रियास्तदंतर्गतभगतेव क्रियंत इति हि शास्त्रं॥ ॥२॥

व्यास

पक्षांतरमाह॥ पृथग्वेति॥ ऋभुषुस्थितेन रूपेण विनापि॥ पृथगीश्वररूपेण एतदखिलं कृतवान्। कथं। फलदातृत्वात्।
इंद्रादिष्वप्यृतिरोषः। अत्रैवंयोजना॥ ये भगवद्रूपविशेषाः इंद्रानुष्ठिताभिः शमीभिः प्रसन्नाः संतः। तदीयंयज्ञं आशात। ऋ
भुभिः करणैः इंद्रायहरीच ततक्षुरिति॥ एवमुत्तरत्रापि॥ अध्यात्मं तु। इंद्राय परमेश्वराय। तं विषयीकर्तुं। भक्तानां हरीमनोबुद्धी
ख्यौ। वचोयुजौ। वेदानुसारिणौ। ततक्षुः। तदीयाभिः शमीभिः। तदीयं ज्ञानयज्ञं चाशातेति॥२॥ तक्षन्। अत्र रथविशेषणं परिज्मानमित्येत

पृथग्वा फलदातृत्वात्॥२॥ तक्षन्नासत्याभ्यां परिज्मानं सुखं रथं॥ तक्षं धेनुं सबर्दुघां॥३॥ तक्षन्। नासत्याभ्यां। परिऽज्मानं।
सुखं। रथं। तक्षन्। धेनुं। सबः २ दुघां॥३॥ परितोज्मायतश्चरेत्। परिज्मातो रथः काम्यं सबरित्यभिधीयते॥ बकामन इतिह्यस्मात्॥३॥
व्याख्याति॥ परितइति॥ ज्मां भूमिं। इत्तौक्रियायाअंतर्भाविताच्चरेदित्युक्तं। सबर्दुघामित्यत्र सबरित्यस्यार्थमाह। काम्यमिति। कुत इति तत्रा
ह॥ बकामन इति॥ असाक्षात्तु व्याख्यानात्। सछंदस्तु कर्मार्थप्रत्ययसन्नियोगेन धातो रागमइतिहृदयं॥ ऋभवः। नासत्याभ्यां। अश्वि
नौरेकोनासत्यः। साहचर्याद्उभावपिनासत्यावुच्येते। यथा दस्त्रावितिवि॥ अत एवान्यत्र नासत्यदस्त्रावित्याचार्यः॥ अश्विनोरर्थे
परिज्मानं सकलपृथिवीगामिनं। अप्रतिहतगतिं सुखं रथं। तक्षन्। अकुर्वन्। सबर्दुघां काम्यस्य सर्वस्य दोग्ध्रीं धेनुं चातक्षन्॥३॥

यइंद्राय।वाङ्मात्रेणैव।ये।ऋभवः॥इंद्राय।इंद्रस्यार्थे।वचोयुजा।वचसायुज्येतइति।सारथेर्वाङ्मात्रेणैव रथेयोज्यौ।हरी।
वाजिनौ।मनसासंकल्पमात्रेणैव।ततक्षुः।तक्षतिः करोतिकर्मा।चक्रुः।येचशमीभिः।विष्फनिष्ठाभिः।शमीमस्त्विष्ठताबु
धेरि स्त्रीलिंगं।इ:त्रिपूछांदसः।यज्ञंयज्ञभागं।अशात।अश्नुव्याप्तौ।अश्नुवत।लेभिरे।तेभ्यः स्तोमोऽकारीति।पूर्वे

यइंद्रायवचोयुजाततक्षुर्मनसाहरी॥शमीभिर्यज्ञमाशत॥२॥ये॥इंद्राय॥वचः२युजा॥तत
क्षुः॥मनसा॥हरीइति॥शमीभिः॥यज्ञं॥आशत॥२॥वाङ्मात्रेणैव योज्यौयेचक्रुरिंद्राय
वाजिनौ॥शमीभिर्विष्ठिभिर्निष्ठाभिर्यज्ञभागंचलेभिरे॥भगवांश्चैतदखिलंकृतवान्नभुमुस्थितः॥२॥

णसंबंधः।नन्विंद्रस्यकर्मकराऋभवइतितेषुइंद्रार्थेहरिनिर्माणमुपपद्यते।अदेवाश्चदेवत्वप्राप्ताइतिशमीभिर्यज्ञमाशा
तेत्यपि॥विष्णोःकथमित्यतआह।भगवांश्चेति॥एतद्धरिनिर्माणादिकं।एतदित्यनेनैवसिद्धेअखिलमितिवचनमागामिनो
रथनिर्माणादेरपिसंग्रहार्थं॥कथं॥ऋभुषुस्थितास्तास्ताःक्रियास्तदंतर्गतभगतैवक्रियंतइतिहिशास्त्रं॥ ॥२॥

व्यास

पक्षांतरमाह॥पृथग्वेति॥ऋभुषुस्थितेनरूपेणविनापि॥पृथगीश्वररूपेण एतदखिलंकृतवान्।कथं।फलदातृत्वात्।
इंद्रादिभ्यइतिशेषः।अत्रैवंयोजना॥येभगवद्रूपविशेषाःइंद्रानुष्ठिताभिःशमीभिःप्रसन्नाःसंतः।तदीयंयज्ञंआशत।ऋ
भुभिःकरणैःइंद्रायहरीचततक्षुरिति॥एवमुत्तरत्रापि॥अध्यात्मंतु।इंद्रायपरमेश्वराय।तंविषयीकर्तुं।भक्तानांहरीमनोबुद्धा
ख्यौ।वचोयुजौ।वेदानुसारिणौ।ततक्षुः।तदीयाभिःशमीभिः।तदीयंज्ञानयज्ञंचआशतेति॥२॥तक्षन्।अत्ररथविशेषणंपरिज्मानमित्येत

पृथग्वाफलदातृत्वात्॥२॥तक्षन्नासत्याभ्यांपरिज्मानंसुखंरथं॥तक्षन्धेनुंसबर्दुघां॥३॥तक्षन्।नासत्याभ्यां।परिऽज्मानं।
सुखं।रथं।तक्षन्।धेनुं।सबःऽदुघां॥३॥परितोज्मायतश्चरेत्।परिज्मातोरथःकाम्यंसबरित्यभिधीयते।बकामनइतिह्यस्मात्॥३॥
व्याख्याति॥परितइति॥ज्मांभूमिं।इत्तोक्रियायाअंतर्भावित्वरेदिसुकं।सबर्दुघामित्यत्रसबरित्यस्यार्थमाह।काम्यमिति।कुतइतितत्रा
ह॥बकामनइति॥अस्माद्धातुव्याख्यानात्।सच्छब्दस्तकर्मार्थंप्रत्ययसन्नियोगेनधातोरागमइतिहृदयं॥ऋभवः।नासत्याभ्यां।अश्वि
नोरेकोनासत्यः।साहचर्यादुभावपिनासत्यावुच्येते।यथादस्राविति॥अतएवान्यत्रनासत्यदस्राविस्याचार्यैः॥अश्विनोरर्थे
परिज्मानंसकलपृथिवीगामिनं।अप्रतिहतगतिंसुखंरथं।तक्षन्।अकुर्वन्।सबर्दुघांकाम्यस्यसर्वस्यदोग्ध्रींधेनुंचातक्षन्॥३॥

युवाना॥इह ऋभवः॥स्वीयौ पितरौ पुनर्युवानावक्रत इत्युच्यते॥तत्र क एषां पितेत्याकांक्षायामाह॥सुधन्वेति॥ऋभु
र्विभ्वावाज इति सुधन्वनः आंगिरसस्य त्रयः पुत्रा रथकारा बभूवुरिति हि वक्ष्यते॥पूर्वस्याम् चिसबर्दुघां धेनुमत
क्षन्नित्युक्तं।कस्यासौ कामधेनुरित्यपेक्षायामाह॥बृहस्पतेरिति॥बृहस्पति विश्वरूपामुपाजत्तेति वक्ष्यमाण
त्वात्।ऋजूयव इति व्याचष्टे॥ऋजु भक्ता इति॥ऋजुब्रह्म पदयोर्ग्योर्न्देवा कामयंत इति ऋजूयवः।सुपआ
युवानापितरा पुनः सत्यमंत्रा ऋजूयवः॥ऋभवो विष्ट्यक्रत॥४॥युवाना।पितरा।पुनरिति।सत्यऽमंत्राः।ऋजूयवः।ऋ
भवः।विष्टी।अक्रत॥४॥सुधन्वैषां पिता स्मृतः॥बृहस्पतेः कामधेनुः ऋजुभक्ता ऋजूयवः।अवेतनं स्वामिबलात्कर्म विष्ट्यत्र तेक्रत॥४॥
सनः क्यच्।तदंतात् आछीलिक उकारः।भक्ता हि स्वामिनं कामयंते।विष्ट्यक्रतेति व्याख्याति।अवेतनमिति।यद्यपि विष्टीति कर्मसामान्यनाम सुप
ठितं।तथाप्यत्ररूढिवशाद्वेतनेन विना स्वामिनो बलाद्यत्कर्म क्रियते तद्विष्टीत्युच्यते।तत्तेक्रत।ऋभवः।स्वीयौ पितरौ मातापितरौ जीर्णौ सं
तौ युवानावक्रत।अकुर्वं।कथं सत्यमंत्राः अमोघमंत्राः।तदपि कथं।ऋजूयवः।किंच।विष्टी सुपां सुलुगिति द्वितीयायाः पूर्वसवर्णः।देवा
नां विष्टिं।एकं चमसं चतुरः कृणोतनेत्यादि वक्ष्यमाणं अक्रत॥ ॥४॥ ५

व्यास
२

श्रीवेदव्यासाय नमः॥अयं देवाय॥अष्टर्चमिदमार्भवं सूक्तं॥यद्यपि ऋभूणामृभुनामैक एव।विभ्वावाजश्चापरौ।
तथापि सहचर्यादेकस्य नाम्ना त्रयोप्युच्यंते॥तत्राद्यामृचं विशेषो व्याख्याति॥सर्वजन्मेति॥विप्रेभिः।विप्रैर्मे
धाविभिः कैः काण्वाद्यैः।कण्वपुत्रो मेधातिथिः तदाद्यैः।जन्मने।जनेः कर्तरि मनिन्।सर्वजन्मकृते॥सर्वेषां कार्या
णां जनयित्रे।देवाय।देवशब्दो व्याख्यातः॥तस्याभिधेयं।विश्वस्मै देवाय।अस्यं तेक्षिप्यं ते वर्णा अनये त्यासा मुखे
श्रीरस्तु॥ ॥अयं देवाय जन्मने स्तोमो विप्रेभिरासया॥अकारि रत्नधातमः॥१॥अयं।देवाय।जन्मने।स्तोमः
विप्रेभिः।आसया।अकारि।रत्नऽधातमः॥१॥सर्वजन्मकृते विश्वस्मै देवाय यं स्तुतिः कृता।मुखेन विप्रैः काण्वाद्यैः
न।केवलं मनसा किंतु वचसापीति भावः।अयं स्तोमः।इयं बुद्धिस्था स्तुतिः।अकारि कृता।देवाय।जन्मन इति षष्ठ्यर्थे चतु
र्थ्यौ।तदर्थ्ये वा।तेचैकस्यापि बहुवद्दुक्तत्वाद्विप्रेभिरिति बहुवचनं।अनादिवादकारीति।कस्मात् रत्नधातमः।यस्मात्स
विश्वस्तुतिरेव रत्नधातमः।अतिशयेन सुरत्नदात्री।डुधाञ् दानधारणयोः।तस्मादकारि।ऋभुविषये तु देवाय जन्मन इति दे
वेभ्यो जातेभ्य इति योज्यं।मानुषा एव हि देवा जाता इति निगमः॥१॥

सेवय इति धातमः॥१॥ ७

उत सं॥ कथमनर्थ्ययम्‌ऋक्‌। अतः कथमाह॥ एकमिति॥ चतुरः। चमसान्‌। तान्‌ ऋभवन्‌। एवत्राद्द एकमित्यनेन संबध्यते॥ तत्‌ दुष्करमपि। ऋभुभिः॥ त्वष्टुरित्युपेलक्षणं॥ दैवैः प्रेषितो त्वष्टाग्निश्च ऋभूनाहतुः। इमं एकं जीर्णं। चमसं। नवं नेतत्प्रमाणां श्चतुरश्चमसान कुरुतेति॥ तेऽब्रुवन्‌। द्वौ वा त्रीन्वौ करिष्यामश्चत्वारो दुष्करा इति॥ पुनश्चाग्निना त्वष्ट्रा

उत त्यं चमसं नवं त्वष्टुर्देवस्य निष्कृतं॥ अकर्त चतुरः पुनः॥६॥ उत। त्यं। चमसं। नवं। त्वष्टुः। देवस्य। निःऽकृतं। अकर्त। चतुरः। पुनरिति॥६॥ एकं चमसं चतुरः कुरुते त्याह तान्सुरा॥ त्वष्टाग्निश्चैव देवानां वाक्या त्तदर्पितैः कृतं॥ द्व्यादिस्वोक्तं परित्यज्य त्वष्टुः शुश्रूषणं कृतं॥ तं पूर्वं कृतमेवैकं चमसं चतुरो कृत॥६॥

वनिर्बंधे कृते द्व्यादिस्वोक्तं परित्यज्य चतुर्निर्माणात्‌ पूर्वं त्वष्ट्रादीनां शुश्रूषणं कृतमिति॥ ऋचं व्याख्याति॥ त्यमिति॥ उत। अन्यच्च। ऋभवः। त्यं। तं। पूर्वं कृतं जीर्णमेकमेव चमसं॥ पुनर्नवं। नवांश्चतुरश्चमसान्‌। अकृत। अकुर्वन्‌। एवं त्वष्टुः देवस्य। निष्कृतं। शिश्रूषणं। अकृत॥६॥

तेनः॥ संसप्तसंख्यानि॥ ये एवंभूताः ऋभवः। ते। नः अस्माकं। सुन्वते। यजमानाय। त्रिः त्रिकालेष्वपि। साप्तानि। सप्तसंख्यानि॥ स्वार्थिको त्र तद्धितः। स एव। साप्तानि। सप्तेनाप्य छंदसीति वर्गवाऽण्‌॥ छांदसत्वादाद्युदात्तत्वं॥ सप्तनोऽञ्‌ छंदसीति सूत्रपाठेन विरोधः। रत्नानि। धत्तन। दत्त। देवतांतरपक्षे॥ चक्रं रथो मणिर्भार्या निधिरश्वो गजस्तथा॥ एतानि सप्त रत्नानि पूर्वेषां चक्रवर्तिनां इति पुराणो

तेनो रत्नानि धत्तन त्रिरा साप्तानि सुन्वते॥ एकमेकं सुशस्तिभिः॥२॥ ते। नः। रत्नानि। धत्तन। त्रिः। आ। साप्तानि। सुन्वते। एकंऽएकं॥ सुशस्तिऽभिः॥२॥ सप्तसंख्यानि रत्नानि त्रिकालेष्वपि धत्तन॥ पुराणपंचरात्रेतिहासवेदान्‌ हरिस्तथा॥ मीमांसा तर्क सहितान्यं च वेदान्‌ तथापि वा॥ सप्तछंदांसि वैकैकं तद्गुणैर खिलैः सह॥२॥श्री॥

क्तानि सप्त रत्नानि वि द्युपक्षेत्वाह॥ पुराणेति॥ वेदाश्चतुरः। हरिश्चेद्विपक्षितः। तदेतित्रोषः। तथाशब्दो वक्ष्यमाणसमुच्चये। अथापि वेति निपात समुदायः पक्षांतरद्योतकः। सप्तछंदांसि गायत्र्यादीनि। उत्तरार्धं व्याख्याति॥ एकैकमिति॥ येषां रत्नानां मध्ये। एकमेकं। एकैकं रत्नं। सुशस्तिभिः प्रशंसाहेतुभिः। तत्तद्गुणैरखिलैः सहवर्तमानं। तथाभूतानि॥२॥

अधारयंत ॥ स्वकर्मणा । जगतो धारकत्वेन स्वयं स्थिरत्वेन च वन्हयः ॥ वन्हि नामानः । अनेकार्थत्वाद्धातूनां वहतिरत्र धृतेौ वर्तते । ऋभवः । सुकृत्यया । सुकर्मणा । देवेषु देवानां मध्ये भूत्वा । यज्ञियं भागं । अभजंत । अभजन् । प्राप्ताः । अधारयंत । आधारयन्नपि भजनातिरिक्तं धारणं नास्तीति अतः पौनरुक्त्यं । तत्राह ॥ यथागतिरिति ॥ यथा ये

अधारयंत वन्हयोभजंत सुकृत्यया ॥ भागं देवेषु यज्ञियं ॥ ३ ॥ २ ॥ अधारयंत ॥ वन्हयः ॥ अभजंत ॥ सुऽकृत्यया ॥ भागं । देवेषु । यज्ञियं ॥ ३ ॥ २ ॥ सुकर्मणा यज्ञभागं अभजन्नप्यधारयन् ॥ वन्हयो धारकत्वेन स्थिरत्वेन यथागतिः ॥ ३ ॥ २ ॥

न प्रकारेण प्राप्तस्य भागस्य । अगतिः अविच्छेदः ॥ तथा अधारयन् । ततश्चेदानीमभजंत । आधारयंत । कालांतरेपि स्थिरीकृतवंत इत्यर्थः । यद्वा यथा विश्वस्य गतिः प्रवृत्तिर्भवति तथा धारकत्वेनेति योज्यं ॥ एवं धातोरर्थद्वयं अंगीकृतं भवति ॥ ३ ॥ २ ॥

व्यास ४

ऋभुशब्दं भगवति निर्वक्ति ॥ ऋतु भ्रमिरिति । ऋ गतौ । ततः परस्य तकारस्य लोपः । भूशब्दस्य ह्रस्वः निर्वचनत्वा । भ्रमिराश्रयः । ऋतभूमिरित्यस्यैव व्याख्यानं ॥ ज्ञानभूमिरिति ॥ यस्मात्तस्मादित्यध्याहारः ॥ ऋभुशब्दं देवतांतरे निर्वक्ति ॥ येषामिति ॥ येषां देवानां । ऋतं कर्म । भूतं संसंते च ऋभव इरिताः । पूर्ववदत्रापि लोपविकारो द्रष्टव्यौ । यज्ञभागाप्तितोपीति निर्वचनांतरं ॥ ऋतं भागं ऋभवः । ऋतशब्द

ऋतभूमि र्ज्ञानभूमिर्भगवान्न्हभुरिरिति ॥ येषां भूतं ऋतं कर्म यज्ञभागाप्तितोपि ते ॥ ४ ॥ सं वो मदा अग्मतेंद्रेण च मरुत्वता ॥ आदित्येभिश्च राजभिः ॥ ५ ॥ ३ ॥ सं ॥ वः । मदासः । अग्मत । इंद्रेण । च मरुत्वता । आदित्येभिः । च । राजऽभिः ॥ ५ ॥ ३ ॥ सहेंद्रेण सहादित्यैः प्राप्ता युष्माकं मिंदवः ॥ ॥ ५ ॥ ३ ॥ ॥

स्य ऋकारः । भागशब्दस्य भूशब्दः पृषोदरत्वात् ॥ यद्वा ऋतशब्दो यज्ञनाम । तस्य ऋकारादेशः । भूशब्दो भू प्राप्ताविस्यस्य रूपं ॥ ऋतं । यज्ञभागं । भूताः । प्राप्ताइत्यृभवः ॥ ४ ॥ सं वः । सहेंद्रेण । हे ऋभवः । मदासः । मदहेतवः । इंदवः सोमाः । मरुत्वता इंद्रेण । सह । राजभिः । आदित्यैः सह । वः युष्माकं । द्वितीयेर्थे षष्ठी । समग्मत संप्राप्ताः ॥ ५ ॥

तामित्रस्य। प्रथमपादं व्याख्याति॥ ताविति॥ यौ। तौ। प्रसिद्धौ। मित्रस्य हरेः। प्रशस्तये। प्रसंसौ। थौ भवतः। देवैर्हि परमेश्वरस्य प्रशंसा लो
के षु शस्यते। तौ सोमपाविंद्राग्नी॥ सोमपीतये। हवामहे॥ ३॥ उग्रासंता। वयं। उग्रौ क्रूरौ शत्रून्‌ प्रति। संतौ प्रशस्तौ। इंद्राग्नी। इदं सवनं॥

तामित्रस्य प्रशस्तय इंद्राग्नी ता हवामहे॥ सोमपा सोमपीतये॥ ३॥ ता। मित्रस्य। प्रऽशस्तये॥ इंद्राग्नी इति। ता। हवामहे। सोमऽपा।
सोमऽपीतये॥ ३॥ तौ मित्रस्य प्रशस्त्यर्थौ हरेः॥ ३॥ उग्रा संता हवामह उपेदं सवनं सुतं॥ इंद्राग्नी एह गच्छतां॥ ४॥ उग्रा॥ संता।
हवामहे। उप। इदं। सवनं। सुतं॥ इंद्राग्नी इति॥ आ। इह॥ गच्छतां॥ ४॥ ता महांता सदस्पती इंद्राग्नी रक्ष उब्जतं॥ अप्रजाः
संत्वत्रिणः॥ ५॥ ता। महांता। सदसस्पती इति। इंद्राग्नी इति। रक्षः। उब्जतं। अप्रजाः। संतु। अत्रिणः। रक्षांसि चोब्जतं॥ ७
इमं यज्ञं। स्रुतं सोमं च प्रति। हवामहे। तदवधार्यो। इंद्राग्नी। इह। आगछतां॥ ४॥ ता महांता॥ रक्ष इत्येकवचनं जातावित्याशयेनाह॥
रक्षांसीति॥ नन्वप्रजाः संत्वत्रिण इत्यत्र प्रकृतरक्षोग्रहणे लिंगवचनव्यत्यासः॥ तद्ग्रहणे तु विशेष्यांतरं न दृश्यत इत्यतो भिन्न
विषयतां तावच्छब्देन सूचयति॥

नन्वेवं तर्हि विशेष्यांतरं न दृश्यत इति तत्राह॥ रक्षोरक्ष्या प्रजा इति॥ इदमुक्तं भवति॥ यद्यप्युत्तरार्धेपि रक्ष इत्येवानुवर्त। तथा
पि तच्छब्देन प्रजास्तदीयाः लक्ष्यंते। उक्तानुपपत्तेरेव॥ रक्ष्यरक्षकभावस्य चाविद्यमानत्वादिति। रक्षोभी रक्ष्याः रक्ष्याः प्रजाः उत्त
रार्धे लक्ष्यंत इति शेषः। तास्त्वत्रिण इत्येतद्व्याख्याति॥ यस्मादिति॥ यस्मान्मार्गत्रयोज्झिताः। तस्मादत्र्यः। वेदे तु त्रय एषां संतीति त्री
ण्यादि लक्षणा इनिः। नत्रियो ऽत्रिणो जना इति पुल्लिंगप्रयोगः। भाष्ये तु प्रजा इत्यभिधेयांतरकथन एवता त्पर्यं न लिंगे। न विद्यंते

रक्षोरक्ष्याः प्रजा यस्मात्त्र्योमार्गत्रयोज्झिताः॥ पितृदेवमनुष्याणां गत्यभावादधोगतेः॥ ५॥

त्रयो वा सामिति वकुश्रीहेर्डीप्। मार्गत्रयोज्झितत्वं कथमित्यत आह॥ पितृदेवेति॥ पितॄणां गतिः। स्वर्गः। देवानां गतिर्मोक्षः। मनुष्या
णां गतिः पृथिवी। एतदपि कथमित्यत आह॥ अधोगतेरिति॥ हे इंद्राग्नी यौ युवां। महांतौ पूज्यौ सदसस्पती। मज्जगृहविशेषस्य स्वा
मिनौ। तौ रक्षः। रक्षांसि। उब्जतं। यद्यपि उब्जः आर्जव इति पठ्यते। तथाप्यत्र सामर्थ्याद्वधार्थो ग्राह्यः॥ हतं। किं च अ
त्रिणः। गतित्रयरहिताः। रक्षःसंबंधिनो जनाः अप्रजाः संतु॥ ५॥

तेनसत्येन। प्रथमपादंप्रसिद्धेंद्राग्न्योर्येजयति॥सत्येनेति॥विष्णोर्योजयति॥स्वगुणैरिति।विष्णुर्विवक्षितश्चेत्तदासत्येनेत्यस्यस्वगुणैरित्येवार्थः॥
प्रचेतुनइत्येतद्व्याख्याति॥प्रकृष्टइति॥पदइत्यस्यार्थमाह॥पदइति॥अधीत्येतद्व्याचष्टे॥सम्यगिति।सम्यक्किमित्युक्तआह॥तस्मिन्नेवेति॥स्व
पे भावतःफलानपेक्षया।नन्विंद्राग्नीसदापरमेश्वरेजागरणवंतावेव।तत्कथंजागृतमित्युच्यतइत्यतआह॥तथेति॥स्वभावतइत्येतदत्रापिसंबध्यते।
स्वभावतःविधानेनविना।तथास्थितौ।जाग्रतौस्थितावेव।इंद्राग्नीजागृतमितिलकारस्यथेनोक्तावितिनत्विदंविष्णोर्दुर्घटं।करणाधिकरण

तेनसत्येनजागृतमधिप्रचेतुनेपदे॥इंद्राग्नीशर्मयच्छतं॥३॥तेन।सत्येन।जागृतं।अधि।प्रऽचेतुने।पदे।इंद्राग्नीइति।शर्म।
यच्छतं॥३॥सत्येनगुणपूर्णेनविष्णुनातेनजागृतं॥स्वगुणैरेवविष्णुस्तुप्रकृष्टचेतनेहरौ॥पदेगम्यत्वतःसम्यक्तस्मिन्नेवस्व
भावतः॥तथास्थितौतुजागृतमितिविष्णुर्विशेषतः॥उक्तः॥ टीका॥कर्तृत्वादीनांभेदसमानाधिकरणत्वादि

त्यतआह॥विष्णुरिति॥विशेषतःभेदप्रतिविधिविशेषणत्वा।त्स्या।उक्तः।करणत्वादिनेतिशेषः।हेइंद्राग्नीयुवां।तेनप्रसिद्धेनसत्येन
गुणपूर्णेनविष्णुनातत्प्रसादेनेतियावत्।प्रचेतुनेप्रकृष्टचेतुने।अधिकस्यार्थउकारः।पदेगम्ये।पद्गतौ।कर्मण्यका
रः।हरौ।अधि।सम्यक्।अनन्ययोगेन।स्वभवतोवा।जागृततं।द्विषयेजागरणवंतौस्थः।एवंभूतौअस्मभ्यं।शर्मसुखं।य
च्छतं।यच्छ।हेइंद्राग्नीयुवां।तेनसत्येनप्रसिद्धेन।इच्छादिनागुणेन।स्वविषये।जागृतं।स्वसामर्थ्येनैवस्वप्रकाशौस्थइति॥३॥ व्यास ६

इहेंद्राग्नी॥षळृचमिदमैंद्राग्नंसूक्तं॥अत्रापदानिव्यवहितानीत्यन्वयंदर्शयति॥ह्वयेसोममिति॥अहं।इह।यज्ञे।इंद्राग्नी।
उपह्वये।कस्मात्।यस्मात्तयोरिंद्राग्न्योःइत्।एव।स्तोमं।स्तुतिं।उश्मसि॥सर्वेवयंकामयामहे॥अनेनस्तोमंप्रस्तुप
ह्वयइत्युक्तंभवति॥किंच।तौसोमपातमाअतिशयेनसोमपातारौ॥इंद्राग्नीसोमंचउपब्रवीति॥ह्वयइतिपूर्वेणसंबं

इहेंद्राग्नीउपह्वयेतयोरित्स्तोममुश्मसि॥तासोमंसोमपातमा॥१॥इह।इंद्राग्नीइति।उप।ह्वये।तयोः।इत्।
स्तोमं।उश्मसि।ता।सोमं।सोमऽपातमा॥१॥ह्वयेसोमंप्रतिचरतौ॥५॥भा०॥तायज्ञेषुप्रशंसतेंद्राग्नीशुंभततान
रः।तागायत्रेषुगायत॥२॥ता॥यज्ञेषु।प्र।शंसत।इंद्राग्नीइति॥शुंभत।नरः।ता।गायत्रेषु।गायत॥२॥शुंभतंभूषयंमतं॥

धः॥५॥तायज्ञेषु॥शुंभतेत्यत्रप्रकृतेरर्थमाह॥शुंभनमिति॥हेनरःऋत्विजः।तौप्रकृतावेंद्राग्नीयज्ञेषुप्रशंसत।प्रकर्षेणस्तुत।
शुंभतभूषयतच।शुभशुंभशोभार्थे।अंतर्भावितण्यर्थः।किंचतौ।इंद्राग्नी।गायत्रेषुसामसु।गायत।तृतीयेसप्तमी।गायत्रैःस्तु
तेत्यर्थः॥२॥

प्रातर्युजा ॥ एकविंशतिरृचं सूक्तं । तत्राद्याश्च तस्र अश्विन्यः । प्रातर्युजाविस्येतदश्विनो व्याख्याति ॥ प्रातस्तुतत्वेनेति ॥ प्रातःसवनेस्तु
तत्वेन । भगवतिव्याख्याति ॥ भगवांश्चेति ॥ प्रातर्योगेन । हंसोपास्तिलक्षयेन गम्यत इति प्रातर्युगिति किं इत्यर्थः । उपायोपेययोरभेदो
पचारात् । विबोधयेत्येतदज्ञानसूचकं । अतः समुच्चिकेमन्यथा व्याख्याति ॥ स्तुतिशब्द इति ॥ यस्मात्स्तु इत्यर्थः । शब्दस्तुतो । गुयसंकी

प्रातर्युजा वि बोधयाश्विनावेह गच्छतां ॥ अस्य सोमस्य पीतये ॥ १ ॥ प्रातःऽयुजा । वि । बोधय । अश्विनौ । आ । इह । गच्छ
तां । अस्य । सोमस्य । पीतये ॥ १ ॥ प्रातस्तुतत्वेन प्रोक्तौ प्रातर्युजाविति ॥ अश्विनौ भगवांश्चैव प्रातर्योगेन गम्यते ॥
स्तुतिशब्दः स्तुतो यस्माद्बुध्यते वर्तमानकः ॥ बोधयेत्यत उक्तं तत्परतो बुध्यतेऽकर्थं ॥ ॥ १ ॥ ॥

तनिएवव्याख्येयो न दोषसूचकतया । प्रकरणासंगतेः । अतो बोधयेतियदुक्तं तत्तत्र लोट् स्ययो बुध्यत इति वर्तमानको वर्तमाना
र्थे व्याख्येय इत्यर्थः । यथास्थितव्याख्याने कथं स्तुतित्वव्याघात इति अत आह ॥ परत इति ॥ सर्वज्ञत्वादिति शेषः । परतः ऋत्विगादि
तः । हे होतः प्रातर्युजौ अश्विनौ विबोधय विबुधावेव वर्तते । तौ प्रार्थय । स्तुवेति यावत् ॥ तौ इह ॥ सोमस्य पीतये । आगच्छतां ॥ १ ॥

यास्त्र रथा ॥ यौ अश्विनौ । उभौदेवौ । शोभनरथौ । रथितमौ । अतिशयितौ दिविस्पृशौ । दिविवर्तमानौ । तौह वामहे ॥२॥ यावां ॥ अत्र । कशया
यज्ञस्यमेक्षणंप्रार्थ्यतेतत्किंनिमित्तं इत्यतआह ॥ कशयेति ॥ कुरुतोश्विनौ इति प्रार्थितमितिशेषः । मिमिक्षतमित्यत्रप्रकृत्यर्थमाह ॥
स्पृशौ इति ॥ सूनृतावतीत्येतत्कशायांयोजयति ॥ वेदेति ॥ यज्ञस्यक्रियारूपकथं कशयास्पृष्टिः कथंचमधुरत्वमित्याशंकांपरि
यास्त्ररथारथीतमोभादेवादिविस्पृशा ॥ अश्विनाताहवामहे ॥२॥ या । स्त्रऽरथा । रथिऽतमा । उभा । देवा । दिविऽस्पृशा । अश्विना । तांहवामहे ॥२॥ यावां
कशामधुमत्यश्विनासूनृतावती ॥ तयायज्ञंमिमिक्षतं ॥३॥ या । वां । कशा । मधुऽमती । अश्विना । सूनृतावती । तया । यज्ञं । मिमिक्षतं ॥३॥ कशा
यास्पृष्टिमात्रेण मधुरंकुरुतो खिलं ॥ अतोमिमिक्षमितिस्यशेमेक्षणमुच्यते ॥ वेदवाक्यरूपत्वेन कशासासूनृतावती ॥ तयेवघृतसोमादिस्पृशा
तंयाज्ञियंवस्त्र ॥३॥ नहिवामस्ति दूरकेयत्रारथेनगछथः ॥ अश्विनासोमिनोगृहं ॥४॥ नहि । वां । अस्ति । दूरके । यत्र । रथेन । गछथः । अश्विना । सो
मिनः । गृहं ॥४॥ ॥ टीका ॥ हरन्व्याख्याति ॥ तयैवेति ॥ अश्विनौयावां । युवयोः संबंधिनी । मधुमती । स्वादुमती ॥ स्वादुत्वका
रिणी । सूनृतावती । सूनृता । वेदवाणी । तद्वती । तत्स्वरूपा । कशा । अश्वादिनोदिनी । तया अस्मदीयं यज्ञं यज्ञसंबंधिघृतसोमादिवस्तु । मिमिक्षतं । स्प
शतं ॥३॥ नहिवां । हे अश्विनौ । यत्र । सोमिनः यजमानस्यगृहे । द्वितीयार्थेसप्तमी । रथेनगछतः । आगछथः । तत्र वांयुवयोः । दूरके दूरे । नह्यस्तिदूरंनभ

वर्तते । तस्मादागच्छतं ॥४॥

हिरण्यपाणिं ॥ अतःपराश्चतस्रः सावित्र्यः । विश्मोहिरण्यपाणिशब्दं व्याख्याति ॥ हितत्वादिति ॥ जगत इति शेषः । नारायणस्य रूपमेव न तु पाणि
मात्रं । हितत्वाद्रमणीयत्वाद्धिरण्यं । आदेशपादिकमूह्यं । वर्णतोपि च । हिरण्यसदृशत्वाद्धिरण्यं । अतोसौ हिरण्यपाणिरुच्यत इत्यर्थः । पाणिश
ब्दोनूपार्थः कथमित्यत आह ॥ पाणीति ॥ सवितृशब्दव्याख्यांस्मारयति ॥ स्रष्टृत्वादिति ॥ स पदं चेतेति व्याख्याति ॥ सज्ञातेति ॥ पदं स्वरूपं । एक
वाक्यत्वे सदेवतेस्यनुवादोनुपपन्नः स्यादित्यतो वाक्यभेदेन व्याख्याति ॥ सएवेति ॥ अत्र देवताशब्दो देवपर्यायो ग्रहीः । यद्वाभावे तत् । देवस्य भा
हिरण्यपाणिमूतये सवितारमुपह्वये ॥ सचेत्ता देवता पदं ॥ ५ ॥ हिरण्यऽपाणिं । ऊतये । सवितारं । उप । ह्वये । सः ॥ चेत्ता । देवता ॥
पदं ॥ ५ ॥ हितत्वाद्रमणीयत्वाद्धिरण्यं वर्णतोपि च ॥ रूपं नारायणस्यैव पाणिशब्दोपलक्षितं ॥ स्रष्टृत्वात्स विता विष्णुः सज्ञा
तास्वपदादितं ॥ सएव देवतामुख्यात् द्गुणैक्येन देवता ॥ ५ ॥ टीका ॥ वो देवता देवशब्दप्रवृत्तिनिमित्तं । कथं तर्हि सदेव
तेति व्यपदेश इत्यत आह ॥ तद्गुणैक्येनेति ॥ सएवेत्यनुवर्तते । तस्य परमेश्वरस्य गुणादीनां च क्रीडादीनां । ऐक्येन कारणेन । देवता । देवत्वं । सए
वेत्स्फुरक्कमित्यर्थः । अहं हिरण्यपाणिं हितं च रमणीयं चेति वा हिरण्यवर्णत्वाद्वा हिरण्यपाणिशब्दरूपं यस्य तं सवितारं । ऊतये रक्षाद्यर्थं । उपह्वये ।
कुतः सवितापदं स्वरूपं । स्वस्यान्यस्य चेत्ता ज्ञाता । चिती संज्ञाने । तृन् । सएव । देवता देवः । अन्ये तु देवासः । यद्वा देवता देवशब्दप्रवृत्तिनिमित्तं गुणजातं

सप्तपदभिन्नमेव ॥ ५ ॥

अपांनपातं ॥ परमेश्वरे अपान्नपाच्छब्दं घटयति ॥ व्यक्तत्वादिति ॥ नपाच्छब्दः पौत्रपर्यायः । पञ्चः पृथिवीतिश्रुतेः । पृथिवीतावदपांपुत्री । तदात्मक
त्वाद्देहोपि ॥ तत्रचपार्थिवदेहेव्यक्तत्वाज्जनार्दनः पृथिवीपुत्र इत्येवं अपांनपादित्यर्थः । सः अजत्वेन प्रसिद्धः । एवंसविताप्यपांकार्येडेजातत्वाद
पांनपात् । हे होतः । अपांनपातं सवितारं । अवसे रक्षार्थं । उपस्तुति । कुतः । तस्यसवितुः । व्रतानि । कर्माणि । उत्तमसि । सर्वेवयंकामयाम

अपांनपातमवसेसवितारमुपस्तुति ॥ तस्यव्रतान्युश्मसि ॥ ३ ॥ अपां । नपातं । अवसे । सवितारं । उप । स्तुहि । तस्य । व्र
तानि । उश्मसि ॥ ३ ॥ व्यक्तत्वात्पार्थिवेदेहे सोपांनपाज्जनार्दनः ॥ ३ ॥ विभक्तारं हवामहे वसोश्चित्रस्यराधसः ॥ स
वितारंनृचक्षसं ॥ २ ॥ वि ऽ भक्तारं । हवामहे । वसोः । चित्रस्य । राधसः । सवितारं । नृ ऽ चक्षसं ॥ २ ॥ सदाविभ
ज्यदातारं वसोरुत्तमराधसः ॥ अशेषपुण्यपापादिविशेषेश्वितिदर्शकं ॥ आह्वयामः ॥ ॥ २ ॥

हे ॥ ३ ॥ विभक्तारं ॥ सदा । वयं । चित्रस्य । राधसः । उत्तमराधसः । उत्तमसिद्धिरूपस्य । वसोः वस्तुनः । विभक्तारं । सदाविभज्यदा
तारं । यस्ययावद्योग्यंतावतोदातारं । नृचक्षसं । नृणांजीवानांद्रष्टारं । अशेषपुण्यपापादिविशेषैर्धर्मैः सहचितिदर्शकं । जीवचैतन्यसाक्षि
णं । सवितारं हवामहे । आह्वयामः ॥ २ ॥ ॥

आग्ना अग्न इहावसे होत्रांयविष्ठ भारतीं। वरूत्रींधिषणां। नदीश्च। हे यविष्ठ। युवन्। अग्ने। ग्नाः। नदीश्च। आकुतिनृपतः। आह्वानमंत्राभिमानि
त्वतः। होत्रां। जुहोतेरादानयोः। अस्मात् करणे त्र प्रत्ययः। वरणीयत्वात् त्राणाच्च जगतो वरूत्रीं। वृणोतेः कर्मण्यूकारः। त्रायतेः कर्तरि ट्रः।
ततः कर्मधारयः। धिषणां बुद्धिस्वरूपिणीं। बुद्ध्यभिमानिनीं। भारतीं च। अवसे। अस्मद्रक्षणाय। आवह। ग्नाशब्दो विद्येभ्यो पूर्वनिरुक्तः। भारतीशब्दं तत्र
निर्वक्ति। विस्मुश्चेति। द्वितीयेन चशब्देन देवानां पालकत्वाद्देवानां पत्नीरिति चोदिता इति समुच्चिये। न्नोति। यज्ञसंयोग इति तु नाश्रितं। प्रणसंबंधाद्भारती
आग्ना अग्न इहावसे होत्रांयविष्ठ भारतीं। वरूत्रींधिषणां वह। ५। आ। ग्नाः। अग्ने। इह। अवसे। होत्रां। यविष्ठ। भारतीं। वरूत्रीं। धिषणां। व
ह। ५। नदीश्च भारतीं चैव होत्रामाकुतिनृपतः। वरूत्रीं वरणीयत्वात् त्राणाद्बुद्धिस्वरूपिणीं। विष्णुश्च प्राणसंबंधाद्भारती सैव चोदितः।
॥ होत्राकुतत्वौ विष्णुश्री। वाचि धिषणामता। ५। ५। टीका। तु कथं लभ्यत इत्यत आह। प्रा
प्राणस्तु भरतो भारततत्वाद्वृत्ते नृपतः। जगत इति शेषः। डुभृञ् भरणे। अस्मादतच्। भरतस्ये
यं स्वामिनी भारती। विष्णोरभिमानित्वाभावात् कथं तत्र होत्राशब्द इत्यत आह। होत्रेति। अस्मिन् पक्षे कर्मणि त्र प्रत्यय इत्यर्थः। ह्यतेवेभि
यत्र प्रत्ययः। एवं धिषणाशब्दोऽपि प्रेरकत्वेन योज्यः। पूर्वं धिषणाशब्दो भारती विशेषणत्वेनैव व्याख्यातः। इदानीं भिन्नविषयतां च दर्शयति। श्रीर्वेति। ५। ५।

तो

अभि नः। शर्मदत्वा। न्टपत्नीः। नरो देवाः प्रधानपुरुषत्वात्। तेषां पत्न्यः। नृणां पालयित्र्यो वा। देवीः देव्यः। अवसा। अवनकर्त्र प्राणेन साकमेव। सहः महतः।
सर्ववित्तमस्य। विष्णोः। शर्मणा। तत्संबंधि मोक्षादिरूपं शर्म दत्वैव। नः अस्मान्। अभि। अभितः। सचंतां रक्षंतु। अछिन्नपत्रा इति देवादीनां
विशेषणं व्याख्याति। यस्मादिति। अवैधव्येन कथमछिन्नपत्रत्वं लभ्यत इत्यत आह। सदेति। पत्रशब्देन ताटंकमुच्यते। ततश्चाछिन्नप
अभि नो देवीरवसा महः शर्मणा नृपत्नीः। अछिन्नपत्राः सचंतां। ३। अभि। नः। देवीः। अवसा। महः। शर्मणा। नृऽपत्नीः।
अछिन्नऽपत्राः। सचंतां। ३। शर्मदत्वैव महतो विष्णो रक्षंतु नोऽभितः। प्राणेनैवावसा साकं यस्मादविधवा सदा। अतो ह्यछिन्न
पत्रास्ताः सदा युक्ता कर्णभूषणाः। ३। इहेंद्राणीमुपह्वये वरुणानीं स्वस्तये। अग्नायीं सोमपीतये। २। इह। इंद्राणीं। उप। ह्वये। व
रुणानीं। स्वस्तये। अग्नायीं। सोमऽपीतये। २।
दा त्रा इति सैव कर्णभूषणयोगाल्लभ्यते सच्चाविधवानामेव संभवतीत्यतो युक्तमुक्तमिति। ३। इहेंद्राणीं। अहं। इंद्राणीं। इंद्रस्य पत्नीं। व
रुणानीं। वरुणपत्नीं। अग्नायीं। अग्नेः पत्नीं च। सोमपीतये। स्वस्तये। सोमं पीत्वा स्वभ्यं संततसौख्यं दातुमिति यावत्। इह उपह्वये। २।

महीद्यौः॥भरणैर्नः।मही।महती।द्यौः।पृथिवीच।नः।अस्मदीयं।इमं।यज्ञं।मिमिक्षतां।सिंचतां।आगच्छतां।अगत्यच।भरीमभिः।भावेई
मन्।भरणैः।नः।अस्मान्।पिपृतां।पारयेतां।दुःखेभ्य इतिशेषः।अत्र के द्यावापृथिव्याविपत आह।श्रीशेति॥द्यावापृथिव्यो।अन्ये।श्री

महीद्यौःपृथिवीचनइमंयज्ञंमिमिक्षतां॥पिपृतांनोभरीमभिः॥३॥मही।द्यौः।पृथिवी।च।नः।इमं।यज्ञं।मिमि
क्षतां।पिपृतां।नः।भरीमभिः॥३॥भरणैर्नःपारयेतांदुःखेभ्यश्रीश्वक्षश्वते॥स्वयंवाभगवानन्येरोदीलोकदेवते॥
॥३॥तयोरिद्घृतवत्पयोविप्रारिहंतिधीतिभिः॥गंधर्वस्यध्रुवेपदे॥४॥तयोः॥इत्॥घृतऽवत्॥पयः॥विप्राः॥रि
हंति॥धीतिभिः॥गंधर्वस्य॥ध्रुवे॥पदे॥ तयोःपयस्के विज्ञानेघृतवत्सापरोक्षके॥ ॥

भूमिभ्यां।भगवतश्च।लोकदेवते।लोकाभिमानिन्यो।रोदसीतिच।द्यावापृथिव्यो॥३॥तयोरित्।तयोःपयइसेताव्द्याख्याति।तयोरि
ति॥द्यावापृथिव्योः।प्रीतयेमुमुक्षुभिःसेव्यतइतिपयः।विज्ञानं।घृतवदित्येतद्व्याख्याति॥घृतवदिति॥घृतक्षरणदीप्त्योः।भावक्तः
घृतंदीप्तिः।अपरोक्षज्ञानंतेनसहितंघृतवदित्यर्थः॥ ६॥

सखायः।अत्रराधांसिशुंभतीत्येतद्व्याख्याति॥सराधांसीति॥हेसखायः।ऋत्विजः।आ।अस्मत्समीपमागत्य।निषीदत।किमिति।नु।
इदानीं।नः।अस्माकं।दाता।अभिलषितस्य।सविता।स्तोम्यः।स्तोमार्हः।स्तोतव्यः।यःससविता।हरिः।राधांसि।सिद्धीः।शुंभति।अंज
सा।शोभयति।स्वराधांसीतिक्वचित्पाठः।तत्रस्वेनदत्तानिराधांसीतिव्याख्येयं॥सेश्वराहिसिद्धयोशोभावत्योभवंतीति॥३॥अग्नेपत्नीः॥

सखायआनिषीदतसवितास्तोम्योनुनः॥दाताराधांसिशुंभति॥३॥सखायः।आ।नि।सीदत।सविता।स्तोम्यः।नु।नः।
दाता।राधांसि।शुंभति॥३॥सराधांसिशोभयसंजसाहरिः॥३॥अग्नेपत्नीरिहावहदेवानामुशतीरुप॥त्वष्टारं
सोमपीतये॥४॥अग्ने।पत्नीः।इह।आ।वह।देवानां।उशतीः।उप।त्वष्टारं।सोमऽपीतये॥४॥

आग्नेय्योद्वेइतिकेचित्।तदनुपपन्नमिवाभाति।अग्नेरत्रप्रेषगोचरत्वात्।तस्यचानेकांतिकत्वात्।अन्यथातिप्रसंगात्।तस्माद्वाचो
दुरग्नेरेवात्रप्राधान्यमित्यनुपपन्नं।विशेषप्रमाणेसतित्वाश्रयत्वंननिवार्यते।अतोयथाप्रतीताएवातःपरंदेवताः।हेअग्ने।उशतीः।
कामयानाः।यज्ञागमनमितिशेषः।देवानांपत्नीः।त्वष्टारंच।सोमपीतये।इह।उपावह॥४॥ सोमपानार्थमागतानिंसेनमः॥ ६॥
या

स्योनापृथि। स्योनाभवेत्यस्यार्थमाह॥ स्योनेति॥ स्योनाशब्दः सुखनामसु पठ्यते। सुखभासनमितिवत्तत्कारिण्यपि वर्तते। अनृक्षरे
त्यस्यार्थमाह॥ यत इति॥ ततोऽनृक्षरेतिशेषः। ऋच्छत्क्षरति मनुष्यवन्न ऋयतीति ऋक्षरा। न ऋक्षरा अनृक्षरा। न ऋयतीति वक्तव्येन ऋसीति

स्योनापृथिविभवानृक्षरानिवेशनी॥ यच्छानः शर्मसप्रथः॥५॥६॥ स्योना॥ पृथिवि॥ भव॥
अनृक्षरा॥ निऽवेशनी॥ यच्छ॥ नः॥ शर्म॥ सऽप्रथः॥५॥६॥ स्योना सुखकरी स्याः नो यतो न
ऋसिनो ऋवत्॥ निवेशनी साऽधारत्वाच्छर्मयच्छमहत्तरं॥५॥६॥

वचनेन यात्वमनृक्षरेतियोजनां सूचयति॥ निवेशनीति॥ सा पृथिवी। निविशंते स्यामिति अधिकरणे ल्युट्॥ उत्तरार्धं व्याख्याति॥ शा
सेति॥ हे पृथिवि। यात्वं। अनृक्षरा। निवेशनी। सा अस्माकं। स्योना भव। नः अस्मभ्यं। सप्रथः। प्रथो विस्तारः सह प्रथसा वर्तत इति सप्र
थः। महत्तरं शर्म गृहं च। यच्छ। प्रयच्छ॥५॥६॥ व्यास

अतो देवाः॥ षट्वैष्णव्यः। आद्यादेवीच॥ अत्राद्यामृचं कथितहेतुहेतुमद्भावे घटयन्व्याख्याति॥ अस्फरेभ्य इति॥ यतः कारणात्। विष्णुः। जगत्पतिः। पृ
थिव्याः। पृथिवीमारभ्य। सप्तधामभिः। सप्तलोकैः। साकं। त्रिभिः। क्रमैः। पादविक्षेपैः। इदमिति वक्ष्यमाणं जगत्। विचक्रमे। अस्फरेभ्यो जहारेति
यावत्। हृत्वा च। स्फरान्। स्वस्वपदस्थान्। चक्र इति शेषः। अत एवं विष्णुप्रसादाल्लब्धपदत्वेन समर्थत्वात्। देवाः। नः। अवंतु। रक्षंतु। विष्णु

अतोदेवा अवंतुनो यतो विष्णुर्विचक्रमे॥ पृथिव्याः सप्तधामभिः॥१॥ अतः। देवाः। अवंतु। नः। यतः। विष्णुः। विऽचक्रमे॥ पृथिव्याः।
सप्त। धामऽभिः॥१॥ अस्फरेभ्यो जगद्धृत्वा यतो विष्णुस्त्रिभिः क्रमैः॥ आरभ्य पृथिवीं सप्तलोकैः साकं जगत्पतिः॥ स्वकेस्फरान्पदस्था
न्यतो देवा अवंतु न४॥ विशिष्टबलचेष्टत्वाद्विष्णुरित्यभिधाहरेः॥ प्राणं बलं षकारं च णकारं चाह हि श्रुतिः॥१॥

पदं निर्वक्ति॥ विशिष्टेति॥ भवतु। विशब्दो विशिष्टत्ववाची। षकारणकारयोस्तु चेष्टाबलवाचित्वं कुत इत्यत आह॥ प्राणमिति॥ परमेश्वरस्य प्रा
णं चेष्टां। षकारं। षशब्देनाक्रियमाणं। बलं च णकारं च णशब्देनाक्रियमाणं। आहेत्यर्थः। श्रुतिः॥ णकारो बलं षकारः प्राण आत्मेत्येषा॥ १॥

इदं विष्णुः। पूर्वार्धर्चः पूर्वेणैव व्याख्यातः। द्वितीयं व्याख्याति॥ रमंतीति॥ रमंति। शेरते। यद्वा पांसुशब्देन तदाश्रिता देवाः विवक्षिताः। समू
ढमित्यनेन समूल्हमित्येतद्व्यहलेरूपमित्युक्तं भवति॥ प्रापितमित्यर्थः। अत्रापीदमिति संबध्यत इत्यतो विश्वमित्युक्तं। पद इत्यनुक्तो

इदं विष्णुर्विचक्रमे त्रेधा नि दधे पदं॥ समूल्हमस्य पांसुरे॥२॥ इदं। विष्णुः। वि। चक्रमे। त्रेधा। नि। दधे। पदं॥
संऽऊल्हं। अस्य। पांसुरे॥२॥ रमंति पांसवो यत्र पांसुरं पदमीरितं॥ समूढं तत्र विश्वं हि पांसुवज्जगतः पतेः॥२॥

पांसुर इत्युक्तः तात्पर्यमाह॥ पांसुवदिति॥ विष्णुः। भगवान्। इदं। विश्वं। विचक्रमे। विक्रांतवान्। कथं। त्रेधा। पदं। निदधे। तदा अस्य
जगतः पतेः। पांसुरे पदे। इदं विश्वं। समूल्हं। प्रतिष्ठितमिति यावत्॥ ॥२॥ श्रीमद्गुर्वंतर्गत प्राणांतस्थ विष्णवे नमः॥ ॥

व्यास

९२

परोक्षापरोक्षज्ञाने कथं तयोः संबंधिनीत्यत आह॥ यदिति॥ यद्यस्मात्। भारत्यपि लोकदेवता। द्यावापृथिव्योर्देवतास्यात्। सैव च ज्ञानदेव
तास्यात्। तस्मात्तयोरितियुक्तमिति॥ इदानीमृचं व्याचष्टे॥ विष्णोरिति॥ यत्। पयः। ज्ञानं। गंधर्वस्य विष्णोः। ध्रुवे पदे। नित्यपदस्थं नित्यस्व

यच्छोकदेवतापि स्याद्भारती ज्ञानदेवता॥ विष्णोर्नित्यपदस्थं यज्ज्ञानं यद्घृतवत्पयः॥ लिहंति विप्रास्तज्ज्ञानं बुधि
भिस्तत्प्रसादतः॥ गां धारयन्वर्ततीय गंधर्वस्तेन केशवः॥

रूपविषयं। यच्चोक्तप्रकारेण घृतवत्। तज्ज्ञानं। विप्राः। मेधाविनः। धीतिभिः बुधिभिः। इत्यपेक्षं बहुवचनं। रिहंति। लिहंति। सेवं
ते। प्राक्तयोरित्येतत्स्य सोविशेषणत्वेन व्याख्यातं॥ तयोः प्रसादतो रिहंतीत्यपि व्याख्येयमित्याह॥ तत्प्रसादत इति॥ गंधर्वशब्दं
विष्णोर्निर्वक्ति। गामिति॥ गोपदोपपदाभ्यां। धृञ् अवस्थाने। वृतु वर्तने इत्याभ्यां डः। उपपदस्य चगंभावः। गां वाचं॥४॥

ऋ॰भाष्य

विष्णोः। कर्माणि। जानीथ। हे जनाः। विष्णोः कर्माणि। पश्यत। जनीथ। कथंभूतानि। व्रतानि। अशेषतः प्राणिकर्माणि। यतः येभ्यः कर्मभ्यः। जानातीति शेषः।
विष्णोर्वेति द्विशेषणं। अनुपलंभबाधितमेतदित्यत उक्तं॥ पस्पश इति॥ भगवान् सर्वदैवाविज्ञातश्च शब्दाज्ज्ञातश्च॥ तदुपपादयति॥ स्पशेति॥ यस्मादेवं
धातुव्याख्यानं तस्मादुक्तं युक्तं। अज्ञातदर्शौ। प्रत्यक्षायोग्यस्यार्थस्य दर्शने। ततश्च पस्पश इति लिडंतस्य प्राकृतैरदृश्य एव योगिभिर्दृष्टो बभू
वेत्यर्थः। उत्तरार्धं व्याख्याति॥ इंद्रस्येति॥ युज्यः सर्वदा योगार्हः। तस्यार्थः। सहित इति॥ अत्र यः पस्पशे। यश्चेंद्रस्य युज्यः सखा। तस्य विष्णोरित्येकं

विष्णोः कर्माणि पश्यत यतो व्रतानि पस्पशे॥ इंद्रस्य युज्यः सखा॥४॥ विष्णोः। कर्माणि। पश्यत। यतः। व्रतानि। पस्पशे। इंद्रस्य। युज्यः॥
सखा॥४॥ जानीथ विष्णोः कर्माणि प्राणिकर्माण्यशेषतः॥ यतो जनान्यविज्ञातो भगवान्सर्वदैव च॥ स्पशे ज्ञाता तदृशो यस्मादिंद्रस्य सहि
तः सखा॥ प्राणस्यैवेंद्रनाम्नश्च कस्मिन्न्वहमिति श्रुतेः॥ त्वयेदिंद्रेति वचनात्प्राण इंद्राभिधो मतः॥४॥

वाक्यतया योजना। इंद्रशब्दस्य प्रसिद्धे इंद्रस्तावदर्थः। अर्थांतरं चाह॥ प्राणस्यैवेति॥ सखेति संबंधः। एवशब्देनायमेव मुख्योर्थ इत्याचष्टे॥ तत्र कथमित्य
त आह॥ कस्मिन्न्वेति॥ कस्मिन्न्वहमुत्क्रांत उत्क्रांतो भविष्यामि कस्मिन्वा प्रतिष्ठिते प्रतिष्ठास्यामीति। स प्राणमसृजतेति श्रुतेर्विष्णोः प्राणयोरेव
नित्ययोगदर्शनादित्यर्थः। इंद्रशब्दस्य प्राणवाचित्वं कुत इत्यत आह॥ त्वयेदिंद्रेति॥ त्वयेदिंद्र युजा वयमित्यस्यामृचि इंद्रशब्दस्य प्राणे प्रयोगदर्श
नात्। इयं हि तं देवा इत्यत्रार्थे संमतित्वेनोपनिषद्युदाहृता॥४॥७॥

व्यास
३३

तद्विष्णोः। रमा ब्रह्म। परमत्वस्य प्रतियोगिसापेक्षत्वाद्रमा ब्रह्म शिवादिभ्य इत्युक्तं॥ पदमित्यनुवादेन रूपमिति व्याख्यानं। सूर्य इत्यस्यार्थः संसारान्निर्मु
क्ता इति। ते हि मुख्यतः। सूरयः। दृष्टांतस्य तात्पर्यमाह॥ अदृश्यमिति॥ यथा हि। चक्षुराकाशे व्याप्तमपि न दृश्यते केवलं विषयोपलब्धिलक्ष
णेन फलेनानुमीयते। तथा परमेश्वरस्वरूपं सर्वगतमपि न दृश्यते॥ किं तु स्वतंत्रेणां पदार्थानां सत्त्वप्रतीतिप्रवृत्तिभिर्ज्ञाप्यत इति॥५॥ तद्वि

तद्विष्णोः परमं पदं सदा पश्यंति सूरयः॥ दिवीव चक्षुराततं॥५॥ तत्। विष्णोः। परमं। पदं। सदा। पश्यंति। सूरयः। दिविऽइव। चक्षुः।
आऽततं॥५॥ रमा ब्रह्म शिवादिभ्यो यद्विष्णोः परमं पदं॥ रूपं पश्यंति निर्मुक्ताः संसारात्सूरयः सदा॥ चक्षुर्दिवीव व्याप्तं यदऽदृश्यं फलदर्शनात्॥
५॥ तद्विप्रासो विपन्यवो जागृवांसः समिंधते॥ विष्णोर्यत्परमं पदं॥६॥७॥ तत्। विप्रासः। विपन्यवः। जागृऽवांसः। सं। इंधते। विष्णोः। यत्। परमं।
पदं॥६॥७॥ संदीपयंति विज्ञानैः संसारात्प्राप्तजागराः॥ विपन्यवो ज्ञानितमा यद्विष्णोः परमं पदं॥ तात्पर्याभ्यधिकज्ञप्त्या अर्थमेतं पुनर्जगौ॥६॥७॥

प्रासः। संदीपयंति। जानंति ज्ञापयंति वा। विज्ञानैरिति शेषः। करणे ल्युट्। जागृवांसः। प्राप्तजागराः। केते। संसारान्मुक्ता इति शेषः। विपन्यव इ
त्यस्य व्याख्यानं॥ ज्ञानितमा इति। पन स्तुतिरत्र ज्ञानार्थः। ततो युः। नन्वेतादृगर्थः पूर्वस्यामृच्युदित एव। अतः किमर्थं पुनरुच्यत इत्यत आह॥ ता
त्पर्येति॥ सर्वेषामपि देवानामस्मिन्नर्थे तात्पर्याधिक्यमित्यस्यार्थस्य विज्ञप्त्यै। एतमर्थं। विष्णोः सर्वोत्तमत्वादिकं। जगौ। वेदः॥६॥७॥

तीव्राः सोमासः। चतुर्विंशात्मृचमिदं सूक्तं। तत्राद्यवायव्या। यच्छब्दाध्याहारेणैकवाक्यतयाव्याख्याति॥ वीर्यंत इति॥ हे वायो। यइमे। तीव्राः तिग्माः।
आशुकारिणः। वीर्यवत इतियावत्। आशीर्वंतः। आशीरित्याशास्यमानोर्थः। तद्वंतः। तेनसहसाध्यसाधनभाववंतश्च। यजमानेष्टसाधकाश्च।
सुताः अभिषुताः सोमासश्च। सोमाः संति॥ तान्प्रस्थितान्। प्रस्थितनामकान्। त्वदभिमुखेवान्वाप्रति। आगहि। आगच्छ। पिबच॥ १। उभादेवा॥

तीव्राः सोमास आगह्याशीर्वंतश्च सुताइमे॥ वायोतान्प्रस्थितान्पिब॥ १॥ तीव्राः। सोमासः। आ। गहि। आशीःऽवंतः। सुताः। इ
मे। वायो इति॥ तान्। प्रऽस्थितान्॥ पिब॥ १॥ वीर्यवंतश्च ये सोमायजमानेष्टसाधकाः॥ पिबतान्॥ १॥ उभादेवा दिविस्पृशेंद्र
वायूहवामहे॥ अस्य सोमस्यपीतये॥ २॥ उभा। देवा। दिविऽस्पृशा। इंद्रवायू इति। हवामहे। अस्य। सोमस्य। पीतये। सर्वदेवानां ज्ञानाधिक्यो

द्वेऐंद्रवायव्यौ। अत्र दिविस्पृशेति व्याख्याति॥ सर्वदेवानामिति॥ नि धरिणे षष्ठ्येषा। द्यौरितिदीव्यते र्द्युरित्सर्थगत्सर्थस्य वान्द्रूपं। उभयथापिज्ञानस्य वाच
कं। विषयसप्तमी चेयं। तथा च दिविस्पृशात इति दिविस्पृशौ ज्ञानसंबंधिनाविति लभ्यते। देवशब्द सन्निधानसामर्थ्याच्च देवानां मध्यइत्यपि। ज्ञानेनाधि
क्ययोरित्यधिकरणो बहुव्रीहिः। ज्ञानस्याधिक्यमिति तत्पुरुषाद्वा अर्शआदिभ्योच्। आधिक्यग्रहणंनिर्धारणसामर्थ्यलभ्यं। उभौदेवौ।
दिविस्पृशौ। इंद्रवायू। वयं अस्य। सोमस्य। पीतये। हवामहे॥ २॥

त्रीणिपदा॥ प्रथमपादं व्याख्याति॥ वेदानिति॥ विष्णुः त्रीणि। पदा। सर्वाणि। त्रिविधानि पदानि स्वरूपाणि। विचक्रमे। अतिक्रांतः। कानितानि।
वेदांस्त्रीन्कालान्। अतीतानागतवर्तमान्। गुणान्। सत्वादीन्। लोकान्। भूर्भुवःस्वराख्यान्। देवमानुषदानवान्जीवान्॥ चेतनाचेतना
न्मिश्रान्सकलपदार्थान्। तत्रचेतनाः। श्रीर्मुक्ताश्च। अचेतनाः। घटादयः। मिश्राः सात्मकादेहाः। कथं विचक्रम इत्यतउक्तं॥ गोपा इति॥

त्रीणिपदाविचक्रमे विष्णुर्गोपा अदाभ्यः॥ अतो धर्माणि धारयन्॥ ३॥ त्रीणि। पदा। वि। चक्रमे। विष्णुः। गोपाः। अदाभ्यः॥
अतः। धर्माणि। धारयन्॥ ३॥ वेदान्कालान्गुणान्लोकान्देवमानुषदानवान्॥ चेतनाचेतनान्मिश्रांस्त्रीणिपदाविचक्रमे॥ रक्ष
कत्वेन सर्वाणि स्त्रष्टृभर्तृत्वतस्तथा॥ मोक्षदत्वेन च विभुः स्तंभनीयो न केनचित्॥ धारकांश्चैव वाय्वादीन्धारयन्वर्तते ततः॥ ३॥

तदुपलक्षणपरमिति व्याख्याति॥ रक्षकत्वेनेति॥ विभुः। विचक्रम इतिपूर्वेणान्वयश्च। अदाभ्य इत्यस्यार्थमाह॥ स्तंभनीय इति॥ निवारणी
यः। पोरडुपधात्दितिदंभेर्ण्यत्। उत्तरार्धं व्याख्याति॥ धारकानिति॥ यतएवं महामाहात्म्यो विष्णुः। अतः कारणात्। धर्माणि। जगतो धार
कान पिवाय्वादीन्। स एव धारयन्वर्तत इतिशेषः॥ ३॥

ऋतेन। परेण। यौ। ऋतेन। सकलवेदावगतेन। ज्ञानरूपेणवा। परेण। ब्रह्मणा। ऋतवृधौ। ऋते। तस्मिन्नेव ब्रह्मणि। वृधौ। ऋतस्यपती। स
त्यपती। तौमित्रावरुणौ हुवे। परमेश्वरविषये वृद्धिः कादाचित्कीन संभवतीयतः सदेत्युक्तं। ऋतस्यज्योतिष इति सामानाधिकरण्यं। तत्र

ऋतेनयावृतावृधावृतस्य ज्योतिषस्पती॥ तामित्रावरुणाहुवे॥५॥८॥ ऋतेन। यौ। ऋतऽवृधौ। ऋतस्य। ज्योतिषः। प
तीइति॥ ता। मित्रावरुणा। हुवे॥५॥८॥ परेणब्रह्मणातस्मिन्वृधौसत्यपतीसदा॥ सत्यंज्योतिःप्रकाशत्वात्तौमित्रा
वरुणौहुवे॥५॥८॥ वरुणःप्राविताभुवन्मित्रोविश्वाभिरूतिभिः॥ करतान्नःसुराधसः॥६॥ वरुणः। प्रऽअ
विता। भुवत्। मित्रः। विश्वाभिः। ऊतिभिः। करतां। नः। सुऽराधसः॥६॥ संसिद्धान्नकुरुतांनस्तौ॥६॥
सत्यस्यज्योतिष्ट्वं कथमित्यआह॥ सत्यमिति॥ प्रकाशत्वात्प्रसिद्धत्वात्। सत्यमेवहि प्रमाणप्रसिद्धंभवति॥५॥८॥ वरुणः। अत्रोत्तरार्धं
व्याख्याति॥ वरुणः। विश्वाभिः। ऊतिभिः। रक्षाभिः। प्राविता। प्रकर्षेणास्माकं रक्षकः। भुवत्। भवेत्। तथामित्रश्च। किंचतौ। मित्रावरुणौ
नः। अस्मान्। सुराधसः। शोभनसिद्धिमतः। संसिद्धान्। करतां। कुरुतां॥६॥

35

मरुत्वंतं॥ तृचोमरुत्वतीयः॥ अत्रोत्तरार्धंव्याख्याति॥ सगणइति॥ वयं॥ मरुत्वंतं॥ मरुद्भिः सहितं। इंद्रं॥ सोमपीतये॥ आहवामहे॥
आहूतश्च इंद्रः हरिः॥ गणेनमरुद्गणेन॥ सजूः॥ सह॥ सगणः॥ त्वंपतु तृप्यतां॥२॥ इंद्रज्येष्ठाः॥ अत्रपूषरातय इत्यस्यार्थं

मरुत्वंतंहवामह इंद्रमासोमपीतये॥ सजूर्गणेनतृंपतु॥२॥ मरुत्वंतं॥ हवामहे॥ इंद्रं॥ आ॥ सोमऽपीतये॥
सऽजूः। गणेन॥ तृंपतु॥२॥ सगणस्तृप्यतांहरिः॥२॥ इंद्रज्येष्ठामरुद्गणादेवासःपूषरातयः॥ विश्वेममश्रु
ताहवं॥३॥ इंद्रऽज्येष्ठाः॥ मरुत्ऽगणाः॥ देवासः॥ पूषऽरातयः॥ विश्वे॥ मम॥ श्रुत॥ हवं॥३॥ पूषापूर्णत्वतोविष्णुस्त
न्मित्राःपूषरातयः॥३॥
माह॥ पूषेति॥ पुषपुष्टौ॥ समित्रंयेषांतेतन्मित्राः॥ हे इंद्रोज्येष्ठोयेषांत इंद्रज्येष्ठाः। पूषा विष्णुः। रातिर्मित्रंयेषांते पूषरातयः॥ मरु
द्गणाः। सप्तसप्तकाइतिहिबहुवचनं। देवासः। देवाः। विश्वे। सर्वे। मम। हवं। श्रुत॥ शृणुत॥ ॥३॥

हत॥सहसा॥हेस्कदानवः॥दाप् दाने॥अस्मात्ताच्छीलिकोनुः॥अतीवदातुः४॥अतीवदानशीलाः॥स्कराः४॥मरुतः॥सहसाबल
रूपेणबलवता॥बलाभिमानिनाचेंद्रेण॥युजासता॥शक्रेण सहिता इतियावत्॥वृत्रं॥सम्यग्ज्ञाननावरणत्वादज्ञा

हतवृत्रंस्कदानवइंद्रेणसहसायुजा॥मानोदुःशंसईशत॥४॥हत॥वृत्रं॥स्कः॥दानवः॥इंद्रेण॥सहसा॥यु
ईशत। जा।मा।नः।दुःशंसः॥ ॥सहसाबलरूपेणशक्रेणसहिताःसुस४॥मदज्ञानंहतातीवदानशीलानशंकुया
त॥दुर्वात्त्काद्वान्पुमा

नं॥अभ्यर्हितत्वान्मदज्ञानं।हत।नाशयत॥किंच॥दुःशंसोदुष्टशंसनं।दुर्वक्ति।यद्वा।दुष्टःशंसोयस्यासोदुःशंसः।
दुर्वाग्वान्पुमान्नोस्माकंमाईशत॥नशंकुयात्॥अज्ञानमुत्पादयितुंशक्तोनभवेत्॥४॥ ॥

व्यास
९६

इंद्रवायू।अत्रमनोजवाविति व्याख्या॥मनसइति॥जुवतिःप्रेरणार्थः।सौत्रेधातुः।अर्थांतरसमुच्चयार्थश्चशब्दः।मनोजुवौ।मनोवेगि
नौ।सहस्राक्षशब्दं व्याख्याति॥बहुज्ञानाविति॥सहस्रशब्दोऽपरिमितनाम।अक्षशब्देनचतज्जन्यःसाक्षात्कारोलक्ष्यते।एकःसहस्राक्षः
अपरस्मिन्नलक्षणेतिव्याख्यानंमुख्येसंभवत्ययुक्तमितिसेवशब्देनाह।किंचास्मद्व्याख्यानेधियस्पतीइत्येतदपिहेतुत्वेनसंगच्छतइत्याशा
इंद्रवायूमनोजुवाविप्राहवंतऊतये॥सहस्राक्षाधियस्पती॥३॥इंद्रवायूइति।मनःऽजुवा।विप्राः।हवंते।ऊतये।सहस्रऽअक्षा।धि
यः।पतीइति॥३॥मनसःप्रेरकौचैवबहुज्ञौनोधियस्पती॥३॥मित्रंवयंहवामहेवरुणंसोमपीतये॥जज्ञानापूतदक्षसा॥४॥मित्रं।वयं।
हवामहे।वरुणं।सोमपीतये।जज्ञाना।पूतऽदक्षसा॥४॥जज्ञानौविद्यमानौतुयजमानस्यशोधकौ॥४॥
येनाह॥धियस्पतीइति॥मनोजुवौ।सहस्राक्षौ।धियस्पती।इंद्रवायू।विप्राःमेधाविनः।ऊतये।रक्षायैहवंते।आह्वयंति॥३॥मित्रं।
तृचोमैत्रावरुणः।जज्ञानापूतदक्षसेतिपदद्वयंक्रमेणव्याख्याति॥जज्ञानाविति॥वयं।मित्रं।वरुणंच।सोमपीतये।हवामहे।योआ
हूतौ।जज्ञानौ।यज्ञेषुव्यक्तौभवतः।व्यक्तौच।पूतदक्षसौ॥पूतोदक्षोयजमानोयाभ्यांतौतथोक्तौ॥४॥ ॥

जयतामिव ॥ हेनरः ॥ विश्वे देवाः ॥ यत् यदा ॥ शुभ्रं विह्मकं वा युवं वा ॥ प्रति ॥ यथ ना ॥ यूयं ॥ याथ ॥ तदा मरुतां ॥ युष्माकं ॥ तन्यतुः ध्वनिः ॥ तत् ध्वनिः ॥ तेषां युष्माकं ध्वनिः ॥ संग्रामे जयतामिव ॥ धृष्णुया ॥ ञि धृषा प्रागल्भ्ये ॥ त्रसिगृधिधृषिक्षिपेः ॥ क्नुः ॥

जयतामिव तन्यतुर्मरुतामेति धृष्णुया ॥ यच्छुभ्रं याथना नरः ॥ १ ॥ जयतां इव ॥ तन्यतुः ॥ मरुतां ॥ एति ॥ धृष्णुया ॥ यत् ॥ शुभ्रं ॥ याथन ॥ नरः ॥ जयतामिव तत् ध्वनिः ॥ धैर्याद्याति यदा विह्मकं वा युवं वा याथनोत्तमं ॥ १ ॥

ततो भावप्रधानात् तृतीयाः पंचम्या वा सुपां सुलुगित्यादिना यादेशः ॥ धृष्णुत्वेन ॥ धैर्यात् ॥ एति ॥ याति ॥ प्रवर्तते ॥ १ ॥

भास
१८

हस्कारात् ॥ हस्कारशब्दं व्याख्याति ॥ दोषेति ॥ ओहाक् त्यागे ॥ अस्मात् कः ॥ त्यजति दोषानिति हः ॥ स्वेन सह करोति गुणानिति स्कारः ॥ अकारस्य लोपः ॥ हश्चासौ कारश्च हस्कारः ॥ विद्युच्छब्दार्थमाह ॥ विद्युदिति ॥ वि पूर्वाद्द्योततेः क्विप् ॥ ऋचं व्याख्याति ॥ तत्सुता इति ॥ ये सर्वे देवा मरुत

हस्काराद्विद्युतस्पर्यतो जाता अवंतु नः ॥ मरुतो मृळयंतु नः ॥ २ ॥ हस्कारात् ॥ विद्युतः ॥ परि ॥ अतः ॥ जाताः ॥ अवंतु ॥ नः ॥ मरुतः ॥ मृळयंतु ॥ नः ॥ २ ॥ दोषत्यागाद्गुणप्राप्तेः हस्कारो वायुरुच्यते ॥ विद्युद्विशिष्ट ज्ञानत्वाद्भारती तत्सुता हिते ॥ सर्वे देवाश्च मरुतो रक्षंत्वेता दृशो हरिः ॥ तत्तदंतर्गतत्वेन ॥ ॥ २ ॥ ॥

श्च ॥ कैः हस्कारात् ॥ वायोः ॥ विद्युतः ॥ भारत्याश्च ॥ परि ॥ सम्यक् ॥ जाताः ॥ तत्सुता हि ते ॥ अतः सम्यग्जातत्वादेव ॥ नः ॥ अवंतु ॥ रक्षंतु ॥ नः ॥ अस्मान् ॥ मृळयंतु सुखयंतु च ॥ पुनर्न इति तात्पर्यार्थं ॥ हरावेतद्घटयति ॥ एतादृशा इति ॥ हरिरपि ॥ तत्तन्मरुदाद्यंतर्गतत्वेन कारणेन ॥ एतादृशः भारतीवायुपुत्र उच्यते ॥ २ ॥

आपूषन्॥ पौष्णोयंतृचः॥ पूषाघृणिशब्दो व्याख्याति॥ घृणेति॥ आ। समंतात्। घृणयोरसयोयस्यासावाघृणिः। ऋचं व्याख्याति॥ आजेति॥ हे आघृणे। पूषन्। चित्रं विचित्रं। बर्हिः। बृहतेर्वृध्यर्थस्येदंरूपं॥ नानाविधंपूर्णत्वंयस्यासो विचित्रबर्हिः। तंचित्रबर्हिषं। ब्रह्माणं।

आपूषंचित्रबर्हिषमाघृणे धरुणंदिवः॥ आजानष्टंयथापशुं॥ २॥ आ। पूषन्॥ चित्रऽबर्हिषं॥ आघृणे॥ धरुणं॥ दिवः॥ आ॥ अज॥ नष्टं॥ यथा॥ पशुं॥ २॥ पूषा पूर्णत्वतश्चसः॥ आघृणिः पूर्णरश्मित्वाद्राजनश्चित्रबर्हिषं॥ ब्रह्माणं चदिवोदेव्याः भर्तारं वायुमाजगां॥ यथागतं॥ ३॥

त त्वं नः। अस्मान्प्रति॥ आज। अजेरंपरितण्यर्थस्येदंलोटिरूपं॥ गुरुत्वेनागमय॥ दिवः देव्याः भारत्याः। धरुणं धर्तारं। भर्तारं। वायुंच। आज। कमिवनष्टंपशुं॥ गतंगां। यथागमयंति। यद्वा आजेति॥ लिडंतं नः अस्मदर्थेभवान्। आज। आदिकाले प्रसवासीति॥ ३॥

व्यास

२८

विश्वान्॥ वैश्वदेवस्तृचः। अत्रपृश्निमातर इत्यस्यार्थमाह॥ भारतीत्यादिना॥ कथंभारतीपृश्निरुच्यत इत्यत आह॥ गोरूपाचेति॥ पृश्निशब्दो हिगोनामसु पठ्यते। चशब्दो वक्ष्यमाणापेक्षया कचित्काले कार्यविशेषार्थं॥ तत्सुता अखिलाः सुराः। तस्मात्पृश्निमातर

विश्वान्देवान्हवामहे मरुतः सोमपीतये॥ उग्राहिपृश्निमातरः॥ ५॥ विश्वान्॥ देवान्॥ हवामहे॥ मरुतः॥ सोमऽपीतये॥ उग्राः॥ हि॥ पृश्निऽमातरः॥ ५॥ भारतीपृश्निरुच्यते॥ गोरूपाच कचित्साभवत्तत्सुताश्चाखिलाः सुराः॥ अन्यत्रापि सुतास्तस्याः॥ ५॥ ६॥

इतिशेषः॥ किंचान्यत्र वेदाद्यभिमानित्वेपि पृश्निशब्दो वागादिनामापि भवति॥ वयं॥ विश्वान्देवान्। मरुतश्च॥ सोमपीतये॥ हवामहे॥ कुतः॥ हियस्मात्पृश्निर्गोरूपा। वाग्रूपा द्युरूपावा भारतीमातायेषां ते पृश्निमातरो विश्वेदेवाः। उग्राः अप्रसह्याः शत्रु

अंबयः। एता आद्याः। अंस्या ध्यर्धा आग्नेयी सैका। दर्शनात्तु पयस्वानि स्यर्धर्चे आग्नेयः। आप्यश्च। संमाग्नइत्यृक् सर्वदेवत्या। अंबयः अंबा
शब्द पर्यायोंबिशब्दः। अतः अंबयः मातरः। काः। आपः। कुतः। प्रकरणादिति हि शब्दे नाह॥ कथं मातृत्वमपां। जगतः कारणत्वात्। जामयः
सहोदराश्च कस्य जगतः। कथं। यस्मात्ताभिः सह विवर्धते। पार्थिवादि भाग चतुष्टयात्मकं जगद्वर्धमानं अभागेन सहैव वर्धते यस्मात्तस्मा

अंबयो यंत्यध्वभिर्जामयो अध्वरीयतां॥ पृंचतीर्मधुना पयः॥६॥ अंबयः। यंति। अध्वऽभिः। जामयः। अध्वरिऽयतां। पृंचतीः॥
मधुना। पयः॥६॥ अंबयो मातरो ह्यापः कारणत्वात्सहोदराश्च॥ जगतो जामयो यस्मात्सहत्ताभिर्विवर्धते॥ अध्वरं कुर्वतां क्षीरं
सोमं चापि पृंचती४॥ संपृक्ताः॥६॥ ॥टीका॥ सहोदराः। अध्वरीयता मित्यादि व्याख्याति॥ अध्वरमिति। यद्यप्यध

रीयच्छब्दोध्वरमिच्छत आह॥ तथापि तस्यां दशायां सोमसंबंधानुपपत्तेरिच्छया करणमुपलक्ष्याध्वरं कुर्वतामित्युक्तं। क्षीरसोमयोः समुच्चये
चशब्दः। अपिशब्दस्त्वपां विशेषणसमुच्चये। अंबयः जगतो मातरः। जामयः। भगिन्यश्च। अध्वरीयतां। अध्वरमिच्छतां अध्वरं कुर्वतामितियावत्।
मधुना सोमेन सह। पयः क्षीरं सोमं चेत्यर्थः। प्रपृंचतीः। पृचीसंपर्के। प्रपृंचंत्यः। संपृक्ताः आपः अध्वभिः मार्गैः यंति गच्छंति। नद्योनेनाभिप्रेयंते॥६॥

व्यास

अमूः॥ याः। याः। अमूः आपः। उपसूर्ये। सूर्यसमीपे। सूर्यस्य समीपस्थाः। वाशब्दः समुच्चये। सूर्यश्च। याभिः सहवर्तते। अन्योन्यसाहित्योक्तेस्ता
त्पर्यं। सहिता अपि सूर्येण सहिता एव वर्तंते। यद्वा व्याख्यानमेवैतत्। सस्सूर्योपि। ताः आपः। प्रायेण। वर्तंते हीति। ताः नः। अस्मदीयं अध्वरं।

अमूर्या उप सूर्ये याभिर्वा सूर्यः सह॥ ता नो हिन्वंत्वध्वरं॥२॥ अमूः। याः। उप। सूर्ये। याभिः। वा। सूर्यः। सह। ताः। नः। हिन्वंतु।
अध्वरं॥२॥ याः समीपस्थाः सूर्यस्य सहिता अपि॥२॥ अपो देवीरुप ह्वये यत्र गावः पिबंति नः॥ सिंधुभ्यः कर्त्वं हविः४॥३॥
अपः। देवीः। उप। ह्वये। यत्र। गावः। पिबंति। नः। सिंधुऽभ्यः। कर्त्वं। हविः॥२॥ ह्वयामि ता याः पिबंति गावो नः सर्वथा हविः॥ कार्यं नदीभ्यः॥३॥
हिन्वंतु। हिगतौ। वृद्धौ च। गच्छंतु। वर्धयंतु च॥२॥ अपः। ह्वयामि। यत्र। द्वितीयार्थे सप्तम्येषा। याः नः। अस्मदीयाः गावः पिबंतु। ता अपः देवीः अहं।
उपह्वये ह्वयामि। कस्मात्। यतः। नः। अस्माकं। सर्वथा हविः। सोमादिलक्षणं। सिंधुभ्यः। नदीभ्यः। तादर्थ्ये चतुर्थ्येषा। तदुद्देशेन। पंचमी वा। कर्त्वं कार्यं क
त्वार्थे तवैकेन् केन्यत्वन इति त्वन्॥३॥ ६७॥

अप्स्व॑ऽन्तः ॥ तास्वतः । अमृतं । मरणाभावस्य कारणं द्रव्यं । यदुच्यते । तत् । तास्वप्सु । तासामपां । अंतः मध्ये स्थितं । कं पक्षं चित्तमर्थमाह ॥
द्रव्यमिति ॥ यद्वा अमृतं तास्वप्सु स्थितं । कथं ॥ अंतः अंतर्हितं । अदृश्यं । तेन नानुपलंभबाधः । भेषजं । रोगनिवर्तकं च द्रव्यम् वस्थि

अप्स्वं१तरमृतमप्सु भेषजमपामुत प्रशस्तये ॥ देवा भवत वाजिनः ॥ ४ ॥ अप्ऽसु ॥ अंतः ॥ अमृतं ॥ अप्ऽसु ॥ भेषजं ॥ अपां ॥ उत ॥ प्रऽशस्तये ॥ देवाः ॥ भवत ॥ वाजिनः ॥ ४ ॥ तास्वंतर द्रव्यममृतं स्थितं ॥ अपामेव प्रशंसार्थं सहायाः संतु नः स्फुराः ॥ ॥ ४ ॥ ॥ ६७ ॥ ॥

तं । तासामपामुत । अपामेव । प्रशस्तये । प्रशंसार्थं वाजिनः । अन्नवंतः । देवाः स्फुराः । भवत । संतु । पुरुषव्यत्ययः । केवलाद्दैवत्यज्ञापनार्थः ॥ नः सहाया इति शेषः ॥ अपां प्रशंसां कुर्वतां अस्माकं वाङ्मनसादि प्रेरयंत्विति ॥ ॥ ४ ॥ ॥

व्यास

२०

पूषा ॥ जगद्राजं ॥ आघृणिः ॥ पूषा भगवान् ॥ राजानं । जगद्राजं । गुहा । हितं । गुहायां निहितं । तत एवापगूल्हं । स्वकुक्षिगूढमिति यावत् ॥
चित्रबर्हिषं । ब्रह्माणं । स्तुतं । अविंदत् ॥ ४ ॥ उतो समह्यं ॥ मह्यं । उतो । अन्यच्च । सः पूषा । इंदुभिः । सोमैः । तर्पित इति शेषः । मह्यं । मदर्थं ।

पूषा राजानमाघृणिरपगूल्हं गुहाहितं ॥ अविंदच्चित्रबर्हिषं ॥ ४ ॥ पूषा । राजानं । आघृणिः । अपऽगूल्हं । गुहा । हितं ॥ अविंदत् । चित्रऽबर्हिषं ॥ ४ ॥ जगद्राजमविंदद्भगवान् स्तुतं ॥ स्वकुक्षिगूढं ब्रह्माणं ॥ ४ ॥ उतो स मह्यमिंदुभिः षड्युक्ताँ अनुसेषिधत् ॥ गोभिर्यवं न चर्कृषत् ॥ ५ ॥ ३० ॥ उतो इति ॥ सः । मह्यं । इंदुऽभिः । षट् । युक्तान् । अनुऽसेसिधत् । गोभिः । यवं । न । चर्कृषत् ॥ ५ ॥ मह्यं सोमैश्च तर्पितः ॥ साधयामास षड्युक्तानींद्रियाणि चकार च ॥ साधनं शक्तिदानं तु गोभिर्वाभिर्यथा वै यवं ॥ ५ ॥ ३० ॥ श्रीः

षट् इंद्रियाणि । युक्तान् । अर्थैः सनिकृष्टानि । अनुसेषिधत् । साधयामास । अनुदात्तत्वं छांदसं । चर्कृषत् । चकार च । यं ङुः गंताच्छेदः । किमिव । गोभिः । वाग्भिः । यवं । न । यवं यथा कुर्वंति साधयंति च । करणातिरिक्तं साधनं किमित्यत आह ॥ साधनमिति ॥ साधनं विसन्वयः ॥ ५ ॥ ३० ॥

आपः पृणीत ॥ अत्र वरूथशब्दार्थमाह ॥ वरूथमिति ॥ उत्तरार्धं व्याख्याति ॥ ज्योतिरिति ॥ सूर्यशब्दं विष्णोर्निर्वक्ति ॥ सूरीति ॥
तृतीयांत सूरिशब्दोपपदाद्यातेः कर्मणि कः ॥ सूरिशब्दात्तृतीया सामर्थ्यात्प्राप्यार्थेवातधितोयः ॥ पृणीतेरस्य धातुं पठति ॥ पृ

आपः पृणीत भेषजं वरूथं तन्वे३ मम ॥ ज्योक् च सूर्यं दृशे ॥ १ ॥ आपः ॥ पृणीत ॥ भेषजं ॥
वरूथं ॥ तन्वे ॥ मम ॥ ज्योक् ॥ च ॥ सूर्यं ॥ दृशे ॥ १ ॥ वरूथं गुप्तिरुद्दिष्टा ज्योतिर्विष्णु
विष्णुः दृशेन तथा ॥ सूरिप्राप्योयतो देवः सूर्य इत्यभिधीयते ॥ पृ णदाने ॥ १ ॥

णदान इति ॥ सूरीति ॥ हे ॥ आपः ॥ मह्यं ॥ भेषजं ॥ पृणीत दत्त ॥ मम ॥ तन्वे शरीराय ॥ षष्ठ्यर्थे चतुर्थी ॥ वरूथं गुप्तिं च दत्त ॥ भे
षजस्यैव चैतद्विशेषणं ॥ सूर्यं ॥ विष्णुं ॥ दृशे ॥ द्रष्टुं ॥ दृशे विख्ये चेत्यव्ययं ॥ यद्वा सूर्यमिति षष्ठ्यर्थे ॥ दृश इति चतुर्थी ॥ विष्णु
दृशे ॥ ज्योक् ज्योतिः ॥ ज्ञानं च ॥ पृणीत ॥ १ ॥

इदमापः ॥ अखिलं ॥ हे आपः ॥ यत्किंच ॥ मयि दुरितं ॥ इदं नः ॥ अस्माकं ॥ अखिलमपि पापं प्रवहत अपनयत ॥ किं तत् ॥ अहं ॥ यत् ॥ अभिदुद्रोह
वा ॥ हिं — जमित्यर्थः ॥ यद्वा ॥ शेपे ॥ शेपशब्दोत्र शेफ पर्यायः ॥ निमित्तसप्तम्येषा ॥ शेफजं ॥ उतानृतं ॥ अनृतसंभवं च ॥ तत्सर्वं प्रवहतैव ॥
वाशब्द उतशब्दश्च समुच्चये ॥ २ ॥ आपः ॥ रसेन ॥ हे आपः ॥ अद्य वयं ॥ यस्मात् ॥ वः ॥ अन्वचारिषं ॥ एकवचनं बहुवचनार्थे च ॥ वोऽनुचरा

इदमापः प्रवहत यत्किंच दुरितं मयि ॥ यद्वाहमभिदुद्रोह यद्वा शेप उतानृतं ॥ २ ॥ इदं ॥ आपः ॥ प्र ॥ वहत ॥ यत् ॥ किं ॥ च ॥ दुः ऽ
इतं ॥ मयि ॥ यत् ॥ वा ॥ अहं ॥ अभि ऽ दुद्रोह ॥ यत् ॥ वा ॥ शेपे ॥ उत ॥ अनृतं ॥ २ ॥ अखिलं प्रापमापः प्रवहतापिनः ॥ हिंसाजं पाप
जं चैव तथैवानृतसंभवं ॥ २ ॥ आपो अद्यान्वचारिषं रसेन समगस्महि ॥ पयस्वानग्न आगहि तं मा संसृज वर्चसा ॥ ३ ॥ आपः ॥
अद्य ॥ अनु ॥ अचारिषं ॥ रसेन ॥ सं ॥ अगस्महि ॥ पयस्वान् ॥ अग्ने ॥ आ ॥ गहि ॥ तं ॥ मा ॥ सं ॥ सृज ॥ वर्चसा ॥ ३ ॥ रसेन संगताश्च स्मो यस्मा सं
अग्रस्म हि ॥ तस्मात् ॥ रसेन ॥ सुखेन ॥ समगस्महि ॥ संगताः स्मः ॥ हे अग्ने ॥ अग्निं च विश्वशंभुवमित्युक्तः ॥ पयस्वान् ॥ अद्भिः सहितः ॥ आगहि ॥
अस्मानागच्छ आगच्छ स्व च ॥ तं ॥ एवंस्त्कवंतं ॥ मां ॥ वर्चसा ॥ तेजसा ॥ संसृज ॥ संयोजय ॥ ३ ॥

संमाग्ने॥ हे अग्ने। मा। मां वर्चसा। संसृज। संयोजय। प्रजया च। संसृज। आयुषा च। संसृज। उत्तरार्धं व्याख्याति॥ कुर्युरिति॥ अनेन विद्यु
रित्यंतर्णीतण्यर्थस्य रूपं। अस्य म इति। द्वितीयार्थे षष्ठ्या विस्फक्कं भवति॥ देवाः अग्न्याद्याः। अस्य मे। एतं मां विद्युः विद्वांसमपि कुर्युः।
ऋषिभिः सह। इंद्रश्च। मां विद्यात्। वेदयेत्। प्रकारांतरेण व्याख्याति॥ मदर्थमिति॥ अनेन ये देवाः सर्वे विद्युः। यश्चेंद्रः। सर्वं। विद्यात्। ते। सर्वे

संमाग्ने वर्चसा सृज सं प्रजया समायुषा॥ विद्युर्मे अस्य देवा इंद्रो विद्यात्सह ऋषिभिः॥ ४॥ सं। मा। अग्ने। वर्चसा।
सृज। सं। प्रऽजया। सं। आयुषा। विद्युः। मे। अस्य। देवाः। इंद्रः। विद्यात्। सह। ऋषिऽभिः॥ ४॥ कुर्युर्मामपि विद्वांसं
मदर्थं सर्वदा सुराः॥ एतं मामिति वार्थः स्यादनुजानंतु वोदितं॥ ४॥ ॥३२॥ ८

सह। ऋषिभिः। सुराः। अस्य। मे। संतु। सर्वदा मदर्थं संतु। ममोपकारकाः संति स्फक्कं भवति। प्रकारांतरेण व्याचष्टे॥ एतमिति॥
अनेन षष्ठ्यो॥ द्वितीयार्थे। विद्युरिति तु यथास्थितमेव स्फक्कं भवति॥ देवा अग्न्याद्याः। अस्य मे। एतं मां। कृपापात्रं। विद्युः जानीयुः। ज्ञात्वा
च कृपां कुर्युरिति यावत्। इंद्रश्च। सह। ऋषिभिः विद्यात्। प्रकारांतरेण व्याख्याति॥ अनुजानंत्विति॥ अनुमोदंतामित्यर्थः। अत्र देवाः। अस्य मे।
उदितं विद्युरिति योज्यं॥ ४॥ ३२॥ ८

व्यास
२२

अप्सु मे॥ पूर्वस्यामृचि कथितमेवात्र कस्मात्कथ्यते॥ अप्सु विश्वानि भेषजानीत्युक्त्वा पुनश्च आपश्च विश्वभेषजीरिति किम
र्थमुच्यत इत्यत आह॥ तात्पर्यार्थमिति॥ प्रमाणोपन्यासाद्यर्थत्वेनापि अपुनरुक्तिरिष्टव्या। अग्निं च विश्वशंभुवमित्यस्यार्थमाह॥ रू

अप्सु मे सोमो अब्रवीदंतर्विश्वानि भेषजा॥ अग्निं च विश्वशंभुवमापश्च विश्वभेषजीः॥ ५॥ ३३॥ अप्ऽसु॥ मे॥
सोमः॥ अब्रवीत्॥ अंतः॥ विश्वानि॥ भेषजा॥ अग्निं॥ च॥ विश्वऽशंभुवं॥ आपः॥ च॥ विश्वऽभेषजीः॥ ५॥
३३॥ तात्पर्यार्थं पुनर्वाक्यं सुखाधारो हुताशनः॥ ५॥ ३३॥

खाधार इति॥ सोमो राजा॥ इदं मे अब्रवीत्॥ किं अप्स्वंतः भेषजानि संतीति॥ किं च। विश्वशंभुवं॥ पूर्णसुखभूमिं॥ अग्निं च॥ अ
प्स्वंतः स्थितमब्रवीत्॥ आपश्च विश्वभेषजीः॥ विश्वानि भेषजानि यासु ताः विश्वभेषजीः॥ केवलं मामके ईदृशीः (ति)॥ इत्यब्रवीत्॥ यद्वा स
कलभेषजरूपा एवेत्यब्रवीत्॥ ५॥ ३३॥

आपः पृणीत॥अत्र वरूथशब्दार्थमाह॥वरूथमिति॥उत्तरार्धं व्याख्याति॥ज्योतिरिति॥सूर्यशब्दं विगृह्य निर्वक्ति॥सूरीति॥
तृतीयांतसूरिशब्दोपपदाद्यातेः कर्मणि कः॥सूरिशब्दात्तृतीयासामर्थ्यात्प्राप्यार्थे वा तद्धितो यः॥पृणीतेरस्य धातुं पठति॥पृ

आपः पृणीत भेषजं वरूथं तन्वे३ मम॥ज्योक्च सूर्यं दृशे॥१॥आपः॥पृणीत॥भेषजं॥
वरूथं॥तन्वे॥मम॥ज्योक्॥च॥सूर्यं॥दृशे॥१॥वरूथं गुप्तिरुद्दिष्टा ज्योतिर्विष्णु
विष्णुः दृशेश्च तथा॥सूरिप्राप्यो यतो देवः सूर्य इत्यभिधीयते॥पृण दाने॥१॥

पृण दान इति॥सूरीति॥हे॥आपः॥मह्यं।भेषजं।पृणीत दत्त।मम।तन्वे शरीराय।षष्ठ्यर्थे चतुर्थी।वरूथं गुप्तिं च दत्त।भे
षजस्यैव चैतद्विशेषणं।सूर्यं।विष्णुं।दृशे।द्रष्टुं।दृशे विख्ये चेत्यव्ययं।यद्वा सूर्यमिति षष्ठ्यर्थे।दृश इति चतुर्थी।विष्णु
दृशे।ज्योक् ज्योतिः।ज्ञानं च।पृणीत॥१॥

इदमापः॥अखिलं॥हे आपः।यत्किंच।मयि दुरितं।इदं नः।अस्माकं।अखिलमपि पापं प्रवहत अपनयत।किं तत्।अहं।यत्।अभिदुद्रोह
वा।हिं–जमित्यर्थः।यद्वा।शेपे।शेपशब्दोत्र शेफपर्यायः।निमित्तसप्तम्येषा।शेफजं।उतानृतं।अनृतसंभवं च।तत्सर्वं प्रवहतैव।
वाशब्द उतशब्दश्च समुच्चये॥२॥आपः।रसेन।हे आपः।अद्यवयं।यस्मात्।वः।अन्वचारिषं।एकवचनं बहुवचनार्थे च।वोऽनुचरा

इदमापः प्रवहत यत्किंच दुरितं मयि॥यद्वाहमभिदुद्रोह यद्वा शेप उतानृतं॥२॥इदं।आपः।प्र।वहत।यत्।किं।च।दुः
इतं।मयि।यत्।वा।अहं॥अभि॰दुद्रोह।यत्।वा।शेपे।उत।अनृतं॥२॥अखिलं प्राप्यमापः प्रवहतापिनः॥हिंसाजं पापु
जं चैव तथैवानृतसंभवं॥२॥आपो अद्यान्वचारिषं रसेन समगस्महि॥पयस्वानग्न आगहि तं मा सं सृज वर्चसा॥३॥आपः॥ सं
अद्य॥अनु।अ चारिषं।रसेन।सं।अगस्महि।पयस्वान्।अग्ने।आ।गहि।तं।मा।सं।सृज।वर्चसा॥३॥रसेन संगताश्चस्मोयस्मा
अभूम।हि।तस्मात्।रसेन।स्वरेण।समगस्महि।संगताः स्मः।हे अग्ने।अग्निं च विश्वशंभुवमिस्कन्दः।पयस्वान्।अद्भिः सहितः।आगहि।
अस्मानागच्छ आगच्छस्व च।तं।एवंस्कवंतं।मां।वर्चसा।तेजसा।संसृज।संयोजय॥३॥

कस्यनूनं॥पंचदशर्चमिदं सूक्तं।प्रजापतेरियमृक्॥कतुरित्यादिना विष्णो॥ताव द्योजयति॥इंद्राश्चेदत्र विवक्षितस्तद्देवं योज्यं इतिशेषः॥वयं।
कस्य।करोतेर्डुः।कर्तुः।अमृतानांस्फुराणांमध्ये।कतमस्यस्फुरवतमस्य।परानंदंतनोः।देवस्य।विष्णोः।चारु।भद्रं।नामनूनं।इदानीं।मनामहे।अत्रयंधातुः

कस्यनूनंकतमस्यामृतानांमनामहेचारुदेवस्यनाम॥कोनोमह्याअदितयेपुनर्दात्पितरंचदृशेयंमातरंच॥३॥कस्य।नूनं।कतमस्य।
अमृतानां॥मनामहे॥चारु।देवस्य।नाम।कः।नः।मह्यै॥अदितये।पुनः।दात्।पितरं।च।दृशेयं।मातरं।च॥३॥कर्तुः परानंदतनो
रिदानींमनामहेचारुविष्णोःस्फुराणां॥नामेंद्राश्चेदिंदिरायैपुनर्दाद्दृशेयंतांमातरंतंचदेवं॥समुक्तानाममृतानामजेंद्रमुख्या
नांनत्वाभ्यधिकोयस्फुरवादो॥तेनोक्तोसौकतमः॥   ॥७॥टीका॥द्युत्वारख्याद्यर्थेवर्तते।सः।कः।नः।अस्मान्॥

मह्यै अदितये।इंदिरायै।पुनर्दात्दद्यात्।ततश्चपितरंतं।देवं।मातरं।तांदेवींच।दृशेयं।पश्येयं।अमृतानां।कतमइत्येतत्प्रकारां
तरेणव्याख्याति॥सइति॥अमृतानामित्यनुवादेन मुक्तानामितिव्याख्यानं।मुक्तानां सकाशात् इतिशेषः।स्फुरवादाविसनेनकशब्दोन्येषा
मणिगुणानामुपलक्षणार्थइत्याचष्टे॥७॥

व्यास

प्राङ्मह्या अदितयइतींदिराविषयंव्याख्याती॥इदानींपरमेश्वरविषयंचभवतीसैशायेननिर्वक्ति॥अखंडितत्वादिति॥दोऽवखंड
ने॥अस्माकंर्णिक्किन्॥ततोनञ्समासः॥यस्मान्महती॥तस्मान्महीस्त्रीरूपःसइत्यर्थः॥महत्वमखंडितत्वंचैकमेव॥अतः
पुनरुक्तिंपरिहरति॥देशानंत्यादिति॥अखंडितत्वमितिसंबंधः॥द्वितीयश्चोवधारणे॥पितरंमातरंचेतिव्यधिकरणंप्राग्व्या

अखंडितत्वात्सचादितिर्महतीतन्महीच॥देशानंत्यात्तन्महित्वंगुणैःस्फ कालाद्योक्तंतस्याचाखंडितत्वं॥सएव
माताच पिताचदेवस्तस्मिन्सदासंस्थितास्तत्सुनर्दात्॥अत्तिविश्वंतेन चैवादितिःसा॥७॥   ॥   ॥

ख्यातं॥इदानींद्वयमपिपरमेश्वरविषयंचेत्याह॥सएवेति॥पुनःशब्दस्यतात्पर्यमाह॥तस्मिन्निति॥यस्मात्सदातस्मिन्
स्थिताःपुनर्दादित्स्फक्तमिमित्यर्थः।अदितशब्दंविष्णोप्रकारांतरेणव्याख्याति॥अत्तीति॥अदेकर्तरिक्तिन्।जघ्धादेशाभावश्छांद
सइडागमश्च।सर्ववाचीतिश्रुतेरनुसरणीयइत्येवशब्देनाचष्टे॥७॥

मह्या अदितयइतींदिरा विषयमुक्तं ॥ तत्केन निर्वचनेनेत्यत आह ॥ श्रीर्वेति ॥ वाशब्दश्चशब्दार्थे ॥ श्रीश्चानेन निर्वचनेन मही चादितिश्चो
क्तेत्यर्थः ॥ विष्णावुक्तं व्याख्याय प्रजापतावपि व्याख्याति ॥ ब्रह्मेति ॥ ब्रह्माप्येवं कर्तृत्वादिना कइत्यादिशब्दैः प्रोक्तः ॥ रूढश्चासौ शब्दस्तस्मि
न्नित्याह ॥ क एवेति ॥ नन्वष्टतारतम्ये नांकतमस्येत द्ब्रह्मणि न युज्यते ॥ विष्णुरमात्वस मानेभ्यो धिकत्वाभावादित्यत आह ॥ गुणाश्चेति ॥ जीवेभ्यः

श्रीर्वा ब्रह्मा प्रोक्त एवं क एव ॥ गुणाश्च तस्याभ्यधिकाः सदैव जीवेभ्यस्त्त्सोपि तद्वाक्ययोग्यः ॥ ददात्वसौ विष्णुर्वेंचेदिश
ये प्राप्तानस्मानपि तो सर्वगत्वात् ॥ विशेषदेशप्राप्तितस्तस्याभिव्याप्तिः वैकुंठादिलोक उक्तो हरेश्च ॥ ९ ॥

स्वसमानव्यतिरिक्तेभ्यः ॥ तत्तस्मात् । उत्तरार्धं ब्रह्मणि योजयति ॥ ददात्विति ॥ पुनः शब्दतात्पर्यमाह ॥ प्राप्तानिति ॥ तयोः सर्वगतत्वा
त्तौ प्राप्तानस्मान्पुनर्ददातु ॥ कथं ददातु कथं तर्हि प्रार्थनमित्यत आह ॥ विशेषेति ॥ चतुर्थ्यर्थे तसिः । तस्य सर्वगतस्य प्राप्तिः प्रार्थ्यत इति विशेषः ॥ को
सौ विशेषदेश इत्यत आह ॥ वैकुंठादिरिति ॥ उक्तो विशेषदेशत्वेन । हरेश्च । सर्वगतस्यापि हरेर्व्यक्तिस्थानत्वादित्यर्थः ॥ ९ ॥

व्यास

२४

व्याख्यातामेधातिथिदृष्टा ऋचः । व्याचिख्यासितानामृषिमाह ॥ शुनःशेप इति ॥ परं । उत्तमं । यद्वा अत उत्तरं । न्यूनं । शतं परं त्रयं चेत्यूनशतं । सूपा
दित्यादिना ॥ हरिश्चंद्रो ह वै वेधस इति ब्राह्मणोक्तां कथां स्मारयति ॥ तच्च उत्तमं वरुण पाशमित्यादेः सूक्तबोधत्वाय । एवं सति कस्य नूनमित्यादीनामपि शुनः
शेपदृष्टत्वं प्रसक्तमित्यत उक्तं । उत्तरं परमिति ॥ तद्विवृणोति ॥ न्यूनमिति ॥ इह । कस्य नूनमित्याद्याया मानुष्यर्चां । न्यूनमेव शतमस्ति । अन्यत्र
यं । चतुर्थे । पंचमेऽपि मंडलेऽस्ति । अतो नत्वमग्ने प्रथमइत्यादीनां शुनःशेपदृष्टत्वं । नापि तस्य शतार्चित्व हानिः । ननु कस्मादेवं कल्प्यते । शुनःशेपदृ

शुनःशेपो ददर्शाति उत्तरं परमं कशतं ॥ सूपादात्म विमोक्षाय स्तुवन्देवान्पृथक्पृथक् ॥ न्यूनं शतमि
हैवान्यच्चतुर्थे पंचमेपि च ॥ मंडले ब्राह्मणोक्तस्तु ऋमो त्रापि ह्यचांभवेत् ॥ ७ ॥ ॥ ॥

नीं न्यूनमेव शतं दृष्टवानित्युक्तं । शतर्चित्वं सामीप्यादुच्यत इत्यत आह ॥ ब्राह्मणोक्तस्त्विति ॥ ब्राह्मणेऽरवलेकस्मिन्काले देशे ऽवस्थायां च शुनः
शेपस्यान्यूनऋक्शतदर्शनं सप्रजापतिमेवेत्यादिनोक्तं । स ब्राह्मणोक्तोह्यचांक्रमोत्राप्यनुसर्तव्यो भवेत् । अन्यथा तद्विरोधः स्यात् । अथवात्रापि
न्यूने शतेपि ब्राह्मणोक्त एव क्रमो भवेत् । न तु यथाश्रुतः । तथाहि ॥ षड्भिर्धिसस्यसोम पाइत्यादिकाभिरिद्रे अश्विनौ तुष्टावित्युक्तत्वायां विमुक्तपाशः शुनः
शेपमधिकृत्य ब्राह्मणं । तमृत्विज ऊचुस्त्वमेव नोस्यान्हः संस्थामधिगच्छेत्यादिना त्रयं च ग्रावेत्यादीनां स्फुटं तत्स्वरत्वमवगम्यत इति ॥ ७ ॥

अभि त्वा । सावित्रोयं तृचः । तत्र कः सविता । विष्णुरेव मुख्यतः । कथं तर्हि तमग्निरुवाच सविता वै प्रसवानामीशे तमेवोपधावेति स सवितारमुपससाराभि त्वा देव सवितरित्येतेन तृचेनेति ब्राह्मणमित्यत आह ॥ सवितेति ॥ सूं जगत्कारणमिति सवितृशब्दप्रवृत्तिनि मित्तं । वीर्याणामीशानमित्यस्यार्थमाह ॥ वित्तानामिति ॥ वित्तं कथं वार्यशब्दमित्यत आह ॥ वार्यं हीति ॥ वरणीयत्वात् । अव द्यपण्ये त्यपाधेरविवक्षितत्वाद्वह लोण्यदिति भवत्येवेति हे रर्थः ॥ शिष्टं व्याख्याति ॥ रक्षन्निति ॥ हे सवितः । देव । सदा । नित्यं । अवन् । रक्ष

अभि त्वा देव सवितरीशानं वार्याणां ॥ सदावन्भागमीमहे ॥ ३ ॥ अभि । त्वा । देव । सवितः । ईशानं । वार्याणां । सदा । अवन् । भागं । ईम हे ॥ ३ ॥ सवितस्सपरं रूपं जगत्कारणमीशितुः ॥ वित्तानामीश्वरं तं तु वीर्यं हि वरणीयतः ॥ वित्तं रक्षन्नवन्नित्यस्मात्मानं भागमेम्य हं ॥ तामैश्वर्यादिसमितिः ॥ ३ ॥

न्नकं । आत्यहितिवादात्मानं । अहं ॥ वार्याणां । वित्तानां । ईशानं । स्वामिनं । भागं ॥ भागः । ऐश्वर्यादयो गुणाः । ते यस्य स भागः । ऐश्वर्यादि सम्पत्तिरूपं त्वा । त्वां । अभीमहे ॥ अवन्नित्येकवचनादेतदप्येकवचनार्थं । एमि । आत्मानं रक्षितुं । त्वां शरणं गच्छामि । मध्यध्यवन्नित्येतत्सं बुध्यं तं व्याख्यातुं शक्यते तथापि साक्षात्संयोजनो । क्लिलाभायवचनव्यत्यासेन व्याख्यातं लक्षणहेत्वोः क्रियाया इति स्मरणात् ॥ ३ ॥ ॥ ६ ॥

व्यास २५

यश्चित्त ॥ योपि ॥ हे देव ॥ वित्सो ॥ इत्था ॥ अविकारित्वेनेत्थंभूतः ॥ इदानीं तनप्रकारत्वस सर्वदा ॥ शश्वमानः ॥ शश्वदः स्वखवाची ॥ द्विर्वच नमतिशयार्थं ॥ अधिकं स्वखं ॥ शश्वं ॥ तन्मन्यते नु भवतीति शश्वमानः ॥ स्वखाधिक इति यावत् ॥ निदः नेदीयसः । परस्माद्ब्रह्म

यश्चिद्धि त इत्था भगः शश्वमानः पुरा निदः ॥ अद्वेषो हस्तयोर्दधे ॥ ४ ॥ यः ॥ चित् ॥ हि ॥ ते ॥ इत्था ॥ भ गः ॥ शश्वमानः ॥ पुरा ॥ निदः ॥ अद्वेषः ॥ हस्तयोः ॥ दधे ॥ ४ ॥ योपि ते परमो भागः । इत्थंभूतो ऽविकारित्वाच्छश्वमा नः स्वखाधिकः ॥ नेदीयसो ब्रह्मणोपि पूर्वो द्वेषादिवर्जितः । हस्तयोस्तं दधे देव तव रूपं । नाभयं ॥ ६ ॥

णः ॥ हिरण्यगर्भादपि ॥ पुरा पूर्वः । अद्वेषः ॥ उपलक्षणमेतत् ॥ द्वेषादिवर्जितः ॥ एवंभूतो यश्चित् योपि भागः परमैश्वर्यादिरूपो विग्रहः ॥ तवानामयं रूपं ॥ तं ॥ अहं ॥ हस्तयोः ॥ दधे ॥ पुत्र इव पितरं ॥ ६ ॥

निद इत्यव्ययं क्वचित्सामीप्ये व्याख्यातं निदस्तस्य समीपगा इति ॥ अत्र दूरत्वे ॥ तत्कथमेतदित्यत आह ॥ निद इति ॥ यथा आराच्छब्दो विरुद्धा
र्थद्वयवाची ॥ तथैतावपि प्रत्येकं विरुद्धार्थद्वयस्याभिधायकौ ॥ मूलं विभुजादित्वात्कः ॥ तदिदमुक्तमुभावपीति ॥ विरुद्धार्थद्वयाभिधायित्वस्यैव
विवरणं दूरसामीप्यवचनाविति ॥ दूरेति भावप्रधानं ॥ महोदधौ ॥ नाममहोदधिनामके ग्रंथे ॥ कथितमेतदिति शेषः ॥ एवं विश्वप्राचं च व्या

निदो दवीय इत्यास्तु विरुद्धार्थद्वयाभिधौ ॥ दूरसामीप्यवचनावुभावपि महोदधौ ॥ यदान्यः सविता
देवस्तव स्वामी भगो हरिः ॥ अद्वेषो विष्णुरित्युक्ते त्वमहं हस्तयोर्दधे ॥ ४ ॥ ३३ ॥ ॥

ख्याय देवतांतरे व्याख्याति ॥ यदेति ॥ अत्र विवक्षितस्तदेवं योजनेति शेषः ॥ हे सवितर्देव ॥ यश्चित्तयोपि ॥ ते तव ॥ स्वामी ॥ इत्था ॥ शश्वमा
नः ॥ निदः पुरा ॥ भगः ऐश्वर्यादिरूपः ॥ अद्वेषः ॥ हरिः ॥ तम् ॥ अहम् ॥ हस्तयोर्दधे ॥ इति ॥ कुत एषां विशेषणानां विष्णुविषयत्वमित्यत आह ॥
अद्वेष इति ॥ ग्रंथांतरे अद्वेषो विष्णुरित्यद्वेषत्वस्य विष्णुलिंगत्वोक्तेः ॥ निर्विकारित्वादेरपि विष्णुलिंगत्वे वचनान्युदाहर्तव्यानि ॥ ४ ॥ ३३ ॥

व्यास २६

अग्नेर्वयं ॥ आग्नेयीयं ॥ तस्याः स्पष्टत्वादभिधेयमाह ॥ तस्यैवेति ॥ उक्तं ॥ अस्यामृचि ॥ कथं तर्हि तं प्रजापतिरुवाच ॥ अग्निर्वै देवानां नेदिष्ठस्तमे
वोपधावेति ॥ सोऽग्निमुपससाराग्नेर्वयं प्रथमस्यामृतानामित्येतयर्चेति ब्राह्मणमित्यतः स एवाग्न्याख्य उक्त इत्युक्ते तस्यैवान्यद्रूपमित्युक्तं किंत

अग्नेर्वयं प्रथमस्यामृतानां मनामहे चारु देवस्य नाम ॥ स नो मह्या अदितये पुनर्दात्पितरं च दृशेयं मातरं च ॥ २ ॥ अग्नेः ॥
वयं ॥ प्रथमस्य ॥ अमृतानां ॥ मनामहे ॥ चारु ॥ देवस्य ॥ नाम ॥ सः ॥ नः ॥ मह्यै ॥ अदितये ॥ पुनः ॥ दात् ॥ पितरं ॥ च ॥ दृशेयं ॥ मातरं ॥ च ॥
॥ २ ॥ तस्यैवान्यद्रूपमस्याख्यमुक्तं यो यज्ञेष्विज्यते जामदग्न्यः ॥ स देवानां प्रथमो नाम तस्य स्मृतं सार्थं सर्वकामप्रदं स्यात् ॥ २ ॥ ७ ॥

रूपमित्यत आह ॥ यज्ञ इति ॥ यज्ञे गोऽइज्यत इत्यनेनाग्न्यादिशब्दानां प्रवृत्तिनिमित्तमुक्तं ॥ अमृतानां प्रथमस्येति व्याचष्टे ॥ स इति ॥
नन्वत्र पूर्वत्र च नाम मनामह इति हेतुः ॥ कोनः ॥ स न इति फलं प्रार्थ्यते ॥ तदयुक्तं ॥ नामस्मरणादिमात्रस्य स्वर्गादिप्राप्तिसाधनत्वस्याप्र
माणविरुद्धत्वादित्यत आह ॥ नामेति ॥ यद्वा चारुत्वस्योपपादनमेतत् ॥ २ ॥

नहिते॥इतः पराएवत्रिंशाद्वरुणदेवताः।क्षतात्त्राणं॥हे वरुण॥ते क्षत्रं॥प्रजानां।क्षतात्।हानेः।त्राणं।वयश्चन।विशब्दो विशिष्टवाची।च
नशब्दोऽप्यर्थः॥विशिष्टा अपि।अमी।परोक्षाः।ये मुक्तिगाः।तेपि।नापुर्हि।तथाते सहः बलं चे।नापुः।मन्युं।मन्।अवबोधन इत्यस्येदं रूपं संवि

नहि ते क्षत्रं न सहो न मन्युं वयश्चनामी पतयंत आपुः॥नेमा आपो अनिमिषं चरंतीर्न ये वातस्य प्रमिनंत्यभ्वं॥३॥नहि॥ते॥
क्षत्रं॥न।सहः।न॥मन्युं॥वयः॥चन॥अमी इति॥पतयंतः॥आपुः।न।इमाः।आपः।अनिमिषं।चरंतीः॥न।ये।वातस्य।प्रऽमिनंति॥
अभ्वं॥३॥१४॥क्षतात्त्राणं ते बलं संविदं च पूर्णं नापुर्मुक्तिगा ये विशिष्टाः॥अपि स्वयं संस्तेरुस्संततः पतयंतोऽन्यांश्छिष्यभक्ताननुदाराः॥

दं च॥नापुः।क्रोधस्य गुणत्वाभावात्।तदीय क्षत्रादि सदृशक्षत्रादिमंतो मुक्ता अपि न भवंतीत्यर्थः॥प्रमाणबाधपरिहारार्थमुक्तं॥पूर्णमिति॥किंच
ये॥पतयंतः।स्वार्थेणिच्।स्वयं संस्तेरुस्संततः।जीवन्मुक्ताः।तेपि नापुः।यद्वा हेतुमति णिच्।अन्यांश्छिष्यभक्तान्।संस्तेः पतयंतः उद्गमयंतः ये उदाराः
आचार्याः।तेपि।नापुः॥७॥ ॥

व्यास
२७

किंच।अनिमिषं।सदा।चरंतीः।शुभान्याचरंतः॥इमाः आपः।इमे प्रसिद्धा देवा अपि।नापुः।अप्शब्दस्य सर्वदेवतावाचित्वं कुत इत्यत आ
ह॥आप इति॥यत्।यस्मात्।आपो वै सर्वा देवता इति श्रुतिरस्ति तस्मादुक्तं युक्तमिति॥अप्शब्दः सर्वदेवतावाचित्वेन व्याख्यातः।तद्विशेषवाचित्वे
नापि द्विधा व्याख्याति॥अब्देवता इति॥अबभिमानदेवताः।गंगाद्या नद्यो वा।आप इत्युक्ताः॥किंच।ये देवसंघाः।वातस्य।वायुदेवस्य।वि

सदा शुभान्याचरंतोपि देवा अब्देवता आप इति श्रुतिर्यत्॥गंगाद्या वा वायुदेवस्य वि
ष्णोरुत्पत्तिं ये जानते देवसंघाः॥वयः सुपर्णा इति वापि॥३॥ ३४॥

ष्णोः।पंचम्येषा॥अभ्वं॥उत्पत्तिपर्यायोयं॥उत्पत्तिं।प्रमिनंति।जानते॥तेपि महाज्ञानाः।नापुः॥वायुदेवस्येत्यनुवादे
न विष्णोरिति व्याख्यानं वा॥उत्पत्तिं प्राडुर्भावं॥वय इत्यस्यानुवादेन सुपर्णा इत्यपि चेति व्याख्यानांतरं॥३॥ ३४॥

अबुध्नेराजा॥अबुध्नेप्रकारान्तरतः॥पूतदक्षः।वरुणः।राजा॥अबुध्नेबुध अवगमने।क्विप्।तत्प्रतिषेधोबुध्नं।नञः परनिपातादिष्णंदसं॥
तस्याप्रतिषेधः।अबुध्नं।तृतीयर्थेसप्तमी।प्रकारान्तरतः।ज्ञानेनज्ञानपूर्वं।वनस्य।वनषणसंभक्तौ।पचाद्यच्।स्वंसंभजतः।स्वात्मान्यसेवमानाय।ऊ
र्ध्वउच्चैः।स्तूपं।स्थानं।उत्तमस्थानं।ददते।ददद्दाने।किंच।येनीचीनाः।नीचस्थाः।पुरुषाः।तेपि।तेन।वरुणेनसेवितेननिमित्तेन।उपरि।ऊर्ध्वगाः।

अबुध्नेराजावरुणोवनस्योर्ध्वंस्तूपंददतेपूतदक्षः॥नीचीनास्थुरुपरिबुध्नएषामस्मेअंतर्निहिताःकेतवःस्युः॥२॥३४॥अ
बुध्ने॥राजा।वरुणः।वनस्य।ऊर्ध्वं।स्तूपं।ददते।पूतऽदक्षः।नीचीनाः।स्थुः॥उपरि॥बुध्नः॥एषां॥अस्मे इति॥अंतः॥
निऽहिताः॥केतवः॥स्युरिति स्युः॥२॥३४॥अबुध्नेप्रकारान्तरतःसंभजतः स्वमुच्चैः॥स्तूपंस्थानंददतेपूतद
क्षोनीचस्थाअप्यूर्ध्वगास्तेनतस्थुः॥नीचाश्चयेमुक्तिगामानुषाद्यास्तेषांबुध्नोनीचलोकःसुरेभ्यः॥
स्वर्गगाः॥स्थुस्तस्थुः।यद्वा।येनीचीनाःनी चामनुष्याद्याःतेपि।उपरि।स्थुः।मुक्तिगावभूवुरितिव्याख्यानांतरं॥अर्थइयेतेकथंनीचीनाः॥
तत्राद्येएषांतेषांस्वर्गंगमिष्यतां॥बुध्नःअधोभागः।सुरेभ्योनीचलोकोद्यावासः।द्वितीयेतुबुध्नशब्दोधस्तनत्वमाह।एषांमानुषादीनांबुध्नःसुरेभ्यो
धस्तनःप्रकारः।गुणाःनीचाः॥७॥श्री॥

व्यास
२८

भगभक्तस्य॥विष्णुभक्तस्य।हेसवितः।वयं॥तव॥अवसारक्षणेन॥आरभे॥आरभामहे॥विद्यांत्वदीयामितिशेषः॥तत्फलंच।भगभक्तस्य
भगःऐश्वर्यादिरूपोविष्णुःतद्भक्तस्यतत्सेवकस्यतेसंबंधिनः।रायोमूर्धानं।मूर्धन्शब्दोगोप्यावृत्त्योत्तममाह॥रायउत्तमं॥प्रसिधाद्वित्ता

भगभक्तस्यतेवयमुदशेमतवावसा॥मूर्धानंरायआरभे॥५॥३३॥भगऽभक्तस्य॥ते।वयं॥उत्।अशेम॥त
व॥अवसा।मूर्धानं॥रायः॥आरभे॥५॥३३॥विष्णुभक्तस्यतेरायोमूर्धानंरायउत्तमं॥तवावसारभेद्वि
द्यामुच्चैरश्नामितत्फलं॥ऐश्वर्यादिगुणायस्यभगोभक्तंपरात्मनः॥तस्यतेवित्तमश्नामितवरक्षाबलाधरे॥५॥३३॥

उत्तमंवित्तं।फलं।उदशेम।उच्चैरश्नामि।अश्नीमः।एवंदेवतांतरेव्याख्यायविष्णौव्याख्याति॥ऐश्वर्यादीति॥हेहरे।तव॥अवसा॥तवारक्षा
बलात्।वयं।आरभे।त्वदीयांविद्यामारभामहे।ततश्चभगभक्तस्यभगः।ऐश्वर्यादिगुणाःभक्तं।अन्नं।भोग्यंयस्यपरमात्मनःसतथोक्तः॥तस्यते॥
रायोमूर्धानं।प्रसिधाद्वित्ताउत्तमंमोक्षाख्यं।उदशेम।उच्चैरश्नामि।अश्नीमः॥५॥३३॥

उरुंहि॥ उरुंराजा। रंजनात्। अनुरागजननात्। दीपनाद्वा। राजा। रंजुरागे। राजृदीप्तौ। राजा। अन्वेतवै। स्वाज्ञानुसारेण सदैवगंतुं। उशब्दः एवार्थे। तस्याध्याहृतेनसदाशब्देनसंबंधः कृतः। सूर्याय सूर्यस्य। उरुं। विस्तीर्णं। पंथां। पंथानं। चकार। सूर्यसंचाराय महतीतरप्रतिघातरहितमंतरिक्षं चकार। किंच। अपदे अपादाय। पुरुषाय। प्रतिधातवे। धातुगतिशुध्योः। गंतवे। गंतुं। पादा पादौ। अकः अकरोत्। विकरणलोपात्। यद्वा अ
अपदे पदगतौ। गत्यर्थाज्ञानार्थाः। संपदादित्वात्क्विप्। नविद्यते पत् यस्य तस्मै। अज्ञाय। पादौ। घञंतः। विज्ञानं ज्ञानं चेति शेषः। सः वरुणः।

उरुंहिराजावरुणश्चकारसूर्यायपंथामन्वेतवा उ॥ अपदेपादाप्रतिधातवेकरुतापवक्ताहृदयाविधश्चित्॥ ८।२४॥ उरुं। हि॥

उरुं। हि। राजा। वरुणः। चकार। सूर्याय। पंथां। अनुऽएतवै। ऊं इति॥ अपदे। पादा। प्रतिऽधातवे। अकः। उत। अपऽवक्ता। हृदयऽविधः। चित्। च

अज्ञाय त॥८।२४॥ उरुं राजा रंजनाद्राजनाद्वा सूर्याय पंथानमसौ चकार॥ स्वाज्ञानुसारेण सदैव गंतुं पादावपादाय गंतवे करोत्॥

विज्ञानमकः स्वगंतुमात्मानमित्यर्थ इहाजसोक्तः॥ बुधे धर्तुः शंकरस्यापि दोषान्वक्ता ज्ञानाच्छिद्रकत्वाच्च विश्रुः॥८॥ २४॥ छ॥

प्रतिधातवे। आत्मानं प्रति गंतुं। अकः इत्यर्थः। इह पादे। अंजसा। मुख्यया वृत्त्या। उक्तः। माहात्म्यातिशयस्य सूचकत्वात्। उत। किंच। वरुणः। वि
हृदः। हृदयविधः। हृदयं बुधिः। तां विशेषेण धत्त इति विच्। अकारलोपश्छांदसः। तस्य बुधे धर्तुः। शंकरस्य चिदपि। अपवक्ता दोषान्वक्ता। कथं। ज्ञाना
त्। सूक्ष्मविज्ञानात्। शिक्षको हित यदमवद्यमारितामितिदोषं वक्ति। अनेनविज्ञानं शिक्षकत्वाचाभिप्रेतं। नदोर्जन्यमिस्यभिप्रायः॥८॥२४॥ ॥ ध्यास

२९

शतंते॥ जगद्रक्षा॥ हे राजन्। ईश। ते तव। शतम्। अनंतानि। सहस्रं। पुनरपि प्रत्येकं। अनंतधा। भूतानि। भिषजो रक्षकस्युपयोगात्। जगद्रक्षासाधनानि। संति। अतः। मम। उर्वी महती गभीरा। अगाधरूपा। सुमतिः। शुभा मतिः। ते। त्वद्विषये

शतंतेराजन्भिषजः सहस्रमुर्वी गभीरासुमतिष्टे अस्तु॥ बाधस्वदूरेनिरृतिंपराचैः कृतंचिदेनः प्रमुमुग्ध्यस्मत्॥४॥२४॥ शतं। ते। राजन्। भिषजः। सहस्रं। उर्वी। गभीरा। सुऽमतिः। ते। अस्तु। बाधस्व। दूरे। निःऽऋतिः। पराचैः। कृतं। चित्। एनः। प्र। मुमुग्धि। अस्मत्॥४॥२४॥ जगद्रक्षासाधनान्यप्यनंतान्यनंतधा संति पुनेत्स्वेश॥ अगाधरूपा महती शुभा च मतिर्ममूत्वद्विषया सदास्तु॥ ऋतं ज्ञानं तत्प्रतिरूपत्वहेतोर्निरृत्याख्यां दुर्मतिं दूर एव॥ बाधस्व दुर्ज्ञां निजनां निरस्य स्वर्गासिरात्कृत्स्यचराश्चदेव॥ कृतं च पापं प्रमुमुग्धि मत्तः॥ ९॥ २४॥

तियावत्। सदा। अस्तु। किंच। निरृतिं। ऋगतौ। निनिषेधे। ऋतिः। ऋतं। ज्ञानं। तत्प्रतिद्वपहेतोः। निरृत्याख्यां। दुर्मतिं। दूर एव। बाधस्व। बाध लोडने। कथं। पराचैः। पराङ्मुखः। दुर्ज्ञा निजनं स्वर्गादिस्थानाच्छ्वदेव निरस्य। नरके क्षिप्त्वा चेत्यर्थः। किंच कृतं मयेति शेषः। एनः। चित्। पापं च। अस्मत्। मत्तः। प्रमुमुग्धि। प्रमोचय॥४॥२४॥ ७॥

अमीये॥ ऋक्षाण्यमी॥ येअमीऋक्षाः। यान्यमूनिऋक्षाणिनक्षत्राणितानि। उच्चा। उच्चैः। अंतरिक्षे। निहितासः। निहितानि। त्वयैवेतिशेषः। यच्च।
तानि। नक्तं। रात्रौ। ददृश्रे। ददृशिरे। दृश्यंते। दृश्यानि। दिवा। कुहचित्। कदाचित्एव। ईयुः। प्रतीयुः। प्रतीयंते। यच्चदिवा। सर्वदानप्रतीयंते। कदाचिदेव
प्रतीयंते। तदपित्वयैव। वरुणस्य। पराभंदतनोः। विष्णोः। तवैव। व्रतानि। इत्यादीन्युक्तानिकर्माणि। अदब्धानि। अनिरोधितानि। अप्रतिहतानि। किं
च। चंद्रमाः चंद्रः। विचाकशत्। चकाशत्। दीप्तो। दीप्तिश्चदर्शनं। पश्यन्। समस्तमितिशेषः। नक्तं। उपलक्षणमेतत्। नित्यं। एति। याति। तच्चत्वयैव।

अमीयऋक्षानिहितासउच्चानक्तंददृश्रेकुहचिद्दिवेयुः॥ अदब्धानिवरुणस्यव्रतानिविचाकशच्चंद्रमानक्तमेति॥ ५। ३५॥ अमीइति॥
ये। ऋक्षाः। निऽहितासः। उच्चा। नक्तं। ददृश्रे। कुह। चित्। दिवा। ईयुः। अदब्धानि। वरुणस्य। व्रतानि। विऽचाकशत्। चंद्रमाः। नक्तं॥
एति॥ ५॥ १५॥ ऋक्षाण्यमीनिहितानित्वयोच्चैः॥ दृश्यानिरात्रौनदिवात्वयैवेत्यादीनिकर्माण्यनिरोधितानि॥ पश्यन्परानंद
तनोस्तवैवचंद्रोनित्यंदृश्यमानस्त्वयैव॥ संप्रेरितोयातिपरेचदेवाएवंत्वदाज्ञाकरणाः सदैव॥ ५॥ ३५॥
वरुणस्यादब्धानि। व्रतानिविचाकशदित्येकवाक्यतयायोज्यं। विचाकशदित्यस्यार्थांतरं। दृश्यमानइति। चंद्रमाः। नक्तं। विचाकशत्। दीप्यमा
नः। दृश्यमानः। एति। तदपित्वयैवेतियोजनांतरंसूचयति। संप्रेरितइतियोविचाकशच्चंद्रमाः। सत्वयैवसंप्रेरितोनक्तमेतीति॥ उपलक्ष
णमेतदित्यभिप्रायेणाह॥ परेचेति॥ त्वदाज्ञायाःकरणाः। कृतसत्युटोबहुलमितिकर्तरिल्युट्। व्यधिकरणोवाबहुव्रीहिः॥ ५॥ ३५॥ व्यास
३०

अथवाएषां। मानुषादीनांबुध्नः। उक्तप्रकारेणाप्रकाशः। अज्ञानं। अस्ति। ननुदेवानां। तस्मात्तेनीचीनाः॥ तृतीयपादंप्रकारांतरेणव्याख्याति॥
नीचाश्चत्वमिति॥ अस्यवरुणस्याज्ञयायएवजीवाः किंचिदपेक्षयानीचीनाः॥ तएवकिंचिदपेक्षयाउपरिस्थः। किंनिरवधिकमेतत्। एषांजीवानांबु
ध्नोमूलभूतःकश्चिदस्ति॥ विरिंचइति॥ तस्येदंतात्पर्यं॥ विरिंचात्। आ। यक्रमत्रोजीवानांनीचोच्चत्वं। तच्चवरुणेनेति॥ तस्यवरुणस्यप्रसादात्।
अस्मेअस्माकं। नोअदिशः। अंतःहृदये। केतवः। निहिताः स्युः। ज्ञानानि। नित्यंनिहितानिभूयासुः। ज्ञानिनोवयंभूयास्म। ननुसंत्येवज्ञानानितत्क

नीचाद्युच्चाअप्रकाशोथवैषांनीचोच्चत्वंक्रमशश्चाविरिंचात्। अस्माकमंतर्निहितानिनित्यंज्ञा
नानिभूमास्फुरंतोधिकानि॥ भवंत्यर्हाभवितुंवाभविष्याःस्युर्द्विग्रहेप्रार्थनेवाधिकार्थे॥ २॥ १४॥

थंप्रार्थना। अतः। विद्यमानेभ्योप्यधिकानि। तर्ह्ययोग्यप्रार्थनयाप्रत्यवायोभवेदित्यतोभिप्रायमाह॥ भवंतीति॥ ये। केतवः। भविष्याः। आगा
मिनः। अस्माकं। भवितुमर्हाः। भवंतिवा। संत्येव। तेस्युरित्यनेनपेकेतवः। अस्मे। अस्माकं। अंतः। निहिताः। निगूढाःसंति। तेस्युर्व्यक्ताइतियोज
नांतरंचसूचितंभवति। अतोधिकानीतियद्व्याख्यानं। तत्कथंलभ्यतइत्यतआह॥ द्विर्ग्रहइति। पदकारेणात्रस्युरितिस्युःइतियोद्विर्ग्र
हःक्रियते। तेन। द्विर्ग्रहे। द्विर्ग्रहेणद्विरुच्चारणेनप्रार्थनेव। अधिकार्थे। अधिकार्थद्योतनायभवतीति॥ २॥ १४॥ ६७॥

तदित्॥ नक्तं दिवसे च। नक्तं। रात्रौ। मह्यं। तदित्। तदेव। ब्रह्मणा वंदमान इति प्रकृतं। त्वदीयं स्तोत्रं। प्राहुः। आर्याः। स्वकार्यमिति शेषः। दिवा॥ दिवसे च। तदेव कार्यं। आहुः। किंच। हृदः। हृदिस्थः। अणिच्छ्यभावश्छांदसः। प्रत्यवायांतरं। ल्यब्लोपनिमित्तेयं पंचमी। हृदधिष्ठायेति तस्य

तदिन्नक्तं तद्दिवा मह्यमाहुस्तदयं केतो हृद आ वि चष्टे॥ शुनःशेपो यमह्वद्गृभीतः सो अस्मान्राजा वरुणो मुमोक्तु॥ ॥२।३५॥ तत्। इत्। नक्तं। तत्। दिवा। मह्यं। आहुः॥ तत्। अयं। केतः। हृदः। आ। वि। चष्टे। शुनःशेपः। यं। अह्वत्। गृभीतः। सः। अस्मान्। राजा। वरुणः। मुमोक्तु॥२।३५॥ नक्तं दिवसे चैतदेव स्तोत्रं त्वदीयं प्राहुरार्याः स्वकार्यं। मह्यं केतो ज्ञानरूपो हृदिस्थो नारायणो वक्त्यर्थं ते स्वरूपं॥ पश्यत्यपि शेपो यं समह्वद्गृहीतः स नो देवो मोचयत्व ग्र्युदुःखात्॥२।३५॥

तात्पर्यार्थो हृदिस्थः। केतः ज्ञानरूपः। ते। अन्यरूपं। अयं नारायणः। तदेव कार्यं। आ वि चष्टे। सम्यग्व्यक्ति। पश्यत्यपि वा। उभयत्रापि प्रयोगात्। एवं स्तुवन्। गृभीतः गृहीतः। शुनःशेपः। यं। समह्वत्। समाह्वयति। सः राजा। ईशः। वरुणः देवः नः अस्मान्। मुमोक्तु। मोचयतु। अग्र्युदुःखात्। सांप्रतमुपस्थितात्। संसारदुःखादिति शेषः॥२।३५॥

व्यास

शुनःशेपो ह्यह्वत्। अत्र प्रथमपादो निगदेनैव व्याख्यात इति दर्शयन् गृभीत पदं व्याख्याति॥ शुनःशेप इति॥ हृग्रहोर्भश्छंदसि। त्रिषु द्रुपदेषु बद्ध इत्येतद् द्वेधा व्याख्याति। स्थानत्रये स्कंबद्धः। विक्रियाद्यैः स्कंबधः इति। स्थानत्रयं यूपस्य। द्रोः वृक्षस्य। यूपस्य। पदानि स्थानानि। तेषु विति प्रथमोर्थः स्यात्। द्वितीये तु। के विक्रियाद्याः कथं च द्रुपदानीत्यत आह॥ द्रुतमिति॥ संज्ञपनं। आलंभः। आदित्यशब्दं विच्छिद्य योजयति। आदित्य इति॥ अव

शुनःशेपो ह्यह्वद्गृभीतस्त्रिष्वादित्यं द्रुपदेषु बद्धः॥ अवैनं राजा वरुणः ससृज्याद्विद्वाँ अदब्धो वि मुमोक्तु पाशान्॥३।३५॥ शुनःशेपः॥ हि। अह्वत्। गृभीतः। त्रिषु। आदित्यं। द्रुपदेषु। बद्धः। अव। एनं। राजा। वरुणः। ससृज्यात्। विद्वान्। अदब्धः। वि। मुमोक्तु॥ पाशान्॥३।३५॥ शुनःशेपो ह्यह्वद्गृहीतः स्थानत्रये विक्रियाद्यैः स्कंबद्धः॥ द्रुतं प्राप्तानि द्रुपदानि विक्रियायूपेबंधः संज्ञपनोद्यमश्च॥ आदित्यो सावादित्यसंस्थः परेशो वारीशांतः संस्थितः स्तूयते त्र॥ शुनःशेपो यमित्यादिके न वारीशो पि ह्यविष्णा स्तूयमानः॥

यासवित्रमोगविभागादादिशब्दात्सप्त। पूर्वन्यायेनात्र सूक्ते सर्वत्र वरुणोप्युच्यत इति शंकां निवारयति॥ परेश इति॥ न तु वारीश इत्यर्थः। किं सर्वथापि नेत्यत आह॥ शुनःशेप इति॥ यत्र वरुणः संभवति। तत्र सोपि ग्राह्यः। नहि ते क्षत्रमित्यादौ तदसंभवात्। द्विसुरे वेत्याशयः। शुनःशेपस्तु तत वरुणांतर्गतशब्दप्रवृत्तिनिमित्तवर्तनमः॥ ७॥

द्रुपदशब्दस्यार्थांतरमाह ॥ गुणा इति ॥ यत्र । येषु । गुणेषु । तृतीयपाद तात्पर्यमाह ॥ करोत्विति ॥ चतुर्थस्यार्थमाह ॥ प्रसन्न इति ॥ त्रिषु । द्रुपदेषु । यूपस्थानेषु बद्धः । यद्वा । द्रुतं पद्यंते पदानि । विक्रियादीनि । तेषु । तृतीयार्थे सप्तमी । तैः बद्धः । यद्वा जीवानां द्रवणस्य । संसरणस्य । पदानि । द्रुपदानि । सत्वरज

गुणास्त्रये द्रुपदानीति चोक्ताः द्रवत्ययं जीवसंघो हि यत्र ॥ करोत्वेनमवसृष्टं स्तुतेः सप्रसन्नोऽस्मान्कर्मपाशान्मुमोक्तु ॥ ३ ॥ ३५ ॥

स्तमांसि । तैर्बद्धः शुनःशेपः । यं । आदित्यं । अह्वत् । आह्वयति । सः वरुणः । राजा । एनं । शुनःशेपं । अवससृज्यात् । संस्तुतेः अवसृष्टं करोतु । विकरणस्य लुक्‌ कथं । विद्वान् । अस्मदाह्वानं जानन् । ततश्च प्रसन्नः । अदब्धः अप्रतिबद्धः । पाशात् विमुमोक्तु । अस्मान् कर्मपाशात् । मुमोक्तु । अत्रापि बहुलं छंदसीति श्लुः ॥ ३ ॥ ३५ ॥

व्यास
३२

तत्वायामि ॥ तदिति परामर्शस्य विषयं दर्शयन्व्याख्याति ॥ एवंगुण इति ॥ यद्यस्मात् । त्वं एवंगुणः । तत् अतः । शरण्यं । त्वा । त्वां यामि ॥ सदा शरणं व्रजामि ॥ कथं ब्रह्मणा वेदवेचा । वंदमानः । नमन् स्तुवन् नूनं अभिवादयंश्चेत्यर्थः ॥ किंच ॥ यजमानः । उपलक्षणमेतत् । मत्तोऽन्यो विद्वान् । हविर्भिः । हविःप्रदानादिभिः । तदेव आशास्ते । वांछति । किं तत् । यामीत्युक्त धात्वर्थ परामर्शोऽयमित्याह ॥ त्वद्भक्तिं । त्वच्छरणप्राप्तिं । हे वरुण

तत्वायामि ब्रह्मणा वंदमानस्तदाशास्ते यजमानो हविर्भिः ॥ अहेळमानो वरुणेह बोध्युरुशंस मान आयुः प्रमोषीः ॥ ३ ॥ तत् ॥ त्वा । यामि । ब्रह्मणा । वंदमानः । तत् । आ । शास्ते । यजमानः । हविःऽभिः ॥ अहेळमानः । वरुण । इह । बोधि । उरुऽशंस मानः ॥ आयुः । प्र । मोषीः ॥ ३ ॥ एवंगुणो यत्वमतो व्रजामि सदा शरण्यं शरणं वेदवाचा ॥ नमन्नन्यो यजमानो हविर्भिस्तदाशास्ते त्वद्भक्तिं देवदेव ॥ अनिंदन्नस्मान्नरमात्र बुध्या संबोधयोच्चैः स्तुत मास्मदायुः ॥ छेत्सीः ॥ ३ ॥ ३५ ॥

देवदेव ॥ इह आस्मासु । अहेळमानः । अवज्ञामकुर्वन् । नरमात्रमिति बुध्या । अस्मान् । शरणं प्राप्तानिनिंदन्निति यावत् । बोधि संबोधय । हे शुनःशेप श्रांतोऽसीति । हे उरुशंस उरुभिः पुरुषैः शंस्यत इति उच्चैः स्तुत । नः आयुः अस्मदायुः माप्रमोषीः माछेत्सीः । नछिंद्याः ॥ ३ ॥ ३५ ॥

उदुत्तमं ॥ अत्रोत्तममध्यमाधमपाशान्व्याख्याति ॥ पुण्यमिति ॥ उदववीत्युपसर्गार्थानाह ॥ यथायोग्यमन्येषु दत्वेति । हे वरुण । उत्तमं पाशं । पुण्यं । अस्मत् । उच्छ्रथय । अस्मत्सकाशात् इंद्रादत्वाऽस्मतो वियोजय । अधमं पाशं । पापं । अवश्रथय । द्विषद्भ्यो दत्वाऽस्माद्वियोजय । मध्यमं पाशं मिश्रं । पुण्येन मिश्रं पापं । विश्रथय । उदासीनेभ्यो दत्वा वियोजय । एवशब्देनास्य मुख्यार्थतामाह ॥ अथेति ॥ तेन वियोजनेन । हे आदित्य । तव । व्रते । त्वत्कर्मणि ।

उदुत्तमं वरुण पाशमस्मदवाधमं वि मध्यमं श्रथाय ॥ अथा वयमादित्य व्रते तवानागसो अदितये स्याम ॥ ५ ॥ १५ ॥ उत् । उत्तमं । वरुण । पाशं । अस्मत् । अव । अधमं । वि । मध्यमं । श्रथय । अथ । वयं । आदित्य । व्रते । तव । अनागसः । अदितये । स्याम ॥ ५ ॥ १५ ॥

पुण्यं पापं मिश्रमित्येव पाशान्यथायोग्यं श्रथयान्येषु दत्वा ॥ त्वन्निष्ठया तेन वयं त्वदीयलक्ष्म्याः पुत्राः स्याम मुक्ताः स्तेतेश्च ॥

एषर्ग्विष्णोः केवलाप्येवमन्या अयोग्या या अन्यदेवेषु सम्यक् ॥ वाक्ये विशिष्टे रपवादहीनेर्न्नैया गुणा अन्यदेवेषु चैव ॥

त्वन्निष्ठयेति यावत् । अनागसः । निर्दोषाः स्तेतेश्च मुक्ताः । वयं । तव । अदितये । अदितेः । त्वदीयलक्ष्म्याः । स्याम । पुत्रा इति शेषः । परे त्वाइत्या दिनोक्तं विवृणोति ॥ एषेति ॥ केवला । प्रतिपाद्यांतररहिता । एतदप्युक्तार्थ एवेति ज्ञातव्यं । अर्थांतरयोजनायां तु देवतांतरमपि न विरुध्यते । अयोग्यत्वं कथं ज्ञातव्यमित्यत आह ॥ वाक्यैरिति ॥ विशिष्टैरित्यस्यैव विवरणमपवादहीनैरिति ॥ छ ॥

तान्येनोपलक्षणयोदाहरति । पतिरिति ॥ अत्र सोमो वरुणस्य पतिरित्युक्तत्या विचाकशच्चंद्रमा नक्तमेतीति वरुणे अयोग्यमिति लभ्यते । तावुभौ । सूर्याचंद्रमसौ ॥ तुल्यवीर्यावित्यनेनोरुं हि राजेति वरुणेन योग्यमिति ज्ञायते ॥ अस्य द्वंद्वस्य ॥ रुद्रः पतिरित्यनेनोतापवक्ते

पतिः सोमो वरुणस्याप्यथाग्नेः पतिः सूर्यस्तावुभौ तुल्यवीर्यौ ॥ सूर्याचंद्रमसोः पतिरिंद्रोस्य रुद्रः पतिर्ब्रह्मा पतिरस्यापि विष्णुः ॥ पतिर्मुक्तेर्वास्कदेवोथ दृष्टे ब्रह्मा विद्यायाः शर्वइंद्रः क्रियायाः ॥ क्रियंत्रानामधिपान्यदेवास्तथा फलानामपि मुक्तिमार्गे ॥ यथायोग्यं स्वेंद्रियप्रेरकाश्च ततः पूज्या देवता मुक्तिकामैः ॥ इति श्रुतेस्तारतम्यं गुणानां ज्ञात्वा योज्याः श्रुत

त्यस्य वरुणे अयोग्यता प्रतीयते ॥ अस्यापि विष्णुरिति विष्णोः सर्वोत्तमत्वोक्त्या नहि ते क्षत्रमित्येतद्वरुणेन योग्यमिति निश्चीयते । पतिर्मुक्तेर्वासुदेव इत्यनेनोर्ध्वं स्तूपमित्यादेरन्यत्रायोग्यता वधार्यते । दृष्टे ब्रह्मेत्यनेनास्मे अंतरित्यादेर्वरुणे असंभावितत्वं दर्श्यते । एवमप्यन्यदप्यूह्यं ॥ मुक्तिमार्गे स्वेंद्रियप्रेरका इत्यन्च यष्ठ ॥ गुणानां देवता सर्वे ऽधिनां ॥ तत्र तत्र । देवतास्थ ॥ ५ ॥ १५ ॥

यच्चित् ॥ एकविंशतिसूक्तस्य चमिदं सूक्तं ॥ दिवसे ॥ हे वरुण । देव । विशः । प्रजाः । स्कजनाः । यथा । तथैव । वयं । यच्चित् । यदपि । ते । व्रतं । सेवात्मकं । तत्सर्वं । द्यविद्यवि । दिवसेदिवसे । प्रमिनीमसि । वैदिको धातुः । कुर्मः ॥ १ ॥ १६ ॥ मानोवधाय ॥ मानो हंतुं । हे वरुण । नः ।
यच्चिद्धिते विशो यथा प्रदेव वरुण व्रतं ॥ मिनीमसि द्यविद्यवि ॥ १ ॥ १६ ॥ यत् । चित् । हि । ते । विशः । यथा । प्र । देव । वरुण । व्रतं ॥ मिनीमसि । द्यवि ऽ द्यवि ॥ १ ॥ १६ ॥ दिवसे दिवसे देव कुर्मो यदपि ते व्रतं ॥ यथैव स्कजनाः ॥ १६ ॥ मानोवधाय हत्नवे जिहीळानस्य रीरधः ॥ माहृणानस्य मन्यवे ॥ २ ॥ १६ ॥ मा । नः । वधाय । हत्नवे । जिहीळानस्य । रीरधः ॥ मा । हृणानस्य । मन्यवे ॥ २ ॥ १६ ॥ मानो हंतुं साधय निघ्नते ॥ जिहीनस्य जन्धर्मं हरतो मां च मन्यवे ॥ २ ॥ १६ ॥ टी० ॥ अस्मान् । वधाय । हंतुं । हननाय । हत्नवे । हंतीति हत्नुः । तस्मै । निघ्नते । पुरुषाय । षष्ठ्यर्थे चतुर्थी । जिहीळानः । स्वजनान् । धर्ममिति शेषः । तस्य जिहीळानस्य । अनेकार्थत्वाद्धातूनां हिळितिस्यानार्थो दीर्घश्छांदसः । जहातेर्वा छांदसमेतद्रूपं । मा रीरधः । मा साधय । एतस्य वशान्माकार्षीः । किंच । हृणानस्य हरतः पुरुषस्य । मन्यवे कोपाय च । मा रीरधः । व्यसयेन हरतिः श्नाविकरणः । धात्वंतरं वा हृणातिः ॥ २ ॥ १६ ॥

व्यास
३४

अवते । निंदां च । अत्र क्रियापदस्यैकत्वाद्वावप्यवशब्दो नोपसर्गौ युक्तौ विस्यास्यायेना ऽ ऽ घस्या वमवाचितां विवक्षन्त्याख्याति ॥ हे वरुण । वयं । ते । नमोभिः । खद्रुतैः । त्वद्विषयैः । नमस्कारैः । हविर्भिर्यज्ञेभिः । हविर्युक्तैः स्त्वन्नमस्कैश्च । तन्नमस्कारत्वन्मरव समुत्पन्नं तत्प्रसादाद्धिं यावत् । ते । हेळः । हेळनं । निंदां च । अव । अवमा । अवाग्गते हे तुम्हता । अवमेह । अवगच्छामः । ननु मुमुक्षो भगवन्निंदा ज्ञातुमयोग्या ॥ सत्यं । उपादेयत्वेनायोग्यामपि । सा
अव ते हेळो वरुण नमोभिरव यज्ञेभिरीमहे हविर्भिः ॥ क्षयन्नस्मभ्यमसुर प्रचेता राजन्नेनांसि शिश्रथः कृतानि ॥ ४ ॥ १५ ॥ अव । ते । हेळः । वरुण । नमः ऽ भिः । अव । यज्ञेभिः । ईमहे । हविः ऽ भिः ॥ क्षयन् । अस्मभ्यं । असुर । प्रचेत इति प्र ऽ चेतः । राजन् । एनांसि । शिश्रथः । कृतानि ॥ ४ ॥ १५ ॥ निंदां च ते ऽ वाग्गते हे तुम्हतामवगच्छाम ःसेयमित्यध्ययोग्यां ॥ नमस्कारैः स्तद्रुतैस्त्वन्नमखैश्च हविर्युक्तैः स्त्वत्प्रसादात्सचलं ॥ क्षितिरस्मभ्यं प्राणरं ताखिलज्ञो वियोजयास्मत्कृतान्याश्वघानि ॥ ४ ॥ १५ ॥
निंदा । इयं । अवागातिहो । तुम्हतेत्यवगच्छामः । हे राजन् । एवमस्माभिरवगतः । सच । त्वं । अस्मभ्यं । क्षयन् । क्षितिराश्रयो भवन् । अस्मत्कृतानि । एनांसि । अघानि । शिश्रथः । छांदसश्श्रद् । निश्चितत्वाच्छो इडर्थे लुङ् । आशु वियोजय । असुरशब्दार्थः प्रायरं तेति । असवः प्राणाः । तेषु तेर्वा रिमत इत्यसुरः । प्रचेतः शब्दार्थोऽखिलज्ञ इति । प्रकृष्टं । अखिलविषयं । चेतो ज्ञानं यस्येति । यद्यप्यत्रे मौ शब्दौ संबुध्यंतौ । तथापि प्रातिपदिकमात्रमत्रोक्तमिति मंतव्यं ॥ ४ ॥ १५ ॥

पराहि॥ पराक्।मे।मम॥ अनेकविषयत्वात्। मन्यवः। प्रज्ञाः। बुद्धिवृत्तयः। वस्य इष्टये। वस्यः शुभपर्यायः। इष्टः प्राप्तिः। इषुगतौ। शुभलब्ध
ये। परा। पराक्। त्वत्पराङ्मुखतया। पतंति गच्छंति। हि। हा कष्टं। किमिव। वयः। पक्षिणः। वसतीरुपन। नीडानि प्रति यद्वत्। वैषयिकसुख
लाभार्थं मदीया बुद्धयो विषयानेव धावंतीति धिङ्मामिति तात्पर्यं। यद्वा। आत्यंतिकसुखसाधनताहीनेष्वपि विषयेष्वात्यंतिकसुख

पराहिमे विमन्यवः पतंति वस्यइष्टये॥ वयो न वसतीरुप॥४॥१६॥ परा। हि। मे। विऽमन्यवः। पतंति। वस्यःऽइष्टये॥ व
यः। न। वसतीः। उप॥४॥१६॥ पराक्ष्यतंति प्रज्ञा मे विविधाः शुभलब्धये॥ पक्षिणो वसतीर्यद्वत्स्थानं त्वां प्राप्नुवंति च॥४॥१६॥ ॥

लाभाय पतंतीति भ्रांतोस्मीति। प्रकारांतरेण व्याख्याति॥ न त्वामिति॥ पक्षिण इत्याद्यत्राप्यनुवर्तते। नेत्यावर्तनीयं। वसतीः प्रति वयो न पक्षि
णो यद्वदिति व्यतिरेकदृष्टांतः। तथा मे मन्यवः प्रज्ञाः। वस्य इष्टये। मोक्षादिशुभलब्धये। परा दूरतः। त्वां। न पतंति। हा कष्टमिति योज्यं॥४॥१६॥

व्यास

कदा॥ पूर्वसंगतत्वेन व्याख्याति॥ अत इति। यतः अस्मद्बुद्धयः विषयानेव धावंति। न वरुणं। अतः। तं प्रति गंतुमित्यर्थः। वयं।
कदा मृळीकाय। रक्षणाय। अस्मदीयस्य मनस इति शेषः। क्षत्रश्रियं। क्षत्रं। क्षत्रियाः। धनं बलं वा। तद्युतश्रियं। स क्षत्रश्रीः। तं। अ

कदा क्षत्रश्रियं नरमा वरुणं करामहे॥ मृळीकायोरुचक्षसं॥५॥१६॥ कदा। क्षत्रऽश्रियं। नरं। आ। वरुणं। करामहे॥
मृळीकाय। उरुऽचक्षसं॥५॥१६॥ अतोखिलक्षत्रपतिमाह्वयामः कदा वयं॥ अविनाशिनं रक्षणाय महादर्शनिमंजसा॥५॥

खिलक्षत्रपतिं। नरं। नरिष्यत इति। अविनाशिनं। उरुचक्षसं। उरुचक्षः दर्शनं यस्यासावुरुचक्षाः। तं महादर्शनं वरुणं। आक
रामहे। अंजसाऽऽह्वयामः॥५॥१६॥ उरुचक्षसे वरुणायाह्ववाच्यायनमः॥

तदित्॥ तत्प्रसादात्। तत्तस्मात्। वरुणात्। तत्प्रसादादितियावत्। समानमित्। सममेव। आशाते। अशू व्याप्तौ। गत्यर्थाः ज्ञानार्थाः। अवग
छतः कौ ब्रह्मवायू। कुत एतत्। वेनंताविति विशेषणसामर्थ्यादित्याशयवान्व्याचष्टे॥ वेनंताविति। अनेनापि कथं ब्रह्मवायू निश्चीयेते इत्य
तआह॥ तौहीति॥ कथंभूतौ। यो। तौ। धृतंव्रतंयेनासौ धृतव्रतः दाशुषेयजमानाय। नप्रयुच्छतः। नकुरुतः। किं। यथार्थज्ञानंप्रयोगंच कर्मणां। यो

तदित्समानमाशाते वेनंता न प्र युच्छतः॥ धृतव्रताय दाशुषे॥३॥५७॥ तत्। इत्। समानं। आशाते इति। वेनंता। न। प्र। यु
च्छतः। धृतऽव्रताय। दाशुषे॥३॥५७॥ तत्प्रसादाद्ब्रह्मवायू सममेवावगच्छतः। वेनंतौ हि विजानंतौ तौ हि ज्ञानिवरौ म
तौ॥ यथाज्ञानं प्रयोगंच दाशुषे कुरुतो न तौ अश्विनौ वरुणश्चेत्स्यात्॥३॥५७॥ टी॰॥ यत्तातिरेके यो त्ति शेषः। यद्वा युच्छ प्रमा
दे। यो तौ। धृतव्रताय। दाशुषे। यथाज्ञानं प्रयोगंच। नप्रयुच्छतः। नकुरुतः। विभ्रष्टमिति शेषः। एवंविधे पक्षे आशाते इत्यस्याः क्रियायाः
कर्तारौ ब्रह्मवायू कथितौ। प्रसिद्धवरुणपक्षे तयोरसंभवात्कौ विव्यत आह॥ अश्विनाविति॥ अत्र वरुणशब्देन प्रसिद्धवरुणो विवक्षि
तः स्याच्चेत्तदा अश्विनौ आशाते इत्यस्याः क्रियायाः कर्तारौ ज्ञातव्याविति शेषः॥३॥५७॥

व्यास

३६

वि मृळीकाय। हे वरुण। वयं मनः। अस्मदीयं। गीर्भिः वेदवाग्भिः। तत्स्तवनादिना। मृळीकाय ते। मृळीके सुखी। विसीमहि। षिञ् बंधने। निब
ध्नीमः। त्वद्विषयं कुर्मः। तत्र दृष्टांतः रथी। सारथिः। संदितं। सम्यक्खंडितं। वियोजितं। रथाद्वियुक्तं। अश्वं न। अश्वं यद्वत्। रथेवध्ना

वि मृळीकाय ते मनो रथीरश्वं न संदितं॥ गीर्भिर्वरुण सीमहि॥३॥३६॥ वि। मृळीकाय। ते। मनः। रथीः। अश्वं।
न। संऽदितं। गीःऽभिः। वरुण। सीमहि॥३॥३६॥ मनस्त्वयि निबध्नीमो गीर्भिरश्वं वियोजितं॥ बध्नाति सार
थिर्यद्वन्मृळीको रक्षको धिकं॥ त्वन्मनोस्मास्ववागीर्भि रक्षणाय विसीमहि॥३॥३६॥

ति। रश्मिभिः। तथा मृळीकायेति वरुणविशेषणं व्याख्याति॥ मृळीक इति॥ मृड सुखेन। अस्मात्कर्तरि कक्। अनेकार्था हि धातव इति रक्ष
णार्थत्वं। बीसस्यार्थो धिकमिति। प्रकारांतरेण व्याख्याति॥ त्वन्मन इति॥ हे वरुण। ते नमः। त्वन्मनः कृपारूपां त्वन्मनोवृत्तिं। गीर्भिः। स्तुतिरूपाभिः।
मृळीकाय। भावे प्रत्ययः। रक्षणाय। विसीमहि। निबध्नीमः। अस्मास्विति शेषः। दृष्टांतः पूर्ववत्॥३॥३६

वेदमास॰।कालं।धृतं।व्रतं।कर्मयेनासौ।धृतव्रतः।वरुण।प्रजावत॰।प्रजायंत इतिप्रजाः कार्याणि।तद्युक्तवान्।द्वादश।मास॰मासा
न्।वेद।मासपर्यायोमासशब्दः।तत्तत्कालोद्भवैः कार्यैः सह।सकलंचकालंच।वेदेतियावत्।उप।आत्मनः समीपएव।जायते॥

वेदमासोधृतव्रतोद्वादशप्रजावत॰॥वेदायउपजायते॥३॥१७॥वेद।मासः।धृतऽव्रतः।द्वादश।प्रजाऽवतः।वेद।यः।
उपऽजायते॥३॥१७॥कालंकालोद्भवै॰सह॥यआत्मनः समीपेचजायतेतंचपञ्जं॥मुक्तंवा॥३॥१७॥

नतुव्यवधानेन॥तंपञ्जंचवेद।अव्यवधानेनजन्मप्रदर्शनायपञ्जमित्युक्तं॥यद्वा।यः।आत्मनः।उपसमीपे।जायते।प्र
वर्तते।सामीप्यादिमान्भवति।तंमुक्तं।जातावेकवचनं॥३॥१७॥

वेदवातस्य।वर्तनिं।अत्रोरोबृहतइतिपर्यायो।पौनरुक्त्यपरिहारार्थमुरोरितितावद्व्याख्याति॥महतइति॥परिमाणादिगुणैः।बृहतइत्येतदृषस्ये
तद्विशेषणतयाव्याख्याति॥अतिप्रकाशिनइति॥ऋषशब्दोबलवत्प्रकाशस्यापिवाचकः।बाह्यप्रकाशवचनत्वमुक्तं।ज्ञानप्रकाशमादायापिबृह
तऋषस्येतिविशेषणविशेष्यभावेनव्याख्याति॥बृहतइति॥एवशब्दोस्यार्थस्यमुख्यत्वंद्योतयति॥यद्वाबृहत इत्येतदुरोरित्यस्यैवविशेषणं

वेदवातस्यवर्तनिमुरोर्ऋषस्यबृहतः॥वेदायेअध्यासते॥४॥१७॥वेद।वातस्य।वर्तनिं।उरोः।ऋषस्य।बृहतः।वेद।ये।अधिऽआस
ते॥४॥१७॥वर्तनांवायोर्महतोतिप्रकाशिनः॥बृहतोज्ञानिनश्चैवबृहतोमहतोपिवा॥अधिकानिपदान्येवदेवाअध्यासतेपितान्॥४॥१७॥
निषसादधृतव्रतोवरुणःपस्त्याउस्वा॥साम्राज्यायसुक्रतुः॥५॥१७॥नि।ससाद।धृतऽव्रतः।वरुणः।पस्त्यासु।आ।सांऽम्राज्या
य।नि।सुऽक्रतुः॥स॥५॥१७॥साम्राज्यायसपस्त्यासुनिषसादप्रजासुच॥सुज्ञानः॥५॥१७॥ टी०॥इत्याह॥बृहतइति॥उरोरित्युक्ते
तिउपचारेणापिमहत्वंशंक्येत।तन्माशंकीतिबृहतइत्यनेनोरुत्वंविशेष्यतइत्यर्थः।ततश्चउरोः।ऋषस्य।बृहतः।वातस्य।वर्तनिंप्रवृत्तिंवेद।
येदेवाः।अधि।अधिकान्येवपदानिअध्यासते।अधितिष्ठंति॥तानपिवेदेति।अत्राधीत्येतदारस्यायोजितमितिज्ञातव्यं॥४॥१७॥निषसाद।सा
म्राज्याय।सुक्रतुः।सुज्ञानः।धृतव्रतः।सः वरुणः साम्राज्यायसकलपरिपालनायपस्त्यासु।निषसाद।प्रजाअधिष्ठितवान्।चशब्दाद्गृहेष्विति

मृकेतेत॥५॥१७॥

अतो विश्वानि ।तत्र सन्। अतः सप्तम्यर्थे तसू। अत्र तत्र प्रजास्व गृहेषु। सन् वर्तमानः। चिकित्वान् कृती। कित निवास इत्ययं करणेपि वर्तते।
सः वरुणः। विश्वानि च। सर्वाण्यपि। अद्भुतानि आश्चर्याणि। अभिपश्यति। किंच। या यानि। वस्तूनि। कृतानि। यानि च कर्त्वा कर्तव्यानि। कृ सार्थइ

अतो विश्वान्यद्भुता चिकित्वाँ अभि पश्यति ॥ कृतानि या च कर्त्वा ॥१॥१८॥ अतः। विश्वानि। अद्भुता। चिकित्वान्। अभि। पश्य
ति। कृतानि। या। च। कर्त्वा ॥३॥१८॥ तत्र सन्विश्वान्यद्भुतानि च पश्यति ॥ कर्ता चिकित्वान्स कृतं कर्तव्यानि च पश्यति ॥१॥१८॥
स नो विश्वाहा सुक्रतुरादित्यः सुपथा करत् ॥ प्र ण आयूंषि तारिषत् ॥२॥१८॥ सः। नः। विश्वाहा। सुऽक्रतुः। आदित्यः। सुऽ
पथा। करत्। प्र। नः। आयूंषि। तारिषत् ॥२॥१८॥ विश्वान्यहानि नो देवः सुपथानि करोत्वसौ ॥ ददात्वायूंषि नो नित्यं मुक्तौ वा ॥२॥१८॥
तिलन्। तानि कृत कर्तव्यानि च पश्यति ॥१॥१८॥ सनः। विश्वानि। सो सौ। सुक्रतुः। आदित्यो देवः। विश्वाहा विश्वानि सर्वाणि। अहानि।
दिनानि। नः अस्माकं। सुपथा सुपथानि निर्विघ्नानीति यावत्। करत्। करोतु। नः अस्माकं। आयूंषि। तारिषत्। तरतिर्दानार्थः। लेट्। ददातु। इ
दं प्रार्थनं मुक्तो मुख्यमन्यद्गृहस्थपचार इत्याह ॥ नित्यं मुक्तौ वेति ॥३॥१८॥

व्यास

३८

वेदा यः। आकाशे। यः असौ। वरुणः। अंतरिक्षेण। सप्तम्यर्थे तृतीया। आकाशावविवक्षाभेदेनाधिकरणस्यैव करणत्वमिति वा। पततां ग
च्छतां। वीनां। पक्षिणां। पदं। वेद। वेत्ति। कथमेतत्। सूक्ष्मविज्ञानात्। तथा। यः। समुद्रियः। समुद्राश्रा द्युः। समुद्रगः। अब्धिगः। जले। ना

वेदा यो वीनां पदमन्तरिक्षेण पततां ॥ वेद नावः समुद्रियः ॥२॥१७॥ वेद। यः। वीनां। पदं। अंतरिक्षेण। पततां। वेद। नावः। समुद्रि
यः ॥३॥१७॥ आकाशे पक्षिणां पदं ॥ वेत्त्यसौ सूक्ष्मविज्ञानात्तथा नावो जलेऽब्धिगः ॥ मुक्तानां च स्थितिं वेद ज्ञानस्य च परां गतिं ॥
क्षीराब्धिशायनो विष्णुः ॥२॥१७॥ टीका ॥ वः। पदं। वेद। तदिति पूर्वेण संबंधः। ऋचं प्रकारांतरेण व्याख्याति ॥ मुक्ता
नां चेति ॥ यः। समुद्रियः। समुद्रेभवः। क्षीराब्धिशायनो विष्णुः। अंतरीक्ष्यत इति अंतरिक्षं परं ब्रह्म तेन। पततां। तत्प्रसादात् संसा
रादुत्पततां। वीनां विशिष्टानां मुक्तानां। पदं स्थितिं। वेद। नयंतीति नौः। ज्ञानं। तस्य ज्ञानस्य च। पदं। परां गतिं। मुख्यं विषयं स्वस्वरूपं वेद ॥२॥१७॥

नयं। स्तंभयंति। यं। वरुणं। दिप्सवः। दंभितुमिच्छवः। इच्छयाकरणमुपलक्ष्यते। स्तंभकाः। वीराअपिराक्षसाइतियावत्। नदिप्संति। अत्राप्युपलक्षणं। नस्तंभयंति। किंच। जनानां। द्रुह्वाणः। द्रोहिणः। द्रुहविजिघांसायां। अन्येभ्योपिद्रुह्यंत इति क्वनिप्। दैत्याः। यं। नदिप्संति। यस्मैनद्रुह्यंतीतिवा। जनानामितिदिप्सवइत्यत्रापि संबध्यते। अभितयः। शत्रवश्च। राक्षसेभ्यो दैत्येभ्यश्चान्ये। यं। देवं। नदिप्संतीत्यादियोग्यक्रियान्वयः। यच्छब्दस्यपूर्वेणपरेणवासंबंधः॥४॥१८॥ उतयः। असमंच। यः। वरुणः। असामि। समशब्दपर्यायःसामिशब्दः। नविद्यते सामि यस्य। यद्वा समममस्योत्ती॥

नयंदिप्संतिदिप्सवोनद्रुह्वाणोजनानां॥ नदेवमभिमातयः॥४॥१८॥ न। यं। दिप्संति। दिप्सवः। न। द्रुह्वाणः। जनानां। न। देवं। अभिऽमातयः॥४॥१८॥ स्तंभयंतिनयंवीराःस्तंभकाअपिराक्षसाः॥ जनानांद्रोहिणोदैत्याः शत्रवश्चाभिमातयः॥४॥१८॥ उतयो मानुषेष्वायशश्चक्रेअसाम्या॥ अस्माकमुदरेष्वा॥५॥१८॥ उत। यः। मानुषेषु। आ। यशः। चक्रे। असामि। आ। अस्माकं। उदरेषु। आ॥५॥१८॥ असमंचयशश्चक्रे योस्माकंहृदयेषुच॥ आमनुष्येषुचान्येषुसमंतादात्मनःसदा॥ अज्ञेष्वपिचमर्त्येषुव्यतनोदात्मनोयशः॥५॥१८॥

तिसमि। असामि। असमं। आत्मनः। यशः। अस्माकं। उदरेषु। सामीप्याध्दृदयेषु। आसमंतात्। सर्वस्मिन्काले। सदाचक्रे। अस्मान्स्वयशोविदश्चक्रे। नकेवलमस्मास्वेव। अन्येष्वपि। आ। सम्यक्भूतेषु। मानुषेषु। आसमंतात्। चक्रे। आद्यश्चशब्दोवरुणस्यक्रियासमुच्चये। अन्यावितरेतरसमुच्चये। उतशब्दस्यकेमुत्यार्थस्यतात्पर्यमाह॥ ज्ञानेष्वपीति। किमुत। देवादिषु। अस्यापिपूर्ववत्संबंधः॥५॥१८॥

व्यास

३९

परामे॥ महाज्ञानं॥ मे। मम। धीतयः। बुद्धिविशेषाः। इच्छंतीः। इच्छंत्यः। निःश्रेयसमितिशेषः। उरुचक्षसं। महाज्ञानंपरमेशानं। परा। सर्वतः। सर्वंपरित्यज्य। यंति। यांति। तमेव इच्छंत्य इतिवा। किमिव। गव्यूतीः। गवाम्हतयः॥ आह्वानानि। गव्यूतयः। ताः। श्टंगस्वरान्। अनुप्र

परामेयंति धीतयो गावोन गव्यूतीरनु॥ इच्छंतीरुरुचक्षसं॥१॥१९॥ परा। मे। यंति॥ धीतयः। गावः। न। गव्यूतीः। अनु। इच्छंतीः। उरुऽचक्षसं॥१॥१९॥ महाज्ञानंपरेशानमिच्छंत्योममधीतयः॥ सर्वतोयांतियद्वच्चगावः श्टंगस्वराननु॥१॥१९॥ संनुवोचावहैपुनर्यतोमेमध्वाभृतं॥ होतेवक्षसेप्रियं॥२॥१९॥ सं। नु। वोचावहै॥ पुनः। यतः। मे। मधु। आऽभृतं। होताऽइव। क्षदसे। प्रियं॥२॥१९॥ आहृर्णंमधुमोक्षस्थंस्फुरखंपचसिमेग्निवत्॥ तत्संवोचावहैभूयःप्रियस्त्वंममयत्सदा॥२॥१९॥

ति। गावोन। गावोयद्वत्। तथा॥१॥१९॥ संनु। आपूर्णं। यतः। त्वं। होतेव। अग्निवत्। अग्निर्यथोदनादिकंपचतितथा। मे। मदीयं। आभृतंमधु। आहृर्णंमधु। मोक्षस्थंस्फुरखं। क्षदसेपचसि। व्यक्तीकरोषीतियावत्। यत्। यस्माच्च। त्वं। ममसदा। प्रियं। प्रियः। तत्तस्मात्। नु। इदानीं। पुनर्भूयोभूयः। आवां। संवोचावहै। संभाषणंकरवावहै॥२॥१९॥

दर्शंनु ॥ अदर्शं । अहं । नु । इदानीं । विश्वदर्शतं । सर्वज्ञं । तं । वरुणंच । अदर्शं । अद्राक्षं । अधिक्षमि । क्षमामधिकृत्य । तृतीयार्थे सप्तम्यर्थे । भुविस्थि
तं ॥ रथं तदृथंच । तदीयंच अदर्शं ॥ सएवं दृष्टोवरुणः । एताः वेदरूपाः । मे गिरः । मे । ऋग्गिरः । जुषत । जुषतुच । आकर्णयतु ॥ ३।१९॥

दर्शंनु विश्वदर्शतं दर्शंरथमधिक्षमि ॥ एताजुषतमेगिरः ॥ ३।१९ ॥ दर्शं । नु । विश्वऽदर्शतं । दर्शं । रथं । अधि । क्षमी ॥
एताः । जुषत । मे ॥ गिरः ॥ ३।१९ ॥ अदर्शतंचसर्वज्ञंतद्रथंचभुविस्थितं ॥ ऋग्गिरोमेजुषतुच ॥ ३।१९ ॥ इमंमेवरुणश्रु
धीहवमद्याचमृळय ॥ त्वामवस्युराचके ॥ ४।१९ ॥ इमं । मे । वरुण । श्रुधि । हवं । अद्य । च । मृळय । त्वां । अव
स्युः । आ । चके ॥ ४।१९ ॥ त्वावनेच्छरहं चके ॥ प्रत्ययेयं ॥ ४।१९ ॥
इमंमे ॥ त्वावनेच्छः ॥ हेवरुण मे इमं हवं । इदमाह्वानं । श्रुधि । शृणु । अद्यच । अद्यैव । मृळय सुखय । रक्षवा । मां । कुतः । अवस्युः ।
अवनेच्छः । अवः शब्दस्य क्यजंतस्येदं रूपं । अहं । त्वा । त्वां । आचके । प्रत्ययेयं । दृष्टवानस्मि । चकतृप्ता विलसस्य दर्शनार्थत्वं ॥ ४।१९ ॥

बिभ्रत् । अतिद्रुत । वरुणः । द्रापिं । द्रुगतौ । आप्लृ व्याप्तौ । आभ्याम् इकारप्रत्ययः । आद्यस्यचाकारः । द्रुतमाप्नोतीति द्रापिः । तं द्रापिं । अ
तिद्रुतभ्रमं । हिरण्ययं । हितंचरमणीयंच हिरण्मयंवा ॥ निपातनात्साधुः । ततश्चवर्णतः स्वर्णं । स्वर्णसदृशं । चक्रं । ऋदर्शनं । बिभ्रत् । अबिभृ
त् । विकरणव्यत्यासोद्विर्वचनं छांदसं । क्वचनव्यत्यासोवा । अबिभः । शत्रंतत याप्युपपन्नमितिचेत् । सत्यं । प्रकारांतरमेतत् । किंचानिर्णि

बिभ्रद्द्रापिंहिरण्ययंवरुणोवस्तनिर्णिजं ॥ परिस्पशोनिषेदिरे ॥ ३।१८ ॥ बिभ्रत् । द्रापिं । हिरण्ययं । वरुणः । वस्त । निःऽनिजं ॥
परि । स्पशः । नि । सेदिरे ॥ ३।१८ ॥ अतिद्रुतभ्रमं ॥ हितंचरमणीयंचचक्रं स्वर्णं चवर्णतः ॥ अविभ्रच्चस्व निर्णिक्तं शुध्दंव
स्त्रमवस्तच ॥ अविज्ञातचरा देवाः पश्वास्तस्यानिषेदिरे ॥ परितोवरुणः पात्रामबिभ्र द्रुतबंधनं ॥ ३।१८ ॥
जं । निर्णिक्तं । णिजिर शौचे । शुध्दं वस्त्रमितिशेषः । वस्त । अवस्त । आच्छादितवान् । स्पशः । अविज्ञातचरः देवाः परि । तस्य । तं । वरुणं ।
परितः । निषेदिरे ॥ सेवायै निषण्णाः ॥ प्रसिध्दवरुणेयोजयति ॥ वरुणइति ॥ प्रसिध्दोवरुणः । द्रापिं । पूर्ववत् । द्रुतबंधनमितियावत् । पात्रामबि
भ्रदिति ॥ ३।१८ ॥

वसिष्वेतिदशर्चं सूक्तं ॥ अष्टमं नेमि त्रयोदशर्चं । तत्रांत्या दैवी । तां विहाय द्वादिशर्चं तैर्देवतामाह ॥ अथेति ॥ अग्निगोचरैः । अग्नियोग्यैः । वसिष्व । सर्वदेवानां । यद्वा
सर्वदेवानामित्यादिशब्दः शेषस्यैव विशेषणं ॥ वसिष्वेत्याद्येव व्याख्यानं ॥ हे मियेध्य । नित्यमेध्य । सदापवित्र । मध्येभवत्वा ऊर्जां । ऊर्ज बलप्राणनयोः करणे
क्विप् । बलादिकारणानां भोग्यान्नानां वैशिष्ट्यद्योतनाय भोग्येत्युक्तं । ऊर्जं देवान्नमुद्दिश्य मितिवचनात् । यद्वा कर्तरि क्विप् । ऊर्जितानां बलादिमतां जनानां वा ।
सदापते । हरे । देव । अग्निगतेन रूपेण । सर्वदेवानां । पूजायै प्रोद्यतो भवन् । वस्त्राणि । वसिष्व । आच्छादय । वस्त्राच्छादनं विना प्रार्थनया सिद्धं । अह आह ॥ उत्तमेति ॥

वसिष्वा हि मियेध्य वस्त्राण्यूर्जांपते ॥ सेमं नो अध्वरं यज ॥ १।२०॥ वसिष्व । हि । मियेध्य । वस्त्राणि । ऊर्जां । पते । सः । इमं । नः । अध्वरं । यज ॥
॥ १।२० ॥ अथ स्तोत्रस्य निर्गं विहृत्य मग्निम्यग्निगोचरैः ॥ वचनैः सर्वदेवानां पूजायै प्रोद्यतो भवन् ॥ वसिष्वोत्तमवस्त्राणि भूषणैरप्यलंकुरु ॥ कु
र्वन्नुत्सवमत्यंतमस्मदीयमखं यज ॥ नित्यमेध्य हरे देव भोग्यान्नानां पते सदा ॥ ऊर्जितानां जनानां वा वस्मिन्नो अध्वरं यज ॥ रसयस्य ध्वनिश्रु
भेयेन तेनाध्वरो मखः ॥ १।२० ॥ टीका ॥ ॥ उपलक्षणमेतत् ॥ भूषणैरप्यलंकुरु ॥ आत्मानमिति शेषः ॥ एवमत्यंतमुत्सवं कुर्वन् ॥
त्वं । नः । अस्मदीयं । इमं । अध्वरं मखं । यज देहि । संप्रदानानुक्तेः । स्वबाक्यमेव विवृणोति । त्वस्मिन्निति ॥ संप्रदानस्याधिकरणत्वविवक्षा । अक्षय्यं ब्राह्म
णेदानमितियथा । नो अध्वरमिति प्रकृतिर्वैदानुकरणेन । यद्वा । नोऽध्वरं । यजेत्यनुवादेन त्वस्मिन्नस्मदीयं मखं यजेति व्याख्यानं । मखे अध्वरे शब्द निर्वक्ति
॥ रमयतीति । रुभोध्वा । स्वर्गादिमार्गः । तानं वा । तदंगभूतानां द्रव्याणामुपलक्षणमेतत् ॥ १।२० ॥

व्यास

निनः ॥ वचोनः । हे यविष्ठ । अग्ने । होता । वरेण्यः । त्वं । नः । अस्मदीयं । वचः । मन्मभिः । मनु ज्ञाने । ततः करणे मनिन् । मतिभिः बुद्धिवृत्तिभिः सह । सदादि
वित्मता । दिवित्मतया । तनोतेर्ड मतुप् । भावप्रधानं चेद् । तत्रस्थोपलक्षणं । अशेषदेवगत्वेन । सर्वदेवविषयत्वेनेतियावत् । नि । अत्यंतं । नय । प्र
वर्तय ॥ इतियोग्यक्रियाध्याहारः ॥ अग्नेर्यविष्ठत्वं कथमित्यत आह ॥ अवमइति ॥ उषाः स्वाहा च पर्जन्यो मित्रो ग्निर्वरुणो विधुः ॥ प्रवहो निरुधइंद्रो

निनो होता वरेण्यः सदा यविष्ठ मन्मभिः ॥ अग्ने दिवित्मता वचः ॥ २।२० ॥ नि । नः । होता । वरेण्यः । सदा । यविष्ठ । मन्मऽभिः ॥ अग्ने ॥ दिवित्म
ता । वचः ॥ २।२० ॥ वचो नो नितरां त्वं दिवित्मत्तया सदा ॥ अशेषदेवगत्वेन मन्मभिर्मतिभिः सह ॥ अवमो दशदेवेषु वह्निर्विस्मुक्त
तत्स्थितः ॥ २।२० ॥ आ हि ष्मा सूनवे पिता पिर्यजत्यापये ॥ सखा सख्ये वरेण्यः ॥ ३।२० ॥ आ ॥ हि ॥ स्म ॥ सूनवे । पिता । आपिः । यजति ॥
आपये । सखा । सख्ये । वरेण्यः ॥ ३।२० ॥ सख्ये च सूनवे मह्यमायजत्येष देवताः ॥ आपिः प्राप्यो मम स्वामीष्टत्यत्वान्मह्यमापये ॥ ३।२० ॥ ॥

मेरुद्रोबाणीवमारुतः इत्युक्तेषु दशदेवेष्ववमः । तस्माद्यविष्ठ इति शेषः । विष्णोत्युक्तकथं यविष्ठत्वमित्यत आह ॥ विष्णुस्त्विति ॥ यवीयसि तिष्ठती
तियवष्ठ इत्यर्थः । तदधीनत्वादर्थवदिति वा ॥ २।२० ॥ आ हि ॥ सख्ये च ॥ वरेण्यः । मम । पिता । एषः । अग्निः । सूनवे । मह्यं । मदर्थं । यद्वा । मम । सखा ।
एषः । सख्ये च । मह्यं । अथवा । आपिः । कर्मणी कारः प्राप्यः । मम स्वामीतियावत् । एषः भृत्यत्वात् । आपये । कर्तरी कारः । मह्यं । आयजति हि स्म । देवता इति शे
षः । नानाविधः संबंधो जीवेश्वरयोरनेनोच्यते ॥ ३।२० ॥

आनः॥ हेअग्ने। वरुणोमित्रोर्यमाइत्येवमादयः। रिशादसः। देवाः। नः। बर्हिः। आगत्य। सीदंतु उपविशंतु। मनुषः। मनुष्याः। यथा। तथा। प्रत्यक्षी
भूताः॥४॥२०॥ पूर्व्यहोतः। अस्यमे। हेपूर्व्य। पूर्वस्मिन्कालेभव। होतः अग्ने। अस्य। एवंस्तुवतः। सख्यस्यच। भावभवितोरभेदात्सख्युश्चनः।
मेअर्थे। मंदस्व। मदंकुरु। इमाः मदीयाः। गिरश्च। स्तु। श्रुधि। सम्यक् शृणु। उएव। मंदस्वेतिप्रकारांतरेणव्याख्याति॥ स्वातंत्र्यादिति॥ स्वातं

आनोबर्हिः रिशादसोवरुणोमित्रो अर्यमा॥ सीदंतुमनुषोयथा॥४॥२०॥ आ। नः। बर्हिः। रिशाऽदसः। वरुणः। मित्रः। अर्यमा॥ सी
दंतु। मनुषः। यथा॥४॥२०॥ पूर्व्यहोतरस्यनोमंदस्वसख्यस्यच॥ इमाउषु श्रुधीगिरः॥५॥२१॥ पूर्व्य। होतः। अस्य। नः। मंद
स्व। सख्यस्य। च। इमाः। ऊं इति। सु। श्रुधि। गिरः॥५॥२१॥ अस्यमेर्थेकुरुमदं स्वातंत्र्यान्मादनस्ववा॥५॥२१॥ यच्चिद्धिश
श्वतातनादेवंदेवंयजमहे॥ त्वेइद्धूयतेहविः॥ यत्। चित्। हि। शश्वता। तना। देवंदेवं। यजामहे। त्वेइति। इत्। हूयते। हविः।
शश्वद्विस्तरतः सर्वान्यदादेवान्यजामहे॥ तदात्वय्येवहिहविर्हूयते॥५॥२१॥ टी॰१॥ त्याकारणात्। णिचोंतर्णीतत्वेनमंदस्वे
त्यस्यमादयस्वेतिवार्थः। अस्मिन्पक्षे। अस्यनःसख्यस्येतिषष्ठ्यो द्वितीयार्थः। यद्वादेवानित्यध्याहारः॥५॥२१॥ यच्चित्। शश्वत्। शश्वता। शश्वत्। स
र्वेषु कालेषु। तना। विस्तरतः। सर्वदेवेषुचित्। अपि। यत्। यदा। देवंदेवं। सर्वान्देवान्। यजमहे। सर्वेवयं यजमानाः। तदा। त्वेइत्। त्वय्येव। हविः। हूय

त्वंविश्वस्य॥ त्वंच। मेधिरः। मेधावान्। मत्वर्थेइरः। हेमेधिर। यस्त्वमेव। विश्वस्यकृत्स्नस्य। जगतः। तस्यैव। प्रपंचः। दिवः स्वर्गस्यच। ग्मः। पृथि
व्याश्च। आकारलोपश्छांदसः। राजसि। राजाभवसि। सः। यामनि। काले। अस्माकमापत्कालेएव॥ प्रतिश्रुधि। विज्ञापनमाकर्ण्य। मोचयानि
त्वामितिप्रतिजानीहित्वा॥५॥१९॥ उदुत्तमंतात्पर्यमाह॥ सत्वमिति॥ हेवरुण। सः। एवंविज्ञापितः। त्वं। नः। अस्माकं। उत्तमं। पात्रं। सत्वगुणा

त्वंविश्वस्यमेधिरदिवश्चग्मश्चराजसि॥ सयामनिप्रतिश्रुधि॥५॥१९॥ त्वं। विश्वस्य। मेधिर। दिवः। च। ग्मः। च। राजसि॥
सः। यामनि। प्रति। श्रुधि॥५॥१९॥ त्वंचविश्वस्यराजाभवसिमेधिरः॥ मेधावान्ग्मःपृथिव्याश्चसकालेचप्रतिश्रुधि॥५॥१९॥
उदुत्तमंमुमुग्धिनोविपाशंमध्यमंचृत॥ अवाधमानिजीवसे॥६॥१९॥ उत्। उत्ऽतमं॥ मुमुग्धि। नः। वि। पाशं। मध्यमं। चृत॥
अव। अधमानि। जीवसे॥६॥१९॥ सत्वंत्रिगुणपाशान्नोमुमुग्धिछिंधिचांजसा॥६॥१९॥
ख्यं। उत्। अंजसा। मुमुग्धि। मुंच। स्फ हष्ट्वोदत्वा। मध्यमंच। रजोगुणनामकंपाशं। निचृत। चृतीहिंसायां। अंजसा छिंधि॥
उदासीनेभ्योदत्वा। अधमानिच॥ बंधनानि। तमोवृत्तिरूपाणि। जीवसे। जीवितुं। मुक्त्यर्थं। अवचृत। द्वियछोदत्वेति॥६॥१९॥

विश्वेभिः। हे अग्ने। विश्वेभिः सर्वैः। अग्निभिः सह। इमं। अस्मदीयं। यज्ञं। इदं वचश्च स्वीकुर्विति शेषः। चनो धा इत्यस्यार्थमाह॥ चन इति॥ धाः। अ
धाः। धेहि। सहसो यहो इत्येतदग्नौ विष्णौ च क्रमेण व्याख्याति॥ वायोरिति॥ अग्निरेव चेद्विवक्षितः। तदा सह सः। वायोः। यहो पुत्रेति व्याख्येयं॥ भग
श्चेत्तदा वायुनो व्यंग्य इति कृत्वा सहसो यहो इति संबुद्धिर्युक्ता॥ प्राणं वाव महान्सह ओजो बलमित्याचक्षत इति हि श्रुतिः॥ यद्वा द्रोपस्य नामस्कं

विश्वेभिरग्ने अग्निभिरिमं यज्ञमिदं वचः॥ चनो धाः सहसो यहो॥५॥२१॥ विश्वेभिः। अग्ने॥ अग्निऽभिः। इमं। यज्ञं। इदं। वचः॥
चनः। धाः। सहसः। यहो इति॥५॥२१॥ चनः स्कंधं धेह्यस्मास्कं वा योपुत्रोग्निरेवचेत्॥ भगवान्वायुना व्यंग्यः॥५॥२१॥ अश्वं न त्वा
वरवंतं वंदध्या अग्निं नमोभिः॥ सम्राजंतमध्वराणां॥१॥२२॥ अश्वं। न। त्वा। वारवंतं। वंदध्यै। अग्निं। नमःऽभिः॥ सम्ऽरा
जंतं। अध्वराणां॥१॥२२॥ वारवान्वाडवा मुखः॥ स्वदृष्टांतो हरेर्यस्माद्विष्णुः सवडवामुखः॥१॥२२॥

पठितः॥५॥२१॥ अश्वं न। अत्र वार नच्छब्दस्याभिधेयमाह॥ वारवानिति॥ अश्वं नेत्यस्य तात्पर्यमाह॥ स्वदृष्टांत इति॥ कुत इत्यत आह॥ यस्मादि
ति॥ सः अश्वः। वडवामुखश्च। विष्णुरेव यस्मात्तस्मात्स्वदृष्टांत इति॥ अहं। अध्वराणां। सम्राजंतं। इत्थानं। वरवंतं। अग्निं। त्वां। अश्वं न अश्वं त्वा
मिव। नमोभिः। नमस्कारात्मकैः। वाक्यैः। वंदध्यै। उत्तमपुरुषार्थे ध्यै। वंदे। यद्वा तुमर्थ एव ध्यै। तथा सति। प्रारभ इति क्रियाध्याहारः। नहत्स्मिव।

...॥१॥२२॥

व्यास

४२

सघ॥ सूनुः॥ सः॥ शवसा॥ षष्ठ्यर्थे तृतीया॥ शवसः बलरूपस्य। वायोः सूनुः॥ पृथुप्रगामा॥ गमेर्भावे अनिण्॥ पृथुविस्तृतं॥ प्रगाम॥ प्रकृष्टं ज्ञा
नं यस्यासौ तथोक्तः॥ पृथुज्ञानः॥ सः॥ अग्निः॥ नः॥ अस्माकं। सुशेवः॥ शोभनं शेवनं यस्माद्भवति स तथोक्तः॥ सुशेव कृत्॥ सुख कृत्॥ बभूयात्॥
भवेत्॥ द्विर्वचनं छांदसं॥ किंच॥ सघ॥ सएव॥ अस्माकं॥ मीढ्वान्॥ सेचकः॥ दाता॥ स्वामी च॥ बभूयात्॥ प्रकारांतरेण व्याख्याति॥ नः सूनुरिति॥

सघा नः सूनुः शवसा पृथुप्रगामा सुशेवः॥ मीढ्वाँ अस्माकं बभूयात्॥२॥२२॥ सः। घ॥ नः॥ सूनुः॥ शवसा॥ पृथुऽप्र
गामा॥ सुऽशेवः॥ मीढ्वान्॥ अस्माकं॥ बभूयात्॥२॥२२॥ सूनुः सन्नवसो वायोः पृथुज्ञानः सुशेव कृत्॥ सुखकृद्भवे
भवे। न्मीढ्वान्स्वामी नः सूनुरेव वा॥ व्यंग्यत्वाद्वायुना सार्धं सुशेवः सुखात्मकः॥२॥२२॥

नः सूनुरित्येव नायोज्यं॥ कथं विष्णोर्वायुसूनुत्वमृषिसूनुत्वं चेत्यत आह॥ व्यंग्यत्वादिति॥ वायुना ऋषिणा चेति शेषः॥ तर्हि शवसे
त्यस्य कथं संबंध इत्यत आह॥ वायुनेति॥ वायुना सार्धं सूनुरिति वा॥ मीढ्वान्बभूयादिति नायोज्यं॥ सुशेव इत्यस्यार्थांतरमाह॥ सुशेव इति॥२॥२२॥

सनः॥ आसात्॥ विश्वायुः॥ विश्वं सर्वं आयुर्यस्येति नित्यः॥ सः अग्निः॥ त्वं॥ नः॥ अस्मान्॥ सीदं सस्मिन्निति सदः शब्दः सदः शब्दपर्यायः॥ अ
ध्याहृत कर्मप्रवचनीय प्रतियोगो द्वितीया॥ सचवीप्सायां॥ इच्छन्दो वा तदर्थः॥ अतउक्तं॥ प्रति प्रति सद इति॥ सर्वेष्वपि स्थाने ष्विति यावत्॥
दूराच्च॥ दूरस्थाच्च॥ आसाच्च॥ समीपतश्च॥ अंतिकनामसु पाठात्॥ समीपस्थाच्च॥ अघायोः अघार्थयोः॥ आयुः शब्द समानार्थो यमायु
सनो दूराच्चासाच्च निमर्त्यादघायोः॥ पाहि सदमिद्विश्वायुः॥ ३।२२। सः॥ नः॥ दूरात्॥ च॥ आसात्॥ च॥ नि॥ मर्त्यात्॥ अघः यो॥
पाहि॥ सदं॥ इत्॥ विश्वऽ आयुः॥ ३।२२॥ आसात्समीपतश्चास्मानघार्थायोर्निपाहि च॥ प्रतिप्रति सदो नित्यो विश्वायुः॥ ३॥
॥२२॥ इममूषुत्वमस्माकं सनिं गायत्रं नव्यांसं॥ अग्ने देवेषु प्रवोचः॥ ४।२२॥ इमं॥ ऊं इति॥ सु॥ त्वं॥ अस्माकं॥ सनिं॥ गायत्रं॥
नव्यांसं॥ अग्ने॥ देवेषु॥ प्र। वोचः॥ ४।२२॥ त्वमिमां स्तुतिं॥ सनिं दानस्वरूपां च गायत्रीछंद आत्मिकान्॥ नव्यां संस्तुतिषु श्रेष्ठां वद देवेषु सादरं॥ ४।२२॥
शब्दः॥ यद्वागमनमायु शब्दं॥ तादर्थ्या सा छन्द्यं॥ मर्त्यात्॥ निश्चितं॥ पाहि च शब्दः प्रार्थना समुच्चये॥ ३।२२॥ इममूषु॥ त्वमिमां॥ हे अग्ने॥ त्वं अस्माकं॥ इमं
स्तवमिति शेषः॥ इमां स्तुतिं। सनिं। दानस्वरूपां। षणुदाने। देही सूपलक्षितमिति यावत्॥ गायत्रं। गायत्रीछंद आत्मिकां। नव्यांसं। नवतरां। अत्यंतापूर्वां। स्तु
तिषु॥ श्रेष्ठां॥ देवेषु॥ सुप्रवोचः। सादरं वद च देवान्प्रापयेति यावत्॥ उशब्दश्च शब्दार्थे॥ लकार व्यत्ययश्छांदसः॥ ४।२२॥

प्रियो नः॥ सप्रियः॥ विश्पतिः॥ विशां प्रजानां पतिः॥ मंद्रः॥ मंदतेः कर्तरि रिः॥ मदकरः॥ सुखकरः॥ वरेण्यः॥ होता॥ अग्निः॥ नः॥ प्रियः॥ अस्तु॥ सः एवंगु
णविशिष्टः॥ त्वं॥ नः॥ प्रियो भवेति यावत्॥ स्वग्नयः॥ शोभनोग्निर्येषामस्तीति तथोक्ताः॥ वयमपि॥ तस्य प्रियाः असाम॥ २।२१॥ स्वग्नयो हि॥ स्वग्न
यः॥ देवासः॥ देवाः॥ अस्मभ्यं॥ वार्यं॥ वरणीयं॥ वित्तं॥ दधिरे॥ दत्तवंतः॥ च शब्दात्पालयांबभूवुश्च॥ स्वग्नयः वयं च॥ तान्॥ मनामहे॥ मन्यामहे॥ अ
प्रियो नो अस्तु विश्पतिर्होता मंद्रो वरेण्यः॥ प्रियाः स्वग्नयो वयं॥ २।२१॥ प्रियः॥ नः॥ अस्तु॥ विश्पतिः॥ होता॥ मंद्रः॥ वरेण्यः॥ प्रि
याः॥ सुऽअग्नयः॥ वयं॥ २।२१॥ सप्रियो भव॥ मंद्रो मदकरः॥ २।२१॥ स्वग्नयो हि वार्यं देवासो दधिरे च नः॥ स्वग्नयो मनाम
हे॥ सुऽअग्नयः॥ हि॥ वार्यं॥ देवासः॥ दधिरे॥ च॥ नः॥ सुऽअग्नयः॥ मनामहे॥ ३।२१॥ अथान उभयेषाममृत मर्त्यानां॥
मिथः संतु प्रशस्तयः॥ ४।२१॥ अथ॥ नः॥ उभयेषां॥ अमृत॥ मर्त्यानां॥ मिथः॥ संतु॥ प्रऽशस्तयः॥ ४।२१॥ स्त्रीणां पुंसां चोभयवर्गिणां॥ ४।२१॥
स्मदीयं देवताभिपूजनं देवानां चास्मभ्यं वित्तदानादिकं सर्वमग्निनिमित्तकमिति॥ ३।२१॥ अथानः॥ स्त्रीणां॥ हे अमृत॥ अथ॥ अन्यच्च॥
उभयेषां॥ उभयवर्गिणां स्त्रीणां पुंसां च॥ नः अस्माकं॥ मर्त्यानां॥ मिथः॥ परस्परं॥ प्रशस्तयः स्तुतयः॥ संतु॥ संप्रीतिरस्त्विति यावत्॥ ४।२१॥

विभक्तासि ॥ क्षीराब्धे ॥ हे चित्रभानो ॥ त्वं । सिंधोः समुद्रस्य । ऊर्मौ । षष्ठ्यर्थे सप्तमी ॥ जातावेकवचनं । ऊर्मीणां । उपाके । अंतिकनामै

विभक्तासि चित्रभानो सिंधोरूर्मा उपाक आ ॥ सद्यो दाशुषे क्षरसि ॥ १ ॥ २३ ॥ वि ऽ भक्ता ॥ असि ॥ चित्रभा
नो इति चित्र ऽ भानो ॥ सिंधोः ॥ ऊर्मौ ॥ उपाके ॥ आ ॥ सद्यः ॥ दाशुषे ॥ क्षरसि ॥ १ ॥ २३ ॥ क्षीराब्ध्यूर्मिसमी
पस्थो मुक्तभोगविभागदः ॥ यजमानाय सद्यश्च क्षरस्यखिलमीप्सितं ॥ नित्यमुत्तमतेजस्त्वाच्चित्रभानुर्हरिस्स्मृ
तः ॥ १ ॥ २३ ॥

तत । स्थित इति शेषः । क्षीराब्ध्यूर्मिसमीपस्थः सन् । नः । विभक्ता । विभागकर्ता । मुक्तभोगविभागदः । असि । दाशुषे । यजमानाय । सद्य एव ।
अविलंबेन । क्षरसि । निस्यंददासि । अखिलमीप्सितमिति शेषः । चित्रभानुशब्दं हरौ निर्वक्ति ॥ उत्तमेति ॥ एतच्चोक्तस्मरणार्थं ॥ १ ॥ २३ ॥ व्यास

यमग्ने ॥ यं मर्त्यं ॥ हे अग्ने । विभो त्वं । यं । मर्त्यं । पृत्सु युत्सु । अध्यात्मं । ज्ञानाज्ञानात्मकेषु । तत्कर्तृके षेव युद्धेषु । अवाः । रक्षसि ॥ यमपि ॥
यंच । वाजेषु । अन्नेषु । जुनाः । जुन गतौ । गमयसि प्रेरयसि । स एव मर्त्यः । शश्वतीः । इषः अन्नानि । नित्यसत्सुखं मुक्तिगतं । यंता । यमिर

यमग्ने पृत्सु मर्त्यमवा वाजेषु यं जुनाः ॥ स यंता शश्वतीरिषः ॥ २ ॥ २३ ॥ यं ॥ अग्ने ॥ पृत्ऽसु ॥ मर्त्यं ॥ अवाः ॥ वाजे
षु ॥ यं ॥ जुनाः ॥ सः ॥ यंता ॥ शश्वतीः ॥ इषः ॥ २ ॥ २३ ॥ यं मर्त्यं रक्षसि विभो यं युत्सु प्रेरयस्यपि ॥ ज्ञानाज्ञानात्म
केष्वेव स गंता नित्यसत्सुखं ॥ भोगान्वा मुक्तिगान्नित्यानिह चेदुपचारतः ॥ २ ॥ २३ ॥

त्र गत्यर्थः ॥ गंता शश्वतीरिष इत्यस्य व्याख्यानांतरं नित्यान्भोगान्वेति । कथं भोगानां नित्यत्वं इत्यत उक्तं ॥ मुक्तिगानिति ॥ अग्निविषये
कथमिति चेत् ॥ ऐहिकभोगविषयं व्याख्यास्यामः ॥ कथमिह नित्यत्वमित्यत आह ॥ इहेति ॥ उपचारबीजं च बहुकालीनत्वं ॥ २ ॥ २३ ॥

नकिः। परिपूर्णः॥ संततबलः। सहंस्यः। सहइतिबलनाम॥ स्यइतितनोतेडर्यः। सहसा। बलेन। स्यः संततः। सहंस्यः। सहः शब्दस्य मुमागमः। यद्वा सहसः। वायोः पुत्र एवाग्निरितिसहंस्यः॥ स्यइत्यपत्यार्थेतद्धितः। हेसहंस्य। अस्य। यंमर्त्यमिति प्रकृतस्य। त्वदीयस्यतु। कयस्यचित्। कस्यचित्। श्रवाय्यः। श्रवणीयः॥ श्रुतिस्करवकृत्॥ स्कप्रसिद्धतमोपिवा॥ बहुपीतियावत्॥ वाजः भोगः॥ पर्येतप्रर्याप्तः॥ परिपूर्णः। नकिः नैवास्ति। महा

नकिरस्य सहंस्य पर्येता कयस्यचित्॥ वाजो अस्ति श्रवाय्यः॥३॥२३॥ नकिः॥ अस्य॥ सहंस्य॥ परि ऽएता॥ कयस्य॥ चित्॥ वाजः॥ अस्ति॥ श्रवाय्यः॥३॥२३॥ परिपूर्णोस्यनैवास्तित्वदीयस्यतुकस्यचित्॥ भोगोपिबहुलोयस्माद्दित्स स्येवपुनः पुनः॥ सहंस्यः संततबलः सहसः पुत्रएव वा॥ श्रवाय्यः श्रवणीयश्च स्कप्रसिद्धतमोपिवा॥३॥२३॥ ६७॥

नपि भोगस्त्वद्भक्तानां परिपूर्णोनभवतीत्येतदुपपादयति॥ यस्मादिति॥ दित्ससि। ददासिच। यतोमहाभोगान्। पुनःपुनस्तेभ्योददासितस्मात्तेषां नकोपिभोगोंतिमइतिभावः। यद्वा। यस्मात्। पुनःपुनः। इतिउच्च मोक्षभोगं ददासि। तस्माद्बहुलोपिसांसारिकभोगः तेषांनपरिपूर्णः। तुछ एवेति॥३॥२३॥

व्यास ४६

आनः॥ उत्तम॥ हे अग्ने। त्वं। परमेषुवाजेषु। अन्नेषु। नः अस्मान्। आभज॥ तथा मध्यमेषु। वाजेषु। नः आभज॥ अत्र परममध्यमग्रहणमधमानामप्युपलक्षणं॥ तथा वाजग्रहणंसर्वभोगानां॥ ततश्चोत्तमाधममध्यमेषु भोगेष्वस्माभिर्भुज्यमानेषु सत्स्वत्वमस्मान् रक्षकत्वे

आनोभज परमेष्वाजेषु मध्यमेषु॥ शिक्षावस्वो अंतमस्य॥५॥२२॥ आ॥ नः॥ भज॥ परमेषु॥ आ॥ वाजेषु॥ मध्यमेषु॥ शिक्ष॥ वस्वः॥ अंतमस्य॥५॥२२॥ उत्तमाधममध्येषु भोगेष्वस्मानवाप्नुहि। रक्षकत्वेन शिक्षास्मान् ज्ञानवस्त्वर्थमेवच। अंते मोक्षे मितत्वेन ज्ञानमंतममुच्यते॥५॥२२॥

नावाप्नुहि। त्वद्रक्षिता वयं सर्वभोगभोक्तारो भूयास्मेत्यर्थः भवति॥ तथांतमस्य। ज्ञानलक्षणस्य। वस्वः वसुनः। चतुर्थ्यर्थेषष्ठी। ज्ञानवस्वर्थंच॥ अस्माशिक्षयेतियावत्॥ इदमेवमुख्यंप्रार्थ्यं॥ नतुभोगाइत्येवशब्दः॥ अंतमशब्दस्य ज्ञानवाचित्वंकथंइत्यतआह॥ अंतइति॥ अंतेसंसारस्येतिशेषः॥ तस्यार्थेमोक्षइति॥ तादर्थ्येसप्तमी॥ मोक्षसाधनतयेतियावत्। मितत्वेन प्रमितत्वेन॥ आतोनुपसर्गेकः॥५॥२२॥

सवाजं ॥ वाजंतारयिता ॥ अग्ने ॥ सः प्रकृतः । त्वदीय एव । विश्वचर्षणिः । सर्वप्रजाधिपो भूत्वा । दानेन गवांबलीवर्दानांसमाप्तत्वात् ॥ अर्वद्भिः । अ
वैः । वाजमन्नं । तरुता । तारयिता । तरतिरत्रानयत्यर्थे । आनेता । अस्तु । भवेतु । त्वद्भक्तः श्यकवतः भवतु । अर्थिभ्यो गाश्च ददातु ॥ यथा गोदानेधान्या
नयनादिकमश्वैरेव कुर्यात्तथेत्यभिप्रायः ॥ किंच ॥ विप्रेभिः । विप्रैः । करणैः । सनित्ता । दाता । अस्तु ॥ कुतः । विपुलदानतः । तावद्विपुलदाता भवतु ॥

सवाजंविश्वचर्षणिरर्वद्भिरस्तु तरुता ॥ विप्रेभिरस्तु सनिता ॥ ४ ॥ २३ ॥ सः ॥ वाजं ॥ विश्वऽ चर्षणिः ॥ अर्वत्ऽभिः ॥ अस्तु ॥
तरुता ॥ विप्रेभिः ॥ अस्तु ॥ सनिता ॥ ४ ॥ २३ ॥ वाजंतारयितानेता सोर्वद्भिर्गोसमाप्तितः ॥ त्वदीयस्तु भवेद्विप्रैर्दाताविपुल
दानतः ॥ युधस्यतारकोन्नस्यदाताभोग्यस्यवाभवेत् ॥ इंद्रियैस्तमसायुधंतरुता ज्ञानदोथवा ॥ ४ ॥ २३ ॥ छ ॥

यदेकस्यदातुमशक्यत्वेन विप्रान्करणीकुर्यादितिभावः ॥ प्रकारांतरेण व्याचष्टे ॥ युधस्येति ॥ सः त्वदीयः । विश्वचर्षणि भूत्वा । अर्वद्भिः अश्वैः ।
वाजं तरुता । युधतारकः । परगः । अस्तु । तथा विप्रेभिः । विप्रेभ्यः । वाजंसनित्ता । अन्नस्य भोगस्य वा दाता भवेदिति । प्रकारांतरेण व्याख्याति ॥ इंद्रियै
रिति । सः त्वदीयः विश्वचर्षणिः । बहुशिष्यः । अर्वद्भिः इंद्रियैस्त्वद्विषयैवाजं । तमसा युध्येन सह । यद्युधं । तस्य तरुता । अस्तु । तथा विप्रेभ्यः । सनिता ज्ञान

दुः ॥ अग्निमन्त्रार्थः ॥ ४ ॥ २३ ॥

जराबोध॥ स्तुतिबोधा॥ जरतिस्तुत्यर्थः। जरां स्तुतिं बुध्यत इति जराबोधः। हे जराबोध॥ यतः। त्वं जराबोधः। स्तुतिबोधा। तत्तस्मात् रुद्राय रुजां विद्रावका

श्री य। ईशाय। विष्णवे। तुभ्यं। दृशीकं स्तोमं। प्रत्यक्षामुच्चैः क्रियमाणां तां स्तुतिं॥ विविड्ढि। विशेषेण विढि। सर्वदाऽवधारय। त्वद्विषयामिमां स्तुतिं त्वमवधार

येत्यर्थः॥ ननु परमेश्वरः सर्वज्ञः तत्कथं विशेषस्तुतिबोधाक थ्यते। कथं च नित्यज्ञानो विविड्ढीति प्रार्थ्यत इत्यत आह॥ नित्येति॥ सर्वज्ञोपीत्यपिग्राह्यं। त

त्फलं स्तुतिफं। वेत्तास्तुतेः। विधीति प्रार्थ्यते चेत्यपि द्रष्टव्यं। किमर्थं। यज्ञियाय। यज्ञे भवाय। विशेविशे। सर्वस्मैजनाय। तत्प्रयोजनसिध्यै॥ प्रसिधा

जराबोधतद्विविड्ढि विशेविशेयज्ञियाय॥ स्तोमं रुद्राय दृशीकं॥५॥२३॥ जराऽबोध। तत्। विविड्ढि। विशेऽविशे। यज्ञियाय। स्तोमं। रुद्राय। दृशी

कं॥५॥२३॥ स्तुतिबोधाय तत्स्तां त्वमवधारय सर्वदा॥ नित्यज्ञानोपि दत्वा तत्फलं वेत्तेति कथ्यते॥ रुजां विद्रावके शाय प्रत्यक्षां तव वा स्तुतिं॥५॥२३॥

ग्नोव्याख्याति॥ तवैवेति॥ अनेन रुद्रपदमत्राग्निविषयं॥ अन्यत्समानमित्युक्तं भवति। इन्द्रायेति वदता। शिवोप्यत्र रुद्र इति स्वचितं॥ अत्रेतिहासो भवति॥

अग्निः स्तूयमानः शुनः शेपमुवाच रुद्रं स्तुहि। रौद्राहि पशवश्च इति। स तं प्रत्युवाच नाहं जानामि रुद्रं स्तोतुं त्वमेव तं स्तुहीति॥ तदिदमुच्यते॥ जराबोधेति॥ रु

द्रस्तुतिवचनः। तत्तस्मात् एव॥ यज्ञियाय। विशेविशे। आदरार्थं द्विर्वचनं॥ मह्यमिति यावत्। रुद्राय रुद्रस्य। स्तोमं। त्वमेव। विविड्ढि। कुर्विति यावत्॥५॥२३॥

सरेवान्॥देवानां।विश्पतिरिव।राजा यथा।तथा देवान्॥वित्तवान्।दैव्यः।देवसंबंधी।केतुः।देवानां केतुभूतः॥अग्रगामित्वात्।बृहद्भानुः।बृहत्ते
जाः।सः।असावग्निः।नः।अस्मदीयानि।उक्थैः।उक्थानि च॥शृणोतु॥२॥२४॥नमः।अथ।देवाः स्तूयंत इति शेषः।अत्र महदादिशब्द निर्दिष्टा
न्देवानाह॥नारायणेति॥बहुस्वरूपाश्वेत्यनेनाशिनशब्दो बहुवाची स्मृक्तं॥नम आदुभ्य इति पु॰राणसमाख्यानात्।एतेनार्भकत्वादिनोक्ताए

सरेवाꣳ इव विश्पतिर्दैव्यः केतुः शृणोतु नः॥उक्थैरग्निर्बृहद्भानुः॥२॥२४॥सः।रेवान्ऽइव॥विश्पतिः॥दैव्यः।केतुः॥शृणोतु॥नः॥उ
क्थैः॥अग्निः॥बृहत्ऽभानुः॥२॥२४॥देवानां केतुभूतोसौ सोवित्तवान्विश्पतिर्यथा॥अस्मदीयानि चोक्थानि बृहत्तेजाः शृणोतु॥२॥२५॥
नमो महद्भ्यो नमो अर्भकेभ्यो नमो युवभ्यो नम आशिनेभ्यः॥यजाम देवान्यदि शक्नवाम मा ज्यायसः शंसमावृक्षि देवाः॥३॥२४॥नमः।महत्ऽ
भ्यः।नमः।अर्भकेभ्यः।नमः।युवभ्यः।नमः।आशिनेभ्यः।यजाम।देवान्।यदि।शक्नवाम।मा।ज्यायसः।शंसं।आ।वृक्षि।देवाः॥३॥
॥२४॥अथ नारायणाब्रह्मपुरःसरशास्तदेवा महांतः शिशवः स्कंदशर्वाः॥बहुस्वरूपास्त एव कुत्रचिद्युवान इंद्रादय एत एव॥
व॥स्कंदशर्वा इत्युक्तानेवेंद्रादय इति परामृशति॥कथमेकत्रैव त्रिप्रकारत्वमित्यत उक्तं कुत्रचिद्रूपविशेष इति॥एतदुक्तं भवति।नारायणादय इंद्रांता अवांतर
पित्रादिसंबंधप्रसिद्धिशून्याः महांतः शिवादिपित्रादिसंबंधवत्त्वेन प्रसिद्धाः स्कंदेंद्रादयो र्भकाः।त एव रूपविशेषे युवान आशिनाश्चेति।एतेन नारायणादीनां
जरित्वात्कथं महत्त्वमित्याशंकाप्यपास्ता भवति।युवत्वेपि प्रकारभेदेन महत्त्वायुक्तेः॥

व्यास ४८

प्रकारांतरेण यूनामपि नारायणादीनां महत्त्वं व्याख्याति॥महत्त्वमिति॥यूनामप्येषां महत्त्वं युज्यते॥यतो गुणतो महत्त्वमुच्यते न जरसेत्यर्थः॥तर्हि
वयःप्रकरणविरोधः स्यादित्यतो युवत्वादिकमपि गुणत एवेत्याह॥इंद्रादय इति॥तएव॥तदीयैः स्वैः स्वैः॥अपेक्षिकाल्पैः गुणैः॥

महत्त्वमेषां गुणतोपि यूनामिंद्रादयो मध्यगुणा युवानः॥अपेक्षिकाल्पैश्च गुणै
स्तदीयैः समीरिता आशिना अर्भकाश्च॥कृतं नमः॥८॥

आशिना अर्भकाश्च समीरिताः॥नारायणवदनंतगुणत्वस्यास्मदादिवदल्पगुणत्वस्य चाभावान्मध्यमगुणत्वाद्युवान एवें
द्रादयः।ब्रह्मादीन्मध्यमगुणान् यूनोपेक्ष्याल्पगुणत्वादस्मदादिभ्योल्पगुणेभ्योधिकगुणत्वादाशिनाः।नारायणादिभ्यो॰ल्पगुणत्वाद
र्भका इति॥एवं महदादिपदार्थानुक्त्वा पूर्वार्धवाक्यार्थमाह॥कृतमिति॥महदादिभ्यो देवेभ्यः॥नमः।अस्माभिर्नमस्कृतं॥

उत्तरार्धं व्याख्याति॥ शक्तिमंत इति॥ देवैर्यूपाः न्मोचिताः। वयं यदि शक्नुवाम। यजने शक्तिमंतो भवाम। तर्हि देवान्यजाम। शक्त्य भावे पि ज्यायसो ज्यायसां देवानां॥ शंसे॥ शंसनं स्तुतिमात्रं। मा वृक्षि॥ वृश्च्युछेदने इत्यस्येदं रूपं॥ न लुपामः। न लुप्तं करि — म॥ हे देवा

शक्तिमंतो यजाम न ज्यायसां स्तुतिमात्रं लुपाम॥ एकस्य विष्णोरपि रूपभेदा अपीयां

सः संत्यथवा महांतः॥ युवत्व साम्येपि महत्वभेदाद्युवा महानिशपिभेद उक्तः॥३॥२४॥

इति अस्त्वेवं महत्वादिव्याख्यानं यदा समस्ता देवा विवक्षिताः स्युः॥ यदा तु विष्णुरेकस्य विवक्षितः॥ तदा कथमित्यत आह॥ एकस्येति॥ रूपभेदाः॥ रूपविशेषाः॥ वा शब्दान्मध्यम प्रकारद्वयोपेताः। ततः किमित्यत आह॥ युवत्वेति॥ महत्वभेदात्। परिमाणभेदात्। अपि शब्दे नाभकाग्निनयोः समुच्चयः॥३॥२४॥

व्यास ४९

सनः॥ नितरां। अनिमा निशब्दार्थविदुन्तस्य महछब्देन गतार्थतां वारयति॥ नितरामिति॥ यद्यपि नीतिमान शब्देन समस्तं। तथापि साम र्थ्यान्नत्रर्थेन संबध्यते॥ महत्वं ह्यापेक्षिकं भवति। अतो नितराममानत्वेनत द्व्याख्याति मित्यर्थः। पुरुश्चंद्रः॥ चदे शल्हादमार्थत्वात्पुरुस्कस्वः। पारस्करादित्वात्॥ सइति प्रसिद्धः॥ उत्तरत्र पुनः सइति श्रवणात्॥ यद्वा॰ निमा निवादि विधानेन भिन्न वाक्यत्वार्थं द्विः साइत्युक्तं। तेन च शब्दश्च समर्थितः॥ धूमः केतुर्यस्येत्यन्ने धूमकेतुत्वं प्रसिद्धं॥

सनो महा २ अनिमानो धूमकेतुः पुरुश्चंद्रः॥ धियेवाजाय हिन्वतु॥३॥२४॥ सः॥ नः॥ महान्॥ अनि॰ मानः॥ धूम॰ केतुः॥ पुरु॰ चंद्रः॥ धिये॥ वाजाय॥ हिन्वतु॥३॥२४॥ नितराममितत्वेन महान् पुरुस्करवश्च सः॥ धूत्करोति गरुत्मान्यस्य रेश्चे धूमकेतुता॥ ता छील्ये मद्गति यस्मात्तत्रा धूमइतीरितिः॥ ज्ञानायान्नाय च सनः प्रहिणोतु स्वकर्मणां॥३॥२४॥

हरेस्तु कथमित्यत आह॥ धूत्करोतीति॥ हरेश्चेद्धूमकेतुता विवक्षिता तदा धुञ्कंपन इत्यतस्ताच्छील्ये मद्गत्यस्मात्तत्रा ताच्छील्य विशिष्टे कर्तरि मप्रत्यये कृते यस्माद्धूत्करोति तस्माद्गरुत्मान् धूमइतीरितः॥ सकेतुर्यस्येति व्याख्यातेत्यमित्यर्थः॥ सः एवंभूतः अग्निः॥ नः। अस्मान्। धियेवाजाय ज्ञानाय अन्नाय च॥ हिन्वतु॥ स्वकर्मणां करणे प्रहिणोतु॥ येः कर्मभिर्धरमंतो। वाजिवंतश्च स्याम तत्र प्रेरयतु॥३॥२४॥ ७॥

यत्र ग्रावा ॥ नवर्चमिदं सूक्तं ॥ तत्रा द्याश्चतस्रऐं द्रः ॥ विमुक्तपाशः शुनःशेपः एताभिर्जुहवांचकार ॥ विस्तीर्णे ॥ हे उलूखल ॥ स्वीकृतस्त्वं ॥ इंद्र ।
यत्र यज्ञे । पृथुबुध्नः । जातावेकवचनं । पृथुर्विस्तीर्णो बुध्नो मूलभागो येषां ते तथोक्ताः विस्तीर्णा धवं स्तनाः । भागशब्दो ध्याहार्यः । ऊर्ध्वः ऊर्ध्व
देशसंबंधाः अभिषवोद्धृताः ॥ सोमाभिषवे ऋत्विग्भिरुद्धृताः । ग्रावाग्रावाणः सोतवे सोमं सोतुं भवंति संतु । तत्रोलूखलसुतानां द्वितीयार्थे

यत्र ग्रावा पृथुबुध्न ऊर्ध्वो भवति सोतवे ॥ उलूखलसुतानामवेद्विंद्र जल्गुलः ॥ १ ॥ २५ ॥ यत्र । ग्रावा । पृथुऽबुध्नः । ऊर्ध्वः । भवति ।
सोतवे । उलूखलऽसुतानां ॥ अव । इत् । ऊं इति । इंद्र । जल्गुलः ॥ १ ॥ २५ ॥ विस्तीर्णाधस्तना यत्र ग्रावाणोभिषवोद्धृताः ॥
धिषणाभिषुतान्सोमानवनः स्वीकृतस्त्वं ॥ गुर स्वीकार इत्यस्माद्धातोस्त्वं सोहि जल्गुलः ॥ १ ॥ २५ ॥
षष्ठी । उलूखलसुतान् । धिषणाभिषुतान् । धिषणं धिषण्य इत्युलूखलनाम । नो अस्मदीयान् । सोमानिति शेषः । अवेदु । अवतिरवार्थः ।
इत् । उ इति निपातावधारणे ॥ सर्वथैवानुहि ॥ जल्गुल इत्येतत्कथं स्वीकृतस्त्वमिति वदेद्धितस्तदाह ॥ गुरेति ॥ अस्माद्धातुर्व्याख्यानात्स्यः स्त्व
तः स्वीकर्ता जरति स्तावत्स्तुत्यर्थः । ततोभवे संपदादिलक्षणः क्विप् । गुर तेश्च कस्तन् । उभयत्रापि रोल इति विभागेन रेफस्य लकारः । जरं गुरतीति जल्गुलः ।
तस्य संबुद्धिर्जल्गुलः । जल्गुल इति संबोध्य इति शेषः ॥ १ ॥ २५ ॥

यत्र द्वौ। पूर्वार्धे तात्पर्यमाह ॥ फलकेति ॥ अत्र सोमाभिषवस्य हेतू फलके स्त्रियोर्जघनसाम्येनप्रोक्ते। अत्र स्त्रीग्रहणाभावेप्युत्तरत्र नारीग्रहणा त्स्त्रिय इति लभ्यते। मैथुनकाले स्त्रीपुंसजघनाविति व्याख्याननिरासायैव शब्दः। फलकयोरुत्तराधरभावाभावात्॥ अधिषवणीशब्दस्य फलकप

यत्र द्वाविव जघनाधिषवण्या कृता ॥ उलूखलसुतानामवेद्विंद्र जल्गुलः ॥२॥२५॥ यत्र ॥ द्वौऽइव ॥ जघना ॥ अधिषव
वन्या ॥ कृत ॥२॥२५॥ फलके भिषवस्यैव स्त्रियोर्जघनसाम्यतः ॥ प्रोक्ते ॥ २॥२५॥

वप्रसिद्धस्योलूखलस्याप्योर्व्याख्यातुमयुक्तत्वात्। जघनैकदेशयोर्जघनशब्दस्य वृत्तेर्द्वित्वादि चोपपद्यते। यत्र यज्ञे। द्वौ जघनाविव। अधिषवण्यौ। अधिषूयते। सोमएतयोरिति॥ द्वे फलके कृते। कृते। तत्रोलूखलसुतानामिति पूर्ववत्। फलकयोरेवाधिषवणीत्वात्। उलूखलसुतानामिति सर्वत्रोपचारः॥२॥२५॥

यत्रमंथां ॥ मंथरश्मीन् । यत्र यज्ञे । रश्मीन् । उलूखलस्येति शेषः । इत्यांतरेण । दार्ढ्याय । विबध्नते । किमिव । मंथां । मंथनं । यमितवा इव ॥

यत्र मंथां विबध्नते रश्मीन्यमितवा इव ॥ उलूखल सुतानामवेद्विंद्र जल्गुलः ॥ ४ ॥ २५ ॥ यत्र ॥ मंथां ॥ विऽ
बध्नते रश्मीन् ॥ यमितवेऽइव ॥ उलूखलऽसुतानां ॥ अव ॥ इत् ॥ उं इति ॥ इंद्र ॥ जल्गुलः ॥ ४ ॥ २५ ॥
मंथरश्मीनश्वरश्मीन्यथा यत्र निबध्नते ॥ रश्मयोन्यत्र नाड्यश्च ॥ ४ ॥ २५ ॥

नियंतुं । यथा । मंथरश्मीन् । यथा अश्वं नियंतुमश्वरश्मीन् स्तंभादौ ॥ विनिबध्नंति ॥ तथा ॥ तत्रोलूखलसुतानां ॥ अध्यात्मके रश्मय इत्यत
आह ॥ रश्मय इति ॥ अन्यत्र वा द्यात् । च स्त्वर्थः ॥ ४ ॥ २५ ॥

व्यास
५१

यच्चित् । इयमुत्तरो चौलूखलो ॥ यस्मात् । हे उलूखलक । स्वार्थेकः । यद्यस्मात् । त्वं । गृहेगृहे । चित् अपि । सर्वेष्वपि एतद्यजमानानुष्ठितगृहेषु ॥ अथवाध्यात्मं । देहेदहे । युज्यसे । युक्तो वर्तसे । पूज्यत इति शेषः । हि । तेन कारणेन । इह यज्ञे । जयतामिव दुंदुभिः । जयतां पुंसां दुंदुभिवत् । द्युमत्तमं प्रकाशवत्तमं उच्चै
रितिया वत् । वद । ध्वनिं कुरु । कथमचेतनस्योलूखलस्यैवं प्रार्थनमित्यत आह ॥ पृथिवी ॥ति ॥ तस्य । उलूखलस्य । तद्भुतः । पृथ्वी गतः । वनस्पतिरिति ना
ह्नेनरितः । सोमस्यामासोपि ॥ अपरः । उलूखलस्य देवः । वनस्पतिरितीरितः इत्यनेन द्वितीयायामृचि वनस्पतई इत्युक्तार्थं भवति । आयजी इति द्वे

यच्चिद्धि त्वं गृहेगृह उलूखलक युज्यसे ॥ इह द्युमत्तमं वद जयतामिव दुंदुभिः ॥ ५ ॥ २५ ॥ यत् ॥ चित् ॥ हि ॥ त्वं ॥ गृहेऽगृहे ॥ उलूखलक ॥ युज्य
से ॥ इह ॥ द्युमत्ऽतमं ॥ वद ॥ जयतांऽइव ॥ दुंदुभिः ॥ ५ ॥ २५ ॥ यस्माद्युक्तो गृहे गृहे ॥ देहे देहे थवा तेन द्युमद्दुंदुभिवद्वद ॥ पृथिवी देवता तस्य तद्भु
तो वा स्वयं हरिः ॥ सोमामासोपरो देवो वनस्पतिरितीरितः ॥ सोमो वा तद्भुतो विष्णुः श्रुतः फलकदेवता ॥ वृक्षाणामपि सर्वेषामतः ॥ ५ ॥ २५ ॥
चा उलूखलमुसलयोरिति केचित् । तदसत् । अधिषवण्योः प्रकृतत्वेन तयोरेव द्विवचनविषयत्वोपपत्तेः ॥ फलकयोरप्यचेतनयोः प्रार्थनादि संभवार्थं
प्रसंगाद्देवतामाह ॥ सोमोवेति ॥ अत्रापि सोमामा स्य इत्यस्य मनुवर्तते । तेन वनस्पती इति व्याख्यातं भवति ॥ सोमस्य तद्भुतस्य विष्णोश्च कथं वनस्पतित्वमित्यत आ
ह ॥ वृक्षाणामपीति ॥ देवतेतिवर्तते ॥ एवं पृथिव्यास्तद्भुतस्य हरेश्च वनस्पतित्वं समर्थनीयं ॥ अतः । मध्ये शीसास्फ चतस्य पृथुकं युक्तं इति शेषः । एतेन प्राग्देहस्यो
ह ॥ लूखलत्वमुक्तमिदानीं तु लूखलाधिकरणत्वमिति विरोधोपि परास्तः । पूर्वमचेतनस्येदानीं देवताया उलूखलशब्दोक्तत्वात् ॥ ५ ॥ २५ ॥ ॥

उतस्म ॥ वृक्षाग्रे ॥ हे वनस्पते ॥ उलूखल ॥ वातउत ॥ वायुस्त्क । वायुरपि । ते अग्रमित् । तदभिमतवृक्षाग्रएव ॥ विवाति ॥ विविधंवातिस्म । एवहूटनार्यथेव
प्राग्वृक्षायामपीस्त्क्तं ॥ विशेषोपूर्वार्धतात्पर्यमाह ॥ वनानामिति ॥ विष्णुस्त्क ॥ प्रसिद्धानांभजनीयत्वेनवनशब्दार्थानांदिवौकसांवापतिः तस्माद्वनस्प
तिरितिशेषः ॥ वनतेः कर्मण्यकारः ॥ देवइति प्रसिद्धवायुव्युदासार्थं ॥ अग्रेगछतीति ॥ सेवकइतियावत् ॥ यतएवं भिंद्रः स्वीयेनवातेनतदीयवृक्षाग्र

उतस्मतेवनस्पतेवातोविवात्यग्रमित् ॥ अथोइंद्रायपातवेसुनुसोममुलूखलः ॥ ६ ॥ २६ ॥ उत ॥ स्म ॥ ते ॥ वनस्पते ॥ वा
तः ॥ विवाति ॥ अग्रं ॥ इत् ॥ अथो इति ॥ इंद्राय ॥ पातवे ॥ सुनु ॥ सोमं ॥ उलूखल ॥ १ ॥ २६ ॥ वृक्षाग्रएवतु ॥ वायुर्वाति
वनानांवाभजनीयदिवौकसां ॥ पतिर्विष्णुस्त्क तस्याग्रे वायुदेवोहिगछति ॥ बपातवेस्वस्यसोमंवामनोवासुनुविष्णवे ॥ १ ॥ २६ ॥

मेवचालयति ॥ नतून्मूलयति ॥ अथोतस्मात् ॥ इंद्रेणोपकृतत्वादिति देवतांतरे ॥ विशेषणोतुयतएवंतमतिसमर्थः ॥ अथोतस्मात् ॥ इंद्राय प्र
सिद्धाय ॥ विष्णवेच ॥ षष्ठ्यर्थेचतुर्थी ॥ इंद्रस्यविष्णुंप्रतितु ॥ स्वस्यपातवेपानाय ॥ सोमंप्रसिद्धं ॥ बाह्यं ॥ अध्यात्मंमनोवासुनु ॥ ६ ॥ २६ ॥ ॥

व्यास ५२

यत्रनारी ॥ यत्रयज्ञेस्थितयोः फलयोः अपच्यवं ॥ अधोगमनं ॥ उपच्यवं ॥ उपरिगमनंच ॥ नारीतज्ज्ञघनयुगलमितियावत् ॥ शिक्षते उपादत्तेतस्या
पिगतावपच्यवोपच्यवसद्भावात् ॥ तत्रोलूखलस्रुतानां फलकयोः किंनिमित्तावुपच्यवापच्यवावित्यतआह ॥ उपच्यवश्चेति संगतिभेदतः फलकद्वयसं
योगस्यशीलत्वात् ॥ ततः प्रहारपर्यायेणेतिशेषः ॥ ऋकूत्रयगतान् शब्दान् अध्यात्मंव्याख्याति ॥ जिह्वेति ॥ ॥ वागिंद्रियमिहजिह्वेरूपलक्ष्यते ॥ वा
ग्युक्तिवचोमनसा ॥ वेदद्वारकोयोगः ॥ अथशब्दः समुच्चये ॥ कुतः तथा ॥ सादृश्यादितियावत् ॥ एवमुत्तरोपितेथाशब्दः सादृश्यंचयथासंभवंऊह्यं ॥ उरुः

यत्रनार्यपच्यवमुपच्यवंचशिक्षते ॥ उलूखलस्रुतानामवेद्विंद्रजल्गुलः ॥ ३ ॥ २५ ॥ यत्र ॥ नारी ॥ अप ऽ च्यवं ॥ उप ऽ च्यवं ॥ वा ॥ शिक्षते ॥ ३ ॥ २५ ॥
उपच्यवश्चापच्यवः संगतिभेदतः ॥ जिह्वाग्रावाथवाग्युक्तिरुच्यतेभववस्तथा ॥ खलश्चोरुस्तथादेवः सोमोमनइतीरितः ॥ ज्ञानोत्पत्तौचफ
लकस्थाने आस्ते उदीरिते ॥ ३ ॥ २५ ॥ टीका ॥ ॥ खलश्चदेहः ॥ उरुखलइतिवक्तव्येउरुः खलइतिवचने ॥ ऊर्ध्वंखलमस्येति
उलूखलशब्दव्याख्यानानिरासार्थंबहोरलाक्षणिकस्यांगीकारात् ॥ खं ब्रह्मिधान्यादिकं चूर्ण्यते ॥ तत्रखलशब्दोवर्तते ॥ तस्यचोरुत्वंक्षमेरुधर्म
त्वं ॥ सोमइति मनइतिचैकार्थ ईरित इतियोज्यं ॥ अन्यथाईरितमितिस्यात् ॥ मनः सोमलतास्थानीयमितियावत् ॥ ज्ञानोत्पत्तावितिसर्वत्रान्वयः ॥
अनेन सोमरथस्थानीयंज्ञानमिति सूचयति ॥ आस्तेशब्दोधर्चादित्वात्पुंनपुंसकलिंगः ॥ ३ ॥ २५ ॥

यच्चिद्धि ॥ सप्तर्चमिदं सूक्तं ॥ आ व इंद्रमिति द्वाविंशत्यृचं ॥ आयोनोत्तरस्य च पंचदनूभिरिंद्रं तुष्टाव ॥ यत्सत् । हे सत्य । सद्गुण । सोमपाः । तुविमघ । महामख । सर्वमखार्चनीय । इंद्र । यद्यस्मात् । चित् । एव । वयं । इदानीं । अनाशस्ता इव ॥ अशस्ता इव । अस्तुत्या इव । स्मसि । स्मः । अत्यंताप्रशस्तानीश्च रोपिनप्रशस्तान्करोतीति वशब्दः । ततः कारणात् । त्वं तुलमेव । नः अस्मान् । शुभ्रिषु । रूपेषु । सहस्रिषु । सहस्रसंख्याकेषु गोषु । अश्वेषु च । तद्विषये ॥

यच्चिद्धि सत्यसोमपा अनाशस्ता इव स्मसि ॥ आ तू न इंद्र शंसय गोष्वश्वेषु शुभ्रिषु सहस्रेषु तुवीमघ ॥ ३ ॥ २७ ॥ यत् ॥ चित् ॥ हि ॥ सत्य ॥ सोमऽपाः ॥ अनाशस्ताःऽइव ॥ स्मसि । आ तु । नः ॥ इंद्र । शंसय । गोषु । अश्वेषु । शुभ्रिषु । सहस्रेषु । तुवि मघ ॥ ३ ॥ २७ ॥ यत्सद्गुणाशस्ता इव स्मसि वयं ततः ॥ शुभ्रवाङ्मनआदीनां विषयेस्मान्प्रशंसय ॥ बहुवाच्यश्चेयथुक्तो न्कत्वास्मांस्त्वं महामख ॥ १ ॥ २७ ॥

आशंसय । लोकेनेति बाह्ये स्फुटं । अध्यात्मं तु । गोर्वाक् । अश्वाः मनआदीनि ज्ञानेंद्रियाणि । ततश्च शुभ्रवाङ्मनआदीनां विषयेऽस्मान्प्रशंसयेत्यर्थः । वागादीनां शुभ्रत्वं शुद्धत्वं भविष्यति । सहस्रत्वसंपादनाय बहुवाच्येत्याद्युक्तं । ततश्च विषयद्वारकं वागादीनां सहस्रत्वमिरुक्तं भवति । बहवश्च परमात्मगुणादयः । ॥ ३ ॥ २७ ॥

व्यास

५३

शिप्रिन् ॥ रूपविन् ॥ वाजानां पते । अन्नपते ॥ शचीवः ॥ शचीति वाङ्नाम ॥ तद्वत्त्वं च तत्प्रयोगादिसत्त्वेन । वाग्ज्ञ । दंसना । दंसनानि ॥ सर्वलोकस्य कर्माणि । तवा त्प्रेरितानि । तद्विषयाणि च । स एवंविधस्त्वं ॥ आ तू नः ॥ २ ॥ २७ ॥ निष्वापय ॥ दैत्य ॥ हे इंद्र ॥ ईश्वर ॥ मिथूदृशा ॥ मिथूइति मिथ्यार्थे । मिथ्यादृशौ । सामर्थ्या

शिप्रिन्वाजानां पते शचीवस्तव दंसना ॥ आ तू न० ॥ २ ॥ २७ ॥ शिप्रिन् ॥ वाजानां ॥ पते ॥ शचीऽवः ॥ तव ॥ दंसना ॥ आ तू न० ॥ २ ॥ २७ ॥ रूपविन्नन्नपते वाग्ज्ञ तव कर्माणि सर्वशः ॥ २ ॥ २७ ॥ निष्वापया मिथूदृशा सस्तामबुध्यमाने ॥ आ तू न० ॥ ३ ॥ २७ ॥ नि ॥ स्वापय ॥ मिथुऽदृशा ॥ सस्तां ॥ अबुध्यमाने इति ॥ ३ ॥ २७ ॥ दैत्यरक्षः प्रजे मिथ्यादृशौ सस्तां पुनर्बहु ॥ अबुध्यमाने नित्यं च यथा निष्वापयेश्वर ॥ ३ ॥ २७ ॥

दैत्यरक्षः प्रजे । सस्तां । स्वपसस्वपि ते । अज्ञानिन्यौ भवतां । मिथ्यादृशौ स्तस्वार्थे तं न स्यर्थमित्यत उक्तं । पुनर्बहिति । कथं । यथा नित्यं चाबुध्यमाने भवतः तथात्वं । तान् । निष्वापय ॥ किंच । आ तू नः ॥ ३ ॥ २७ ॥

ससंतु॥स्वपंतु॥हे शूराः।याः।ताः।व्यसुयेन प्रसिद्धाः।अरातयः।ते तव।शत्रवः।ससंतु स्वपंतु॥सर्वदा।अज्ञानमोहिताभवंत्विति यावत्॥किंच॥रातयः।तवमि
त्राणि।बोधंत्वेव।जानंत्वेव।तवस्वरूपमिति शेषः॥शूरे तिसंबोधनस्य तात्पर्यस्फुनिर्भयमिति॥सार्थमेववास्याइति स्त्रीलिंगमिति ज्ञापनाय प्रजात्वावृः प्रायुक्तः॥
अन्यथा दे सरक्ष्सी इत्यव क्ष्यत्॥किंच।आतून॥४॥२७॥समिंद्र॥पापया॥हे इंद्र प्रभो।गर्दभं॥दुर्वाक्यादि साम्यात्॥मायावाद्याख्य गर्दभं।संमृण।हिंसा

ससंतु या अरातयो बोधंतु शूर रातयः॥आतून०॥४॥२७॥ससंतु॥याः॥अरातयः॥बोधंतु॥शूर॥रातयः॥आ०॥४॥२७॥स्वपंतु ते शत्रवस्तेस
र्वदाज्ञानमोहिताः॥बोधंतु चैव मित्राणि तवरूपं स्फुनिर्भयं॥४॥२७॥समिंद्र गर्दभं मृण नुवंतं पापयामुया॥आतून०॥५॥२७॥सं॥इंद्र॥
गर्दभं॥मृण॥नुवंतं॥पापया॥अमुया॥आतून०॥५॥२७॥पापयामायया मिथ्यास्तुवंतं त्वामपि प्रभो॥मायामयास्त्वद्गुणान संतिप
रमार्थः॥इति निस्युरुवंतं च मायावाद्याख्य गर्दभं॥संचूर्णय तमस्येव क्षिप्त्वात प्यारमभिं सदा॥५॥२७॥

र्थयं॥तमस्येव क्षिप्त्वात प्यारमभिं सदा संचूर्णय॥कथंभूतं॥नुवंतं।त्वां स्तुवंतमपि॥स्तुवतो हिंसानुपपन्नेति चनवाच्यं॥पापया अमुया॥माययेति
शेषः॥माययास्तुतिं विदृणोति॥मिथ्येति॥शाठ्येनेत्यर्थः॥प्रकारांतरेणमाययानुवंतमित्येत द्व्याख्याति॥मायामयाइति॥ततश्च मायामाश्रि
त्येत्यर्थः॥अनेन दयाशील देव प्रसीदेत्यादिस्तुतेः शाठ्यमूलत्वं निराकारमोंकार गम्यमित्यादि वर्ण्यस्यास्तुतित्वमुक्तं भवति॥किंच॥आतून॥५॥२७॥

व्यास
५४

आयजी॥द्वे फलकदेवतके इत्युक्तं॥आयाज्यो॥आयजी।कर्मणीकारः।आयाज्यो।संम्यक् याज्यौ।वाजसातमा।वाजमन्नं स्फुनुतइति वाजसौ॥जनस
नखनक्रमगमोविट्॥अतिशयेन वाजसौ वाजसातमौ॥अन्नलब्धृणामुत्तमौ।उच्चा।उत्कृष्टौ।ता।तौ।फलकौ।विजर्भृतो हि।विशेषेण भक्ष्यतो
हि।अतिभक्षकौवर्तेते।कथमिदं लभ्यत इत्यत आह॥जर्हेति॥अस्मात्॥प्रथमपुरुषद्विवचने हकारस्य भकारे रमागमे बकुलग्रहणा द्वकारे चविकर
णे कृते सतीदं रूपं सिध्यतीत्यर्थः।वृा विव॥हरी इव।अश्वौ।इं इत्येतिशेषः।यथा।अंधांसि अन्नानि।बप्सता बप्सतौ।अत्तिकर्माणं।अन्नभक्षकौ

ता आयजी वाजसातमौ ह्युच्चा विजर्भृतः॥हरी इवांधांसि बप्सता॥२॥२६॥आयजी इत्या यजी॥वाज सातमा॥ता॥हि॥उच्चा।वि जर्भृ
तः॥हरी इवेति हरी इव॥अंधांसि॥बप्सता॥२॥२६॥आयाज्यावन्नलब्धृणामुत्तमवितिभक्षकौ॥जहभक्षण इत्यस्माद्यथाश्वावन्नभ
क्षकौ॥सोमस्य भक्षकावत्र॥२॥२६॥तानो अद्य वनस्पती ऋष्वावृष्वेभिः सोतृभिः॥इंद्राय मधुमत्सुतं॥३॥२६॥ता॥नः॥अद्य॥
वनस्पती इति॥ऋष्वौ॥ऋष्वेभिः॥सोतृभिः॥इंद्राय॥मधुमत्॥सुतं॥३॥२६॥टी॥॥तथा।ननु हरी धानजश्वांदेरं धसो भक्षकौ
प्रसिद्धौ।फलकयोस्तु कथं व्याख्यानमित्यत आह॥सोमस्येति॥सवनकाले सोमस्य भक्षकौइति॥अत्र फलकविषये व्याख्येयमित्यर्थः॥२॥२६॥तानः।
ऋष्वौ।हे ऋष्वौ।अतिमहत्तरौ वनस्पती।तातौ।उक्तस्वरूपौ।युवां।ऋष्वेभिः।महद्भिः।सोतृभिः।सह।इंद्राय।नः।अस्मदीयं।मधुमत्।स्वादुयुक्तं।सोममिति
शेषः।सुतं।सुनुतं।यद्यप्यद्य शाद्वो महन्नामैव तथापि सोतृणां महत्वं वद्दे वता महत्वं न भवतीति प्रदर्शनायाति महत्तरा वित्युक्तं॥३॥२६॥

सर्वं ॥ हे इंद्र ॥ परिक्रोशं ॥ परिक्रोशकरं ॥ निंदकं ॥ सर्वं ॥ पापिनं ॥ जनं ॥ जहि ॥ जंभय ॥ श्वादिभिर्निर्यदंशाय ॥ कथं ॥ छकदाश्वं ॥ छकाः ॥ कवचाः ॥ तैः ॥ दाश्वं दंशनं ॥ ककचैर्दारुणो दंशनं ॥ यथेति शेषः ॥ किंच ॥ आतुनः ॥ ७ ॥ २७ ॥ आवः ॥ हे वाजयंतः ॥ वाजं युद्धं ॥ तत्कुर्वतः ॥ तत्करोतीति णिच् ॥ सुध्यंतः ॥ योद्धारः ॥ यद्वा वाजमन्नं ॥ सर्वभोगोपलक्षणं ॥ चेदं ॥ वाजं ॥ सर्वतोभोगान् ॥ भुंजत इति प्रातिपदिकात्तदर्थ इति णिच् ॥ भोगिनः ॥ देवा इति यावत् ॥ एवंशब्देनान्न

सर्वं परिक्रोशं जहि जंभया छकदाश्वं ॥ आतुनः ॥ ७ ॥ २७ ॥ सर्वं ॥ परिऽक्रोशं ॥ जहि ॥ जंभय ॥ छकदाश्वं ॥ आ० ॥ ७ ॥ २७ ॥ सर्वं परिक्रोशपरं पापिनं जहि जंभयं ॥ दंशायश्वादिभिर्निःसंक कचैर्दंशनं यथा ॥ ७ ॥ २७ ॥ आवइंद्रं क्रिविं यथा वाजयंतः शतक्रतुं ॥ मंहिष्ठं सिंच इंदुभिः ॥ ८ ॥ २८ ॥ आ ॥ वः ॥ इंद्रं ॥ क्रिविं ॥ यथा ॥ वाजऽयंतः ॥ शतऽक्रतुं ॥ मंहिष्ठं ॥ सिंचे ॥ इंदुऽभिः ॥ ९ ॥ २८ ॥ हे वाजयंतो युध्यंतो देवा भोगिन एव वा ॥ सोमैर्व इंद्रमासिंचे क्रिविं यद्वत्पंकृतेः ॥ कर्तारमीशमिव वा स्वदृष्टांतो हरेर्भवेत् ॥ ९ ॥ २८ ॥

मिछन्नहमिति व्यानमपाकरोति ॥ अनेकव्यत्ययापत्तेः ॥ वः ॥ युष्माकं ॥ स्वामिनं ॥ शतक्रतुं ॥ मंहिष्ठं ॥ पूज्यतमं ॥ इंद्रं ॥ इंदुभिः सोमैः ॥ अहं ॥ आसिंचे ॥ कमिव ॥ क्रिविं ॥ नृपं ॥ यथा यद्वत् ॥ सार्वभौमं ऐंद्रे महाभिषेके यथाभिषिंचंति तथेत्यर्थः ॥ नृपः ॥ कुतः क्रिविः ॥ कृतेः पालना ॥ देः करणात् ॥ करोतेः क्रिविः ॥ यद्वा क्रिविं यथा ॥ जगतः कर्तारं ॥ ईशं विष्णुमिव ॥ नन्विंद्रोपि यदा विष्णुस्तदा कथमिस्यत आह ॥ स्वेति ॥ हरेर्विवक्षायां स्वदृष्टांतो भवेत् ॥ १ ॥ २८ ॥

शतं वा ॥ शतेन वा ॥ यः ॥ अयं ॥ इंद्रः ॥ शुचीनां ॥ शुध्यानां ॥ समाशिरां ॥ संगताशिराणां ॥ आशिरावतां ॥ दीर्घश्छांदसः ॥ स्त्रीलिंगो वाऽऽशिरशब्दः ॥ सोमानामिति शेषः ॥ शतं वा ॥ शतेन वा ॥ सहस्रं वा ॥ सहस्रेण वा ॥ इतः क्वचित् ॥ न उ ॥ नैव ॥ आरीयते ॥ आलीयते ॥ निलीनो भवति ॥ युगपदेतदीयमानैरपि सोमैर्न तस्यालं बुद्धिर्भवतीति बहुभोगशक्तिमानिति भावः ॥ किमिव ॥ निम्नेन ॥ पातालइव ॥ अत्र नेस्फ भयत्र संबध्यत इत्युक्तं भवति ॥ प्र

शतं वा यः शुचीनां सहस्रं वा समाशिरां ॥ एदु निम्नं न रीयते ॥ २ ॥ २८ ॥ शतं ॥ वा ॥ यः ॥ शुचीनां ॥ सहस्रं ॥ वा ॥ समऽआशिरां ॥ आ इत् ॥ ऊं इति ॥ निम्नं ॥ न ॥ रीयते ॥ २ ॥ २८ ॥ शतेन वा सहस्रेण सोमानाशिरावतां ॥ पाताल इव नैवायं निलीनो भवति क्वचित् ॥ विलापयति तानेव ॥ २ ॥ २८ ॥

कारांतरेण व्याचष्टे ॥ विलापयतीति ॥ तान्सोमानेव ॥ अनेनैवमुक्तं भवति ॥ यः इंद्रः ॥ शुचीनां ॥ समाशिरां ॥ सोमानां ॥ शतं वा सहस्रं वा ॥ रीयत एव ॥ अंतर्णिश्तण्यर्थोयं ॥ विलापयत्येव ॥ स्वस्मिन्नंतर्भावयत्येव ॥ किमिव ॥ निम्नेन ॥ बह्वपि जलं पातालं यथा तथैवेति ॥ तमासिंचेति पूर्वेणान्वयः ॥ २ ॥ २८ ॥

संयत्॥ बलिने॥ मद्यस्मात्॥ एना॥ एतानि॥ विश्वानिच॥ अस्यइंद्रस्य॥ उदरे॥ प्रविष्टानि॥ ऋष्मिये बलिने। इंद्राय। षष्ठ्यर्थे चतुर्थी। मदायतत्प्रत्यये॥
व्यचोनसंदधइतिवक्ष्यमाणमर्थवशाद्बहुवचनांतंसंबध्यते॥ व्यचांसि। व्यक्तीः। प्रभावान्॥ कश्चिन्नैवसंदधुः। हिरव धारणे॥ किंच। समुद्रः। समु
द्रेकाकारणात्समुद्राख्याप्रकृतिश्च॥ नेव्यचोव्यक्तिं संदधे। कुतः। अस्य। महत्वतः। तस्मादितिपूर्वेण संबंधः। सप्रकृतिकानिविश्वान्युदरंप्रविश्यत
संयन्मदायऋष्मिणाएनाह्यस्योदरे॥ समुद्रोनव्यचोदधे॥ ३॥ २८॥ सं॥ यत्॥ मदाय॥ ऋष्मिणे॥ एना॥ हि॥ अस्य॥ उदरे॥ समुद्रः॥ न॥ व्यचः॥
दधे॥ ३॥ २८॥ बलिनेसोमदायच॥ संदधुर्नैवविश्वानिव्यक्तीरस्योदरे कचित्॥ समुद्रेकात्समुद्राख्याप्रकृतिश्चमहत्वतः॥ ३॥ २८॥ अयमुतेसम
तसिकपोतइवगर्भधिं॥ वचस्तच्चिन्नओहसे॥ ४॥ २८॥ अयं॥ ॐइति॥ ते॥ सं॥ अतसि॥ कपोतःऽइव॥ गर्भऽधिं॥ वचः॥ तत्॥ चित्॥ नः॥
ओहसे॥ ४॥ २८॥ तवेवायंप्रपंचश्चकपोतोगर्भधिंयथा॥ संम्यग्व्याप्नोषिविश्वंचतस्मोन्नोवाचओहसे॥ ४॥ २८॥
प्तिं॥ जनयितुंनालंकिमुतसोमइति॥ ३॥ २८॥ अयमुते। तवैव। हे इंद्र। अयंप्रपंचः। चशब्दात्प्रकृतिश्चेतिशेषः। तेउ। तवैव। तदधीनएव। किंच। गर्भधिं। ग
र्भोधीयतेऽत्रेतिगर्भाशयं। कपोतइव। कपोतोयथा। व्याप्नोतितथा। समतसि। अतसातत्यगमने॥ सम्यग्व्याप्नोषि। विश्वमितिशेषः। तत्तस्मात्। चित्। एवनःअ
स्माकं। ऋषीणां। वचः। वेदं। आहसे। वहेः संप्रसारणंछांदसं। वहसि। वेदप्रतिपाद्योभवसि। नहिपरिमितप्रभावोवेदप्रतिपाद्योभवति॥ ४॥ २८॥

व्यास
५६

पताति॥ दूरंच॥ किंच। वातः। वायुदेवः॥ एतान्॥ प्रकृतान्॥ त्वन्निंदकान्। वनात्। वने। कुंड्रणाच्या। कुंड्रणाच्यां॥ तस्मिन्प्रसिद्धे। अंधस्तमसीति
यावत्॥ दूरंदूरात्॥ अधिपताति॥ अंतर्णीतण्यार्थाल्लेट्॥ पातयतुच॥ किंच॥ आत्तनः॥ कथंतमोवनंइत्यतआह॥ वनमिति। वनतिः संभजनार्थः। संभजनंच
दृढग्रहः॥ वियोगाभावः। अतस्तमोदृढग्रहेष्ववनमित्युच्यते॥ कुंड्रणाचीशब्दस्यसनिमित्तमभिधेयमाह॥ एवेति॥ तत्तमएव॥ उल्बणावेदना॥ कुंड्रणाचीति
पताति कुंड्रणाच्या दूरंवातोवनादधि॥ आत्तन०॥ ६॥ २७॥ पताति॥ कुंड्रणाच्या॥ दूरं॥ वातः॥ वनात्॥ अधि॥ आ०॥ ६॥ २७॥ दूरंचपा
तयत्वेतान्वायुस्तस्मिंस्तमस्यधः॥ वनंदृढग्रहेष्वेवतत्तमोवेदनोल्बणा॥ कुंड्रणाचीतिसंप्रोक्ताकुंडान्नीचवत्तोधिकं॥ कुंभःकुंडाभिधः
कुंभीपाकान्नीचाहितइति॥ रेफःस्वरव्यत्ययश्चतदाधिक्यार्थमीरितो॥ ६॥ २७॥ टी०॥ ॥संप्रोक्ता। स्त्रीलिंगसंपादनायवेदनोल्बणेत्युक्तं॥
कुतः। कुंडान्नीचत्वतः। कः कुंडः। कुतश्चतमसस्ततोनीचत्वमित्यतआह॥ कुंभइति॥ कुंभः कुंभीपाकः। हीतितिरोरवोथमहानित्यादिवाक्यप्रसिद्धिंदर्श
यति॥ तद्गतिः। तेषांनिंदकानांगतिः तमः। एवंतर्हि कुंडनीचेतिभवितव्यंकुंड्रणाचीतिकथंइत्यतआह॥ रेफइति॥ अत्ररेफशब्देनश्रुतिशब्दादृका
रउच्यते॥ कुंडशब्देऽकारस्यऋकारः। नीचेत्यत्रस्वरयोरीकाराकारयोर्व्यत्ययश्च॥ तस्यकुंभीपाकान्नीचत्वस्याधिक्यज्ञापनार्थंप्रयुक्तो॥ अतएवप्राग
कमित्युक्तं॥ ६॥ २७॥ ७॥

योगेयोगे ॥ तेजस्वि ॥ हे सखायः । वयं । तवस्तरं । तवइति बलस्येव तेजसोपिनाम ॥ अंतरिक्षं तमतुवर्थश्च । तेजस्वितमं । तं । इंद्रं । ऊतये । योगेयोगे । सर्वेषु ध्यानयोगेषु । वाजेवाजे । सर्वेषु युद्धेषु । मननेषु च । हवामहे ॥ २ ॥ २९ ॥ आघ । अत्र । यदि श्रवदिति परमेश्वरस्य श्रवणं पाक्षिकं प्रतीयते तत्परि हाराय सोपस्करं व्याख्याति ॥ उक्तं चेदिति ॥ यद्यस्माभिरागच्छेत्युक्तं स्यात्तदा स इंद्रः शृणोत्येवेत्यध्याहारः ॥ यदि । श्रवत् । शृणुयात् । भक्तो

योगेयोगेतवस्तरंवाजेवाजेहवामहे ॥ सखायइंद्रमूतये ॥ २ ॥ २९ ॥ योगेऽयोगे ॥ तवःऽतरं ॥ वाजेऽवाजे ॥ हवामहे ॥ सखायः ॥
इंद्रं ॥ ऊतये ॥ २ ॥ २९ ॥ तेजस्वितमभिंद्रंतंयोगेयोगेहवामहे ॥ २ ॥ २९ ॥ आघागमद्यदिश्रवत्सहस्रिणीभिरूतिभिः ॥ वाजेभि
रुपनोहवं ॥ ३ ॥ २९ ॥ आ ॥ घ ॥ गमत् ॥ यदि ॥ श्रवत् ॥ सहस्रिणीभिः ॥ ऊतिऽभिः ॥ वाजेभिः ॥ उप ॥ नः ॥ हवं ॥ ३ ॥ २९ ॥ उ
क्तंचेत्सशृणोत्येवश्रुतंचेदागमिष्यति ॥ बह्वर्थयुक्ताभिप्रायैरन्नैरप्युपनोहवं ॥ ३ ॥ २९ ॥

क्तं श्रुतं चेत् । तर्हि । सहस्रिणीभिः । सहस्रवतीभिः । ऊतिभिः । अभिप्रायैः । बह्वर्थयुक्ताभिप्रायैः सह । अन्नानां पृथग्युक्तेस्तदन्यान्बहून्नु रूपार्थान्दातुमितियावत् ॥ वाजेभिः अन्नैरपि । सह । अन्नानि च दातुं नः अस्माकं । हवं । आह्वानं । उपागमद्धु । उपागच्छेदेव । आगमिष्यति ॥ ३ ॥ २९ ॥

व्यास
५८

अनु ॥ पुरातनस्य ॥ अहं । प्रत्नस्य । पुरातनस्य ॥ अनादेर्विष्णोः । ओकसः । तदोकसः । प्रसिद्धस्थानस्य । वैकुंठादेः । अर्थे । तुविप्रतिं नरं । अक्ष यं । इंद्रं । हरिं । त्वां । हुवे । ह्वये । आह्वयामि । तुविप्रतिः कुतइत्यत आह ॥ महानिति ॥ तुवीति बहुनाम । ततो महान् । प्रस्थितः सर्वान्वैरिणः प्रतितिष्ठ तीति प्रतिः प्रतिरयमुपसर्गः ॥ उपसर्गाश्च सति क्रियावचने तत्संबंधिनो भवंति ॥ असति तु ससाधनां क्रियामाहुः ॥ द्विर्वचनं त्वभिप्रायमात्रेण ।

अनुप्रत्नस्यौकसोहुवेतुविप्रतिंनरं ॥ यंतेपूर्वंपिताहुवे ॥ ४ ॥ २९ ॥ अनु ॥ प्रत्नस्य ॥ ओकसः ॥ हुवे ॥ तुविऽप्र
तिं ॥ नरं ॥ यं ॥ ते ॥ पूर्वं ॥ पिता ॥ हुवे ॥ ४ ॥ २९ ॥ पुरातनस्यविष्णोस्तदोकसोर्थेह्वयेहरिं ॥ महान्प्रतिप्रतिस्थश्च
तुविप्रतिरितीरितः ॥ यंत्वांपूर्वंपिताज्ञात्वैवाह्वयामासविश्वकृत् ॥ त्वद्भक्त इतिवाब्रह्मा ॥ ४ ॥ २९ ॥

नतु ततः कर्मप्रवचनीयत्वं । तुविर्महांश्चासौ प्रतिः प्रतिप्रतिस्थश्चेति तुविप्रतिरितीरितः ॥ कथंभूतं । यं । ते । त्वां । पूर्वं । पूर्वस्मिन्काले । ते । पिता । ज्ञात्वैव न तु जनकः । विश्वकृत् । ब्रह्मा । हुवे । आह्वयामास ॥ यद्वा ॥ ते त्वदीयः त्वद्भक्तः । विश्वस्य पिता । ब्रह्मा ॥ हुवइति व्याख्येयं ॥ ४ ॥ २९ ॥

तंत्वा ॥ तत्वां ॥ हे विश्ववार ॥ सर्वैर्वरणीय ॥ पुरुहूत ॥ बहुभिराहूत ॥ सखे ॥ सर्वत्रवसतीतिवसुः ॥ वसो ॥ वयं ॥ तं ॥ उक्तरूपं ॥ त्वा ॥ त्वां ॥ आ
शास्महे ॥ इछामः ॥ नकेवलेमस्मदर्थे । जरितृभ्यः ॥ अन्येभ्योपिस्तोतृभ्यः ॥ ५ ॥ २९ ॥ अस्माकं ॥ हेसोमपाः ॥ हसखे । वज्रिन् । शिप्रिणीनां ॥ शि

तंत्वावयंविश्ववाराशास्महेपुरुहूत ॥ सखेवसोजरितृभ्यः ॥ ५ ॥ २९ ॥ तं ॥ त्वा ॥ वयं ॥ विश्वऽवार ॥ आ ॥ शास्म
हे ॥ पुरुऽहूत ॥ सखे ॥ वसो इति ॥ जरितृऽभ्यः ॥ ५ ॥ २९ ॥ तंत्वामाशास्महेवयं ॥ ५ ॥ २९ ॥ अस्माकंशिप्रिणीनां
सोमपाःसोमपाव्नां ॥ सखेवज्रिन्सखीनां ॥ ६ ॥ ३० ॥ अस्माकं ॥ शिप्रिणीनां ॥ सोमऽपाः ॥ सोमऽपाव्नां ॥ सखे ॥
वज्रिन् ॥ सखीनां ॥ ॥ ६ ॥ ॥ ३० ॥ ॥ अस्माकं स्फ रिवनां सोम पात्ॡणां ॥ ॥ ६ ॥ ॥ ३० ॥ ॥
प्रंस्फरवं ॥ लिंगव्यत्ययेन स्फरिवनां ॥ सोमपाव्नां ॥ आतोमनिनित्यादिनावनिप् ॥ सोमपातॄणां ॥ तवसखीनां ॥ अस्माकं । भद्रंभवत्विति शेषः ॥ ६ ॥ ३० ॥

त्रास ५८

स्तोत्रं ॥ गिरां ॥ हेराधानांसिद्धीनांपते । गिर्वाहः ॥ गिरांवेदानांवाहक प्रवर्तक ॥ वहतेरसुन्प्रत्ययश्च । ह्रस्वश्छांदसः ॥ वीर । विक्रांत । यस्यते । तव । स्तोत्रं । अखिलं ।
वेदवैदिकमितिशेषः । इयंचमे । सूनृतावाक् । तस्यतव । विभूतिः विभूतेः ऐश्वर्यस्य । प्रतिपादिका । अस्तु । त्वया विभूतिप्रतिपादिकेतिकल्प्यतां ॥ ननुवेदाना
मर्थसंबंधस्योत्पत्तिकत्वात्कथमेस्त्वितिप्रार्थ्यतइत्यतआह ॥ अस्त्विति ॥ ल्यब्लोपेनिमित्तापंचमी । प्रसादेन फलदानमपेक्ष्यास्त्विसेतदुदीर्यते । मदीयया

स्तोत्रंराधानांपतेगिर्वाहोवीरयस्यते ॥ विभूतिरस्तुसूनृता ॥ ५ ॥ २८ ॥ स्तोत्रं ॥ राधानां ॥ पते ॥ गिर्वाहः ॥ वीर ॥ यस्य ॥ ते ॥ विऽभूतिः ॥ अस्तु ॥
सूनृता ॥ ५ ॥ २८ ॥ गिरांवाहकतेस्तोत्रंमखिलंवेदवैदिकं ॥ सूनृतावागियंमेचविभूतिरितिकल्प्यतां ॥ अस्त्विसेतत्प्रसादेनफलदानादुदीर्य
ते ॥ ५ ॥ २८ ॥ ऊर्ध्वस्तिष्ठानऊतयेस्मिन्वाजेशतक्रतो ॥ समन्येषुब्रवावहै ॥ ६ ॥ २९ ॥ ऊर्ध्वः ॥ तिष्ठ ॥ नः ॥ ऊतये ॥ अस्मिन् ॥ वाजे ॥ शतक्रतोइ
तिशतऽक्रतो ॥ सं । अन्येषु । ब्रवावहै ॥ ६ ॥ २९ ॥ उत्तमः सन्नत्रयुद्धेज्ञानाज्ञानमयेविभो ॥ अभिप्रेतार्थसिध्यर्थमस्माकंतिष्ठसर्वदा ॥ मात्स्थितस्त्वं
महंचैवत्वामन्येषुब्रवावहै ॥ १ ॥ २९ ॥ टी॰ ॥ ॥ सूनृतयावाचास्तेप्रेन्नोभक्ताफलंदेहीत्यभिप्रायेण सूनृताविभूतिरस्त्वितिलक्षणयोच्यतइति ॥
॥ ५ ॥ २८ ॥ ऊर्ध्वः ॥ उत्तमः ॥ हेशतक्रतो । विभो । नः अस्माकं । ऊतये । अभिप्रेतार्थस्यज्ञानादेः सिध्यर्थं ॥ अस्मिन्वाजे । अत्र । अनुभवसिद्धे । ज्ञानाज्ञानमयेयुद्धे ॥
ज्ञानाज्ञानहेतूनांप्रमाण्यतदाभासादीनांसंघर्षे । ऊर्ध्वः उत्तमः । अस्मत्प्रतिपक्षस्यजेतान् । सर्वदातिष्ठ । अतएवमत्स्थितः त्वमहंच । त्वा । अन्येषुशिष्येषु । संब्रवावहै ॥
संम्यगुपदेशावहै ॥ ६ ॥ २९ ॥ ७० ॥

रेवतीः॥वित्तसंयुताइत्यादिनारेवत्यादिपदार्थोस्त्रवदाह॥रैपर्यायोरेशब्दः।ततोरेवतीःरेवत्यः।वित्तसंयुताइतिभवति।यद्वापशवःरेवत्यःप्रोक्ताःपशवोवैरेवत्यइत्यादौ॥सदेरकारप्रत्ययःदस्यचधः।सीदत्यस्मिन्निति सधः आश्रयः।मदीहर्षे।भावेघञ्।मादःसुखं।मादस्यसधः।उपसर्जनस्यपूर्वनिपातः।ततश्चसधमादइत्यस्यसुखस्थितावित्यर्थोभवति॥तिष्ठत्यस्मिन्निति स्थितिः॥सधमादस्थयोश्छंदसीतितुनाश्रितं।सहशब्दार्थानुपपत्तेः।तुविशब्दोबहुपर्यायः।वाजशब्दोन्नवाची।स्त्रीलिंगंवैदिकं॥अतस्तुविवाजा।महान्नानि॥क्षिनिवासगत्योरित्यतोडुप्रत्ययः॥क्षुर्निवासः॥क्षुमंतःस्थितिसंयुताः॥केचित्क्षुशब्द

रेवतीर्नःसधमादइंद्रेसंतुतुविवाजाः॥क्षुमंतोयाभिर्मदेम॥३॥३०॥रेवतीः।नः।सधऽमादे।इंद्रे।संतु।तुविऽवाजाः॥क्षुऽमंतः।याभिः।मदेम॥

॥३॥३०॥वित्तसंयुताः॥रेवतीःपशवःप्रोक्ताःसधमादेसुखस्थितौ॥तुविवाजामहान्नानिक्षुमंतःस्थितिसंयुताः॥ज्ञानयुक्तंसुखंवास्यात्सतीरस्माकमूर्जितं॥३॥३०॥

शब्दस्यस्वेदंरूपंमत्वाक्षुमंतःकीर्तिमितइतिव्याकुर्वते।तदसत्।धातोःशब्दवित्रोवार्थत्वेनकीर्तेरलाभात्।रेवतीस्तुविवाजाइत्यस्यज्ञानयुक्तसुखंवार्थः।ज्ञानस्यैवमुख्यवित्तत्वात्सुखस्यैवमुख्यान्नत्वात्।इदानींवाक्यार्थमाह॥स्यादिति॥ऊर्जितं।एतदन्नादिकं।सधमादे।इंद्रे।अस्माकं।ईशे।स्वामिनि।सतीतिशेषः।रेवतीः।वित्तसंयुताः।तुविवाजाः।पशवः।तुविवाजाश्चवा।संतु।कथंभूताः।येषां।याभिः।क्षुमंतःसंतः।मदेम सुखिनोभवेम॥३॥३०॥

व्यास ५९

आघ॥त्वद्वान्॥हेधृष्णो॥प्रगल्भ॥त्वावान्।त्वद्वान्॥त्वत्स्वामिकः॥पुरुषः॥त्मना॥मंत्रेष्वाङ्यादेरात्मनः॥आत्मनाघत्वयैव॥आप्तःस्यात्।नकेवलमन्नादिमानिति-चशब्दः॥वक्ष्यमाणसमुच्चयेवा॥किंचस्तोतृभ्यः॥षष्ठ्यर्थेचतुर्थी॥स्तोतृणां॥तृतीयार्थेवा।तैःस्तोतृभिःशिष्येः॥आ।समं

आघत्वावांत्मनाप्तःस्तोतृभ्योधृष्णवियानः॥ऋणोरक्षंनचक्र्योः॥४॥३०॥आ।घ।त्वाऽवान्।त्मना॥

आप्तः॥स्तोतृऽभ्यः॥धृष्णोइति॥इयानः॥ऋणोः॥अक्षं॥न॥चक्र्योः॥४॥३०॥त्वद्वांस्त्वयैवचाप्तःस्यात्स्तोतृणामासमंततः॥इयानोगम्यमानस्तैरणतोश्चक्रयोर्यथा॥[redacted] अक्षमाश्रयभावेन॥४॥३०॥

ततः॥इयानःगम्यमानः॥तदाश्रयश्चस्यात्॥इणगतावित्यस्येदंरूपं॥किमिव॥ऋणोः।रणतोः।रणतेःक्विपिसंप्रसारणं॥शब्दंकुर्वतोश्चक्र्योः॥चक्रपर्यायश्चक्रिशब्दः॥चक्रयोःअक्षंन॥यथाअक्षमाश्रयभावेनवर्तते॥तथादार्ष्टांतिकेस्तोतृभ्यइत्युक्तत्वादत्राप्यृणोरेस्तुकं॥४॥३०॥

आयतु॥स्तोतृणां॥हेशतक्रतो॥यत्।यस्मात्।त्वं॥शचीभिः॥वेदनाभिः॥जरितृणां॥कामंकाम्यंसर्वं॥आदुवः।आदुहः॥दुहश्छंदसिलेटिरूपमेतत्॥दुग्ध।वानसि॥ऋण्वोरक्षंनेतिपूर्ववदाश्रयत्वमात्रेणदृष्टांतः॥तस्मात्ममापिकामंदेहीतिशेषः॥द्वितीयस्याऽऽशब्दस्यवैय्यर्थ्यमित्यत आह॥

आयदुवःशतक्रतावाकामंजरितृणां॥ऋण्वोरक्षंनशचीभिः॥ ५।।२०॥आ यतु॥दुवः॥शतक्रतोइतिशतऽक्रतो॥आ॥कामं॥जरितृणां॥ऋण्वोः॥अक्षं॥न॥शचीभिः॥५॥२०॥स्तोतृणां कामम्आदुहः॥आसमंतात्स्थितंकाममत्याधिक्येपृथक्पदं॥५॥२०॥

आह॥आसमंतादिति॥ऐहिकंपारत्रिकंचेत्यर्थः।पक्षांतरमाह॥अत्याधिक्यइति॥प्रागेकआशब्दोदुवइतिक्रियासंबंधीद्वितीयस्तुससाधनक्रियावाचीकामविशेषणमित्युक्तं॥इदानींतुद्वावपिदुवइतिक्रियासंबंधिनौ॥अत्याधिक्यार्थत्वेनवैय्यर्थ्यंचेत्यर्थः।पृथक्पदं॥पुनराशब्दः॥५॥२०॥

व्यास
६०

तथातत्॥अस्तुतत्॥हेसोमपाः॥सखे॥वज्रिन्।देव।वयं॥तेसकाशादितिशेषः॥यथाम्ह॥इष्टये॥गत्यर्थोऽयं॥प्राप्तुं॥उश्मसि॥वशकांतौ॥इच्छामः॥तत्।

तथातदस्तुसोमपाःसखेवज्रिंतथाकृणु॥यथातउश्मसीष्टये॥२॥३०॥तथा॥तत्॥अस्तु॥सोमऽपाः॥सखे॥वज्रिन्॥तथा॥कृणु॥यथा॥ते॥उश्मसि॥इष्टये॥२॥३०॥अस्तुतत्तथा॥तेसकाशाद्यथेच्छामःप्राप्तुंदेवतथाकृणु॥वज्रोज्ञानंवजगतावित्यस्मात्॥२॥ ३० ॥

तथा॥अस्तु।कथं।त्वं।तथाकृणुकुरु।हेरोवज्रिन्शब्दंघटयितुंवज्रशब्दार्थमाह।वज्रइति॥वजगतावित्यस्माद्धातोरप्रत्ययेकृतेगत्यर्थानांज्ञानार्थत्वात्वज्रज्ञानमितिलभ्यते॥तदस्यास्तीतिवज्रीति॥२॥३०॥

आश्विनौ॥ त्वच आश्विनः॥ गोमत्॥ हेदस्त्रौ। अश्विनौ॥ अश्ववत्या। अश्वयुक्तया॥ शूवीरया। सुखपुत्रयुजा च। इषा अन्नेन। सह। गोमद्धिरण्य वदितिक्रियाविशेषणे॥ यथा युवयोरागमनं गोमद्धिरण्यवच्च स्यात् तथैव॥ नः अस्मान्प्रति। आयातं। अश्वादिकं दातुमायातमितिवृत्। शूवीरये सेत सुखपुत्रयुजेति व्याख्यातं॥ तत्किंचिद्विशदयति॥ शमिति॥ यतः शं सुखं। वीरश्च पुत्रः। द्वंद्वान्मत्वर्थे अशी आदिभ्यो अच्। अतो युक्तमुक्तं॥

आश्विना वश्वावत्येषा यातं शूवीरया॥ गोमद्दस्रा हिरण्यवत्॥२॥३१॥ आ। अश्विनौ। अश्वऽवत्या। इषा। यातं। शूवीरया।
गोऽमत्। दस्रा। हिरण्यऽवत्॥२॥३१॥ गोमद्धिरण्यवच्च स्याद्यथा यातं तथैव नः॥ सुखपुत्रयुजा चाश्ववत्येषा शं सुखं यतः॥
इडैश्वर्यं तथा वीरं वीर्यं खान्यश्वनामतः॥ गोवर्द्धितं च रमणं परं ब्रह्म गुणोच्छ्रिते॥२॥३१॥

इडादि शब्दानामध्यात्ममर्थमाह॥ इडिति॥ ऐश्वर्यं॥ मनोजयः॥ ईर्ष ऐश्वर्य इत्यस्येदं रूपं॥ तथा शब्दः समुच्चये। वीर्यमिति अविद्या जये पराक्रमः। नामतः। नाम्ना। उच्यंते। हितं च रमणीयं चेति परं ब्रह्म हिरण्यं। तथा लोहानां श्रेष्ठं तद्यास्सर्वतोऽपि गुणोच्छ्रितमिति वा हिरण्यं॥२॥३१॥

समान॥ हेदस्त्रौ॥ अश्विनौ। वां युवयोः भक्तानां। त्वदात्मनां। भवच्चित्तानां॥ भगवतएकत्वादेकवचनं॥ समानं योजनं योगो यस्यासौ तथोक्तः। समानयोगयुक्तः। मुक्तत्वं च करणत्वेन। चित्सुखत्वादमर्त्यश्च। हि। अयं। प्रसिद्धः रथः। देहः। समुद्रे क्षीरसागरे। ईयते ज्ञायते। कोसौ समान

समानयोजनो हि वां रथो दस्रावमर्त्यः॥ समुद्रे अश्विनेयते॥३॥३१॥ समानऽयोजनः। हि। वां। रथः। दस्रौ। अमर्त्यः। समुद्रे॥
अश्विना॥ ईयते॥३॥३१॥ समानयोगयुक्तोयं यथा देहस्त्वदात्मनां॥ चित्सुखत्वादमर्त्यश्च ज्ञायते क्षीरसागरे॥ मोक्षस्य भवतां प्रा
प्तिः समानो योग उच्यते॥३॥३१॥

योग इत्यत्र आह॥ मोक्षस्येति॥ यावतां योगेन। तावान्। प्रसिद्धाश्विनोः सः समानयोजनः। योग्ययुक्तत्वात्। अमर्त्यः अलौकिकः। समु
द्रः। ईयते। आशु समुद्रगामीति॥३॥३१॥

न्यघ्न्यस्य। एकं चक्रं॥ हे अश्विनौ। सौरस्य रथस्य। एकं चक्रं। अघ्न्यस्य। पर्वतनमैतत्। मानसोत्तरस्य गिरेः। मूर्धनि। मूर्ध्नि। युवां। नियेमथुः। नियमितौ स्थः। युवाभ्यां नियमितं वर्तत इति यावत्। अन्यत्। अपरं। चक्रं। चक्रस्थानीयो क्षप्रदेशः। द्यामुपरि। दिवि। मेरौ। ईयते। ज्ञायते। भवन्नियमनेन। प्र

न्य३घ्न्यस्य मूर्धनि चक्रं रथस्य येमथुः॥ परि द्यामन्यदीयते॥ ४॥ ३६॥ नि॥ अघ्न्यस्य॥ मूर्ध

नि॥ चक्रं। रथस्य। येमथुः। परि। द्यां। अन्यत्। ईयते॥ ४॥ ३६॥ एकं चक्रं गिरेर्मूर्ध्नि नियतं दि

वि चापरं॥ पापं चक्रं हरिघ्न्यस्य पुण्यं दिव्यस्य चोपरि॥ ४॥ ३६॥

कारांतरेण व्याख्याति॥ पापमिति॥ अश्विनौ। रथस्य। जगदाख्यस्य। एकं चक्रं। प्रवृत्तिहेतुत्वसामासायं। अघ्न्यस्य। अः। विष्णुः। तेन हन्यत इति हरिघ्न

स्य दैत्यजनस्य। मूर्धनि। नियेमथुः। युवां स्थापितवंतौ स्थः। अन्यच्चक्रं पुण्यं। द्यामुपरि। लक्षणया दिव्यस्य जनस्योपरि। भवद्भ्यां एव। ईयते॥ ४॥ ३६॥

व्यास ६२

इश्वदिंद्रः॥ तस्मादिंद्रः स्तूयमानः प्रीतो मनसा हिरण्यरथं ददौ॥ तमेतया प्रतीयायच्छाश्वदिंद्र इति॥ क्रोधात्॥ इंद्रः। प्रोष्ठथद्भिः। प्रथ प्रख्याने इंद्रस्य से

दरूपं प्रथयद्भिः। आत्मवीर्यमिति शेषः। नानदद्भिः अतिशयेन पुनःपुनर्वनिादान्कुर्वद्भिः॥ शाश्वसद्भिः। क्रोधात्। भृशं। भूयो भूयश्च श्वसद्भिः। स्फरैः। शा

शश्वदिंद्रः पोप्रुथद्भिर्जिगाय नानदद्भिः शाश्वसद्भिर्धनानि॥ स नो हिरण्यरथं दंसनावान्स नः सनिता सनये स नोऽदात्॥ ५॥ ३६॥ शश्व

त्। इंद्रः। पोप्रुथत्ऽभिः। जिगाय। नानदत्ऽभिः। शाश्वसत्ऽभिः। धनानि। सः। नः। हिरण्यऽरथं। दंसनाऽवान्। सः। नः। सनिता।

सनये। सः। नः। अदात्॥ ५॥ ३६॥ क्रोधाच्छ्वसद्भिः प्रथयद्भिरात्मवीर्यं स्फरैः शश्वदिंद्रो जिगाय॥ धनानि नः स्वर्णरथं च दाता

लब्धा प्रादाल्लाभकृते श्वनोऽखिलं॥ ५॥ ३६॥ टी॰॥ ॥ श्वत्। सर्वदा धनानि। दैत्यसंबंधीनि। जिगाय। जितवान्। दंसनावान्। कर्म

वान्। सः। इंद्रः। नः। अस्मभ्यं। हिरण्यरथं। स्वर्णमयं रथं॥ इदानीं। अदात् प्रादात्॥ स एव च। नः। अस्मभ्यं। सनिता। अखिलमैहिकं दाता

यद्वा। सः। नः। अस्मदीयं। अखिलं हविरादिकं सनिता लब्धा। किं च। सः। नः। अस्माकं सनये लब्धये। पारत्रिकलाभकृते च। भवति॥ ५॥ ३६॥

वयंहि॥चिंतयामः॥हे अश्वेन॥आसश्ववत्।चित्रे।सदाभद्रे।ईश्वरापेक्षयापुल्लिंगं॥इवादियुक्तमुपमानमुपमेयवृत्तीतिततोपिसंबुधिः।अरु
षि।अरुणेवर्णतः।चशब्दोगुणसमुच्चये।वयं।आंतात्।आपराकात्।अंतपराकयोरा।पंचम्यर्थेषष्ठी।आङ्।भिविधौ।विश्वं।तेतवैकस्येति।अमन्म
हि॥चिंततवंतोहिसदाचिंतयामः।पराकांतौव्याचष्टे॥पराकइति॥श्रीरेवपराकः।कथं।सुखरवेति कृत्वा।परंआ सम्यक्कंअस्येतिपुल्लिंगसाम

वयंहितेअमन्महांतादापराकात्॥अश्वेनाचित्रेअरुषि॥६॥३३॥वयं॥हि॥ते।अमहन्महि॥आ।अंता
त्।आ।पराकात्॥अश्वेन॥चित्रे॥अरुषि॥६॥३३॥चिंतयामस्त्वद्वैकस्यविश्वमांतपराकयोः॥पराकः
सुखरेवश्रीरंतःकलिरुदाहृतः॥नरकस्वर्गयोरेवदेव्युषाउदितायदा॥आसश्ववत्सदाभद्रेचारुपे॥६॥३४॥

श्योपितत्वात्।अंतःकलिःसकलजीवांसत्वात्।लक्ष्मीदूर्वकलिपर्यंतंविश्वंतवैवस्वमितिजानीमःइत्यर्थः।प्रसिद्धायामुषस्येतदसंभवा
दांतादापराकादितिप्रकारांतरेणव्याख्याति॥नरकेति॥यदात्वषाःदेवी।अत्र।उदिता।तदा।नरकस्वर्गाभ्यामित्येवव्याख्येयं।अंतेविनाश
दुःखंनरकः।परमसुखत्वात्पराकः।स्वर्गः नरकस्वर्गयोः।देवी।स्वामिनीतिस्वार्थत्वेवाषष्ठी॥६॥३५॥

व्यास
६२

त्वंतेभिः।अत्रदिवोदुहितरित्येतत्प्रसिद्धायामुषसिव्याख्याति॥प्रायोति॥यद्यपिवागेवद्यौस्तथापिकेवलायाःस्त्रियअपत्यसंबंधाभावात्प्राणग्रहणं॥
परमेश्वरेदिवोदुहितृत्वंघटयति॥तदिति॥वाचाव्यंग्यत्वादेव।हेदिवोदुहितः।उषः।त्वंसेभिः।त्यैःप्रसिद्धैः।वाजेभिः।वाजैः।अन्नानिदातुमि
तियावत्।अस्मान्प्रति।आगहि।आगच्छ।अस्मे।अस्माकं।रयिं।वित्तंच।निधारय।निश्चितंस्थापय॥७॥३१॥शुनःशेपदृष्टासुचोव्याख्यायो
त्तरासामृषिंदेवताश्चाह॥अग्नीति॥यःसूर्यगं।स्वर्णाभिधंहिरण्यनामानंविष्फं।संस्तुतवान्।स्वर्यास्तूपइति॥हिरण्यस्तूपइति॥प्रसि

त्वंयेभिरागहिवाजेभिर्दुहितर्दिवः॥अस्मेरयिंनिधारय॥७॥३३॥त्वं।तेभिः।आ।गहि।वाजेभिः।दुहितः।दिवः।अस्मेइति।रयिं।नि॥
धारय॥७॥३३॥प्राणवाक्सूते॥तद्व्यंग्यत्वाश्चरिश्चैवद्दिवस्पुत्रउदाहृतः॥७॥३१॥अग्नींद्रादिगतंपृथक्कुस्थितमपिस्तोसच्यु
तंभक्तितःस्वर्णस्तूपइतिप्रसिद्धिमगमद्यःसंस्तुवन्सूर्यगं॥विष्फंस्वर्णसमानचारुवपुषंस्वर्णाभिधंशाश्वतंतंदृष्ट्वापरतोभवद्ब्रह्म
हितःसुज्ञानमाप्याप्तवान्॥ ॥टीका॥ ॥धिंअगमत्।सुष्ठुस्तुतावित्यस्माद्रूपप्रत्ययः।हिरण्यस्तूपोहिरण्यस्तूप
पइति।विष्फःकुतोहिरण्यनाम।स्वर्णसमानचारुवपुषं।तर्हिरूपवत्त्वादनित्यः।शाश्वतं।यश्वतंविष्फं।दृष्ट्वा।परतःपूरैः।महितःपूजितश्च।अभ
वत्।सुज्ञानमाप्याप्तवान्।सहिरण्यस्तूपआंगिरसःउत्तराभिःऋग्भिः।अग्नींद्रादिगतं।पृथक्कुस्थितमपि।अग्न्यादिनामानं।अच्युतं।भक्तितःस्तौ
मि।अग्नींद्रादिदेवतास्तत्रतत्रवक्ष्यामः॥७॥३२॥

त्वमग्ने प्रथमो अंगिरा ऋषिः ॥ अष्टादशर्चमिदमाग्नेयं सूक्तं ॥ अंगेरसः ॥ शरीरे सारइत्यंगिरा उच्यते । ज्ञानतः ज्ञानबलात् । ऋषिश्चोच्यते ।
न त्वंगिरसा ऋषियेव्यादिसेव शब्दः । दिवोकसां प्रियत्वेन देवानां सखा चोच्यते ॥ योजनात् । हे अग्ने ॥ त्वं प्रथमः सर्वोत्तमः । असि । तथा । अं
गिराः ऋषिः । देवः । शिवः । सखा सकः । देवानां सखा । अभवः । सर्वदाभवसि । किंच । भ्राजंत्यः ऋष्टयः आयुधविशेषाः येषां ते भ्राजदृष्टयः

त्वमग्ने प्रथमो अंगिरा ऋषिर्देवो देवानामभवः शिवः सखा ॥ तव व्रते कवयो विद्मनापसोजायंत मरुतो भ्राजदृष्टयः ॥ ३ ॥ ३२ ॥
त्वं ॥ अग्ने । प्रथमः । अंगिराः । ऋषिः । देवः । देवानां ॥ अभवः । शिवः । सखा । तव । व्रते । कवयः । विद्मनाऽअपसः । अजायंत ॥ म
रुतः । भ्राजत्ऽऋष्टयः ॥ ३ ॥ ३२ ॥ अंगेरसो ज्ञानतएव चर्षिः सखा प्रियत्वेन दिवोकसां सखा प्रहरिः ॥ तव व्रते तेनैव सवि
द्यकर्मिणो महाविज्ञाना मरुतो बभ्रुविरे ॥ ३ ॥ ३२ ॥ टी० ॥ ॥ यः । मरुतः । अतीतवर्तमानाबायवः । तव व्रते । व्रतेनैव ॥
त्वद्विषयव्रतबलेनैव । विद्मनापसः । विदेः क्यन् । विद्मना विद्यया सहितमपः कर्म येषां । सविद्यकर्मणः संतः कवयः महाज्ञानाः । अजायंत ।
बभ्रुविरे बभ्रुवुः । इत्थं सार्थेन ज्ञानसहितकर्मणा पुनः कथं ज्ञानावाप्तिरित्यतो महच्छब्देन वीतिच ज्ञानं विज्ञिनेष्टि ॥ ३ ॥ ३२ ॥

It ends here.

व्यास
६४

कस्ते ॥ उषस्योयं तृचः ॥ कोमर्तः । हे कधप्रिये । अमर्त्ये विभावरि । उषः । कः । मर्तः । मर्त्यः । तेतव । भुजे भोगाय । भवति । न कोपि । कधप्रियेइत्येतद्व्या
चष्टे ॥ यतइति ॥ सर्वं प्रियमेव यस्य न किंचिद्दुःखकारणं । ससर्वप्रियः । यतो भवान् सर्वप्रियः । अतः कधप्रियः । तस्य स्त्रीरूपस्य संबुद्धिः । कधप्रियेत्व
थमेतल्लभ्यतइत्यत आह ॥ किमपीति ॥ कधशब्दः किमपीत्यस्यार्थे निपातः । सर्वमपीत्यर्थः । सर्वं प्रियमेव न त्वप्रियं किमपीत्येतत्कुतइत्यत आह ॥

कस्त उषः कधप्रिये भुजे मर्तो अमर्त्ये ॥ कं नक्षसे विभावरि ॥ ५ ॥ ३३ ॥ कः । ते । उषः । कधऽप्रिये । भुजे । मर्तः । अमर्त्ये ।
कं । नक्षसे ॥ विभाऽवरि ॥ ५ ॥ ३३ ॥ कोमर्तस्तव भोगाय यतः सर्वप्रियो भवान् ॥ किमपि प्रियमस्येति पूर्णानं
दात्कधप्रियः ॥ आप्तकामत्वतः कं वा गच्छसि स्वार्थहेतुतः ॥ विशेषाङ्गाद्वते विस्फुः कथितश्च विभावरी ॥ ५ ॥ ३३ ॥
पूर्णानंदात्पूर्णानंदत्वादिति ॥ यतस्त्वं । अमर्त्या । पूर्णानंदा च । अतः । तव भोगः कथं मर्त्याधीन इति । कं नक्षसे । क्षयगतो । आप्तकामत्वतः
कारणात्स्वार्थहेतुतः कमेव प्रतिगच्छसि । न कंचन प्रति । विभावरीतिव्याचष्टे ॥ विशेषादिति ॥ विशेषाङ्गा । विशिष्टा भा । तया । जगदावर
णात् । विशिष्टा भा विभा । वृणोतेरकारः । स्त्रियामीकारः । विभया वरी विभावरी विभावरी चेति संबंधः ॥ ५ ॥ ३३ ॥

जराबोध॥स्तुतिबोधा॥ जरतिस्तुत्यर्थः॥जरांस्तुतिंबुध्यतइतिजराबोधः॥हेजराबोध॥यतः।त्वंजराबोधः।स्तुतिबोधा।तत्तस्माद्रुद्राय
रुजांविद्रावकाय।रुद्राय।विष्णवे।तुभ्यं।दृशीकंस्तोमं।प्रत्यक्षामुख्यैः क्रियमाणांतांस्तुतिं।विविड्ढि।विशेषेणविध्धि।सर्वदाऽवधारय।त
द्विषयामिमांस्तुतिंत्वमवधारयेत्यर्थः॥ननुपरमेश्वरःसर्वज्ञःतत्कथंविशेष्यस्तुतिबोधाकथ्यते॥कथंचनित्यज्ञानोविविड्ढीतिप्रार्थ्य
तइत्यतआह॥नित्येति॥सर्वज्ञोपीत्यपिग्राह्यः।तत्फलंस्तुतिफलं।वेनास्तुतेः।विध्धीतिप्रार्थ्यतेचेत्यपिद्रष्टव्यं॥किमर्थं।यज्ञियायास्य

जराबोधतद्विविड्ढि विशेविशेयज्ञियाय॥स्तोमंरुद्रायदृशीकं॥५॥२३॥जराऽबोध।तत्।विविड्ढि।विशेऽविशे।यज्ञिया
य।

[This is only a repetition of page. 47. Adhyaya 2]

ऋग्भाष्यम्

प्रथमद्वितीयाध्यायौ